गर्भिणीं कारणतां कथमनुगमयितासीति ॥४२॥ किञ्च स्वरूपसत्त्वं, स्वरूपाद्ध घटाद्यात्मनो नाधिकम्, असतोपि स्वरूपं स्वरूपमेव, न हि असन् घटादिर्न घटादिः, तथासति 'घटादिर्न' इत्यपि न स्यात्, असतोऽघटादित्वात् ॥४३॥ अथ सदपि सत्तामनन्तर्भाव्य कारणम्, तदानीमसदपि तत्तथास्तु, सत्त्वासत्त्वयोः कारणकोट्यप्रवेशाविशेषात् ॥४४॥ अथ सत्ता न कारणकोटिनिविष्टा किन्तु कारणत्वं सत्त्वं, नियतपूर्वसत्तां हि कारणतां मन्ये—इति मन्यसे, तर्हि मत्पक्षेपि सैव कारणताऽस्तु, तर्हि कारणस्य सत्तामभ्युपगतवान् असीति घट्टकुट्यां प्रभातम् इति चेन्न ॥४५॥

भावानवबोधात्। सत्तामसतीमभ्युपगच्छतापि सत्ता मयाभ्युपगतैव; अन्यथा कासावसतीति। त्वमपि किं सत्तां तत्सत्तामन्तर्भाव्य कारणत्वमिच्छसि? नत्वेवम्; पूर्ववत्क्वापि सत्तात्यागो वा अनवस्थायां वा पर्य्यवसानं स्यात्॥४६॥ असत्त्वाविशेषात्कारणनियमः

में गोत्वादि न होने पर भी "गौः" इत्याकारक अनुगत प्रतीति के निर्वाह के होने से सब जातियों को तिलाञ्जलि दिया जायगा। समर्थन—सत्ता का सब जगह अनुगम न हो, स्वरूपभूत-सत्ता प्रति व्यक्ति भिन्न ही रहे, तब भी स्वरूपसत्ता से कारण तो सत् ही सिद्ध हुआ खण्डन—स्वरूपसत्त्व को प्रति व्यक्ति भिन्न २ होने से उससे घटित कारणत्व को भी हर व्यक्ति में भिन्न २ होने से कारणत्व का अनुगम कैसे करोगे? ॥४२॥ किञ्च—स्वरूपसत्त्व स्वरूप (घटादि) से अधिक तो है नहीं, और असत् का स्वरूप भी स्वरूप ही है; क्योंकि असत् घटादि 'घटादि नहीं है' ऐसा नहीं है, किन्तु असत् घटादि भी घटादि ही है। यदि असत् घटादि न होते तो "घटादिर्न" यह प्रयोग भी नहीं होता, क्योंकि असत् घटादि है नहीं फिर निषेध किस का? जो वस्तु एक रूप से या एक देश में रहती है उसी का अन्य रूप से या अन्य देश में निषेध होता है। और "असन् घटः" यह प्रयोग भी नहीं होता, क्योंकि जब घट है नहीं फिर असत्त्व का विधान कहां होगा? ॥४३॥ समर्थन—सत्ता कारण-कोटि में विशेषण नहीं है, उपलक्षण है, यद्यपि घट का दण्ड कारण है—ऐसा ही कार्य्य कारण भाव है, तब भी सत्ता के उपलक्षण होने से कारण सत् है। खण्डन—यदि ऐसा है तो हम भी कह सकते हैं, कि असत्ता का कारण-दल में प्रवेश न होने से कारण असत् है; क्योंकि सत्त्व असत्त्व का कारण कोटि में निवेश न होने से दोनों मत में विशेष के न रहने से असत् ही कारण को क्यों न मानें? ॥४४॥ समर्थन—सत्ता कारणता में उपलक्षणत्व से या विशेषणत्व से प्रविष्ट नहीं है, कारणत्व ही सत्त्व है। क्योंकि नियत-पूर्व-सत्त्व ही को कारणत्व मानते हैं। खण्डन—यदि ऐसा मानते हैं, तब हमारे मत में भी नियत-पूर्व-सत्त्व ही कारणत्व है। समर्थन—तब आपने कारण की सत्ता मान ली, इससे घट्ट-कुटी में प्रभात हुआ। अर्थात् राज-कर के भय से छिपे मनुष्य का दैववश तहसील में प्रभात होने से जैसी गति हो ऐसी आपकी गति हुई ॥४५॥

सद्वाद-खण्डन—आप ने मेरे भाव को नहीं जाना। सत्ता को असती मानने पर भी मैं सत्ता को मानता ही हूँ। यदि सत्ता को न मानूँ तो असत् किसको कहूँगा? आप भी "नियतपूर्वसत्त्वरूप कारणत्व" में अन्य सत्ता को मानते हैं या नहीं? यदि नहीं तो असत् ही कारण हुआ। और यदि मानते हैं, तो उस द्वितीय सत्ता को कारणत्व-दल में प्रवेश कर कारणत्व मानते हैं? या प्रवेश न कर? यदि न प्रवेश कर, तो असत् ही कारण रहा। यदि प्रवेश कर तो सत्ता में सत्ता, उसमें अन्य सत्ता, इस रीति से अनवस्था हो जायगी। और यदि किसी सत्ता में सत्ता न मानें, तो जड़ (मूल-कारण) तक सब असत् (सत्तारहित = मिथ्या) हो जायगा ॥४६॥

कथं स्यात् इतिचेन्न, सत्त्वाविशेषेपि तुल्यत्वात् ॥४७॥ सत्त्वेऽस्त्यन्वयव्यतिरेकानुविधानम् तस्य तज्जातीयस्य वा, त्वत्पक्षेऽसत्त्वाविशेषाद्ध व्यतिरेकः, परं सोप्यनियतः, यदा कारणाभावः तदा कार्य्याभावावश्यम्भावानभ्युपगमात्, नित्यासतः कारणस्यासत्त्व एव कदाचित्कार्य्योत्पादात्, अन्वयस्तु न क्वचिदपि इति चेन्न, तुल्यत्वात् । अन्वयो नास्तीत्यभ्युपगच्छताप्यन्वयोपगमात् । अन्वयस्यापि सत्तान्तर्भावने कथितदोषापत्तेः ।४८। एतेन—

"आशामोदकतृप्ता ये ये चोपार्जितमोदकाः ।
रस-वीर्य्य-विपाकादि तुल्यं तेषां प्रसज्यते"-(२)

—इत्यस्यबाधकत्वमाशामोदकायते । सत्तान्तर्भावानन्तर्भावाभ्यां प्रत्यादेशात् ।

शंका—यदि कारण असत् है, तो असत्त्व में कोई विशेष है नहीं, फिर 'घट का दण्ड कारण है रासभ नहीं'—यह नियम कैसे होगा ?

समाधान—यदि कारण सत् है, तब भी सत्त्व में कोई विशेष तो है नहीं, दण्ड-रासभ सब की सत्ता एक सी है, फिर तुम्हारे मत में भी 'दण्ड कारण है, और रासभ कारण नहीं है' यह नियम कैसे होगा ? ॥४७॥

सद्वाद-समर्थन—सत्त्व पक्ष में दण्ड या दण्डजातीय के साथ घट का—"जब दण्ड तब घट" "जब दण्ड का अभाव तब घट का अभाव"—ऐसा अन्वय व्यतिरेक है । वह (अन्वय व्यतिरेक) "दण्ड कारण है, रासभ नहीं है"-इसमें नियामक है । तुम्हारे मत में खाली व्यतिरेक (अभाव) है; वह भी नियत नहीं है, क्योंकि जब कारण का अभाव हो तो कार्य्य का अभाव अवश्य हो ऐसा नहीं है, किन्तु सदा असत् कारण के असत्त्व में ही कभी कभी कार्य्य की उत्पत्ति देखी जाती है । अन्वय तो कहीं भी नहीं है ।

खण्डन—'जहाँ दण्ड वहाँ घट, जहाँ दण्डाभाव वहाँ घटाभाव'-ऐसा अन्वय-व्यतिरेक दोनों मत में एकसा है । क्योंकि असत्वादी भी वस्तु को स्वरूप-सत् (प्रातिभासिक) मानते ही हैं । यदि स्वरूप से भी सत् नहीं मानेंगे तो उनके मतमें "असन् घटः" 'घटो न' इत्यादि-व्यवहार नहीं होगा । यह अन्य बात है कि प्रमाण से परमार्थ में दण्डादि सिद्ध नहीं होते हैं; परन्तु व्यवहार में तो दण्डादि हैं ही ।

किञ्च (और) अन्वय नहीं है—ऐसा कहने वालों को भी अन्वय अवश्य मानना पड़ेगा । यदि असत् भी अन्वय न हो तो निषेध किसका होगा ? समर्थन—सत् अन्वय कार्य्य-कारण-भाव का नियामक है, और असत् पक्ष में वह नहीं है । खण्डन—सत्ता से विशिष्ट या सत्ता से उपलक्षित अन्वय कार्य्य-कारण-भाव का नियामक है ? यह दोनों पक्ष उक्त रीति से अयुक्त हैं ॥४८॥

शंका—"आशा-मोदक विपणि के, मोदक से सममोद । चहिये तुम्हरे मतहि में, तुष्टि-पुष्टि अरु तोंद" । २ ।

अर्थात् जब सब वस्तु असत् (प्रातिभासिक) हैं, तो मनोमोदक और बाजार के मोदक से एक सा रस-वीर्य्य-विपाक होना चाहिये । समाधान—यह तर्क भी मनोमोदक के तुल्य आभास ही है। क्योंकि तर्क विपर्य्यय (अभाव) में पर्य्यवसायी होता है । यहाँ विपर्य्यय में इस प्रकार से पर्य्यवसान होगा कि तुल्य रसादि दोनों से नहीं होता है, अतः कारण सत् है । परन्तु सत् पक्ष का पूर्वोक्त युक्ति से खण्डन होने से विपर्य्यय में पर्य्यवसान बनता नहीं है ।

आशामोदकादिनाऽपि च रसवीर्य्यविपाकादिजननात् ।४९। तदसत् कथं कार्य्यं स्यात् इतिचेन्न, सत्तामन्तर्भाव्य कार्य्यत्वोपगमे कारणवत् कार्य्येपि उक्तदोषस्य अनन्तर्भावेत्राऽविशेषस्य पूर्ववादाद्वृत्तेः । तस्मात्—

"पूर्वसम्बन्धनियमे हेतुत्वे तुल्यएव नौ । हेतुतत्त्वबहिर्भूतसत्त्वासत्त्वकथा वृथा" (३) ।५०।

आस्तां प्रतिबन्दिग्रहाऽऽग्रहः; कथं पुनरसतः कारणत्वमवसेयम्, प्राक्सत्त्वनियमस्य विशेषस्यानभ्युपगमात्; असत्त्वस्य चाविशेषात् इतिचेन्न इदमस्मान्नियतप्राक् सत् इति बुद्ध्या विशेषात् ॥५१॥ भ्रान्तैवंबुद्धिगोचरेऽतिप्रसङ्ग इतिचेन्न, यादृश्या हि धिया त्रिचतुरकक्षाबाधाऽनवबोधविश्रान्तया वस्तुसत्त्वनिश्चयस्ते, तादृश्यैव विषयीकृतस्य ममापि कारणतानिश्चयः ॥५२॥ केवलं ततः परास्वपि कक्षासु बाधात् पूर्वपूर्वभ्रान्तिसम्भवेन न तावता सत्त्वावधारणम् वयं मन्यामहे इतिविशेषः ॥५३॥ परदर्शनसिद्धान्तस्य भूरि-

सत्य तो यह है कि स्वप्न में मनोमोदक से भी जाग्रत के मोदक के समान ही रसादि देखा जाता है; और गुञ्जा-पुञ्ज में कल्पित अग्नि से भी वानर की शीत-निवृत्ति देखी जाती है। अतः दोनों से तुल्य रसादि नहीं होता है—यह कथन नहीं बनता है ।४९। शंका—प्राक् (उत्पत्ति से पहले) असत् घटादि में सत्ता-सम्बन्धरूप कार्य्यत्व रहता है, इससे कार्य्य असत् कैसे हो सकता है? समाधान—यदि सत्ता के अन्तर्भाव से कार्य्यत्व मानें, तो कारण के तुल्य कार्य्य में भी उक्त दोष आवेगा; और यदि सत्ता का कार्य्यत्व में अन्तर्भाव न मानें तो असत्ता के अनन्तर्भाव से असत् ही कार्य्य क्यों न हो? पूर्वोक्त युक्ति से सत्त्व, कारण-कोटि में निविष्ट नहीं है, इससे दोनों मत में नियत-सम्बन्धरूप हेतुत्व तुल्य है। फिर हेतुत्व से पृथक् भूत कारण के सत्त्व-असत्त्व का विचार इस प्रसङ्ग में व्यर्थ है। यदि कारणत्व के सत्त्व-असत्त्व का विचार ही करना हो तो अलग ही करना चाहिये।

"पूर्व नियम से कार्य्य के, जो सो कारण यार!
इस प्रसङ्ग में क्यों करो, कारण-सत्त्व विचार" । ३ ॥ ५० ॥

शंका—प्रतिबन्दीरूप राहु का ग्रहण रहे; क्योंकि प्रतिबन्दी को वक्ष्यमाण (आगे कही जाने वाली) रीति से आप दोष नहीं मानते हैं, कारण में नियत प्राक्सत्त्व रूप विशेष को आप नहीं मानते हैं, और असत्त्व में कोई विशेष है नहीं; फिर असत् के कारणत्व को कैसे जानें? समाधान—दण्ड घट से नियमतः प्राक्क्षण में रहता है; यह बुद्धि ही विशेष है ॥५१॥ शंका—यदि बुद्धि ही विशेष है तो, रासभ (गदहा) घट से पूर्व है—इस बुद्धि से रासभ को कारण क्यों न मानें? समाधान—तीन या चार ज्ञान की कक्षा में बाध के अदर्शन से विश्रान्त जैसी बुद्धि से तुम्हें वस्तु का निश्चय होता है, वैसी ही बुद्धि से हमें भी कारणता का ज्ञान होता है ॥५२॥ भेद यह है कि तीन या चार कक्षा से अग्रिम कक्षा में बाध की सम्भावना से सम्भव है कि पूर्व पूर्व ज्ञान भ्रम हो; इससे हम तीन चार कक्षा में बाध के न होने पर भी वस्तु सत्त्व का निश्चय नहीं करते हैं ॥ ५३॥ शंका—तीन चार ज्ञान कक्षा में अबाध से अग्रिम कक्षा में भी अबाध अनुमान से सिद्ध होगा। समाधान—यह नियम नहीं है कि जो तीन चार कक्षा में अबाधित हो वह अग्रिम

१ पूर्वेण (कार्यपूर्वक्षणेन) नियमेन संबन्धः (वृत्तित्वम्) राजदन्तादित्वान्नियमशब्दस्य पूर्वनिपातः।

कक्षाबाधविनोपि ततः परकक्षाबाध्यमानत्वेनातथाभावोपगमात् । अन्यथैकदर्शनपरिशेषः स्यात् ॥५४॥ एतेनासत्त्वाविशेषेपि कथं कस्यचित्पक्षस्य त्रिचतुरकक्षाबाधित्वाबाधित्व-मास्ताम् इत्यपि निरस्तम् ॥५५॥

अनेवं बुद्धिविषयतादशायां कोविशेष इतिचेत्, यदा कदापि तादृशबुद्धिविषयतैव । अन्यथा कथय कथम् अन्यदातनतादृशबुद्धिविषयतयाऽन्यदासत्त्वं स्यात् । तदा सत्त्वम् अन्यदास्थेन गृह्यते इति चेत्, अन्यकालिकमेव तर्हि तत् तदातनकारणत्वोपयोगीतिसमा-नम् । तदेतत् सम्वृतिसत्त्वमितिगीयते ॥५६॥

असती सा न विशेषिका सती सा नेष्टेत्यभिसन्धानेन सम्वृतिरपिसतीनैवेति पृच्छन् प्रतिवक्तव्यः। विज्ञानं तावत् व्यवहारोपपादकतया द्वाभ्यामप्यनुमतम् । तस्यापि

कक्षा में अबाधित ही हो। क्योंकि नैयायिक मीमांसा-सिद्धान्त (शब्द-नित्यत्व) को—तीन चार ज्ञान कक्षा में बाध न होने पर भी—अग्रिम कक्षा में बाधित मानते हैं । यदि तीन चार कक्षामें अबाधित होने से प्रामाणिक मानें; तो सब दर्शनों के सिद्धान्त, आपाततः (बिना विचार) अबाधित होने से प्रामाणिक हैं; फिर प्रामाणिकत्व-अप्रामाणिकत्व-कृत दर्शनों के भेद नहीं होंगे। किन्तु सब दर्शन मिल कर एक दर्शन हो जायंगे ॥५४॥ शंका—यदि शुक्ति-रजत और यथार्थ-रजत दोनों की प्रातिभासिक सत्ता एक सी है, तो शुक्ति-रजत झटिति बाधित होता है, और यथार्थ रजत देर से बाधित होता है; इस भेद में क्या हेतु है ? समाधान—यद्यपि आप अन्य दर्शनों के सिद्धान्तों में और शुक्ति-रजत में एक सी सत्ता मानते हैं, तब भी जैसे अन्य सिद्धान्तों में बाधोदय देर से होता है, और शुक्ति-रजत में झटिति (अति शीघ्र) ऐसा ही यहाँ भी जानिये ॥५५॥

शंका—यदि कारण में वस्तुभूत 'नियत-प्राक्-सत्त्व' नहीं है, किन्तु प्रातिभासिक है, तब जिस काल और जिस बीज में "इदं अस्मात् नियत-प्राक्-सत्" यह बुद्धि नहीं है, उस काल या उस बीज में कारणत्व की व्यवस्था कैसे होगी ?

समाधान—उस काल में भी रासभादि में जो 'इदं अस्मात् नियतप्राक् सत्'—इस बुद्धि विषयत्व के अभाव का अधिकरणत्व है, उसका अभाव ही व्यवस्थापक है । अथवा यदा कदा (अन्य देश या काल में) या अन्य पुरुष में जायमान 'इदं अस्मात् नियतप्राक् सत्' यह बुद्धि ही नियामक है । यदि अन्य काल की बुद्धि नियामक न हो तो सद्वादी के मत में भी 'इदम् अस्मात् प्राक् आसीत्' इस बुद्धि से भूत दण्डादि में कारणत्व की व्यवस्था कैसे होगी ?

शंका—सद्वादी के मत में कारण सत् है, इससे अन्य काल के ज्ञान से गृहीत होता है ।

खण्डन—तब अन्य काल की बुद्धि ही वर्तमान कारणत्व-व्यवहार में उपयोगी (कारण) है । इसी को आचार्य लोग सम्वृति-सत्त्व कहते हैं; ज्ञान अपने सत्त्व से विषय के असत्त्व (अभाव) का सम्वरण कर लेता (छिपालेता) है; इससे ज्ञान को सम्वृति कहते हैं; और उसके सत्त्व को सम्वृतिसत्त्व कहते हैं ॥५६॥

प्रश्न—असत् (मिथ्या) सम्वृति (ज्ञान) व्यवहार का कारण नहीं हो सकती है, और शून्यवाद की हानि के भय से विज्ञान को सत् आप मानेंगे नहीं; फिर व्यवहार कैसे होगा ?

जिज्ञासायां त्रिचतुरकक्षाविश्रान्तगवेषणस्य यदि सत्त्वोपपन्ना भविष्यति, तदा सता तेनेद-मुपपादितं भविष्यति। अथासत्ता तस्य पर्य्यवसास्यति, तदाऽसतैव तेनेदमुपपाद्यते इति स्वीकर्तव्यम्। भ्रमविषयेणेव भ्रमे विशिष्टता-व्यवहारः ॥५७॥

अविचार्य्यैव तावत् तस्य सदसत्त्वम् विचार आरब्धव्यः। अन्यथा प्रथममेव मति-कर्दमे कथारम्भणमशक्यमापद्येत। स्वीकृतं च भवतापि भविष्यदादिविषये विज्ञाने विशि-ष्टव्यवहारनिदानत्वम् असतो विषयस्य। कारणशक्तेश्च विशेषकमसदेव कार्य्यम् ॥५८॥ नच कालान्तरसम्बन्धिनी सत्ता तस्यैकत्र, अन्यत्र नान्यदापीति वैधर्म्यमेतयोरपीति वक्तव्यम्। विशिष्टव्यवहारप्रवृत्तिसमये द्वयोरप्यसत्त्वाविशेषात्। प्रयोजनानुपयुक्ते काले तस्य स्वरूपतोऽवस्थानं पाटच्चरलुण्ठिते वेश्मनि यामिक-जागरण-वृत्तान्तमनुहरति ॥५९॥ तथापि कालान्तरस्थित्या घटादिकं स्वरूपतः विशेषणतश्च व्यवच्छिन्नं तद्विज्ञानेन स्व-भावबलाद्द स्वविशेषणत्वेनोपादीयते, नत्वेवमत्यन्ताऽसद्द भवितुमर्हति। तस्य स्वरूपतो

समाधान—ज्ञान व्यवहार का कारण है यह दोनों को इष्ट है। उसकी भी सत्ता की जिज्ञासा होने पर विचार होना चाहिये। विचार में तीन या चार कक्षाओं में सत्ता के अन्वेषण के समाप्त होने पर यदि युक्ति से असत्ता निश्चित होगी, तो व्यवहार की अन्यथानुपपत्ति से मानना पड़ेगा कि—असत् ही ज्ञान व्यवहार का निमित्त है। क्योंकि दृष्ट में कोई अनुप-पत्ति की शंका नहीं होती है। जैसे "इदं रजतं" इस भ्रम स्थल में असत् रजत ही "रजतीयं ज्ञानं" इस व्यवहार का प्रयोजक आप के मत में है, वैसे ही असत् विज्ञान ही मेरे मत में व्यवहार कारण है ॥५७॥

अतः ज्ञानके सत्त्व को न विचार कर ही कारण की सत्ता का विचार करना चाहिये। यदि नियम किया जाय कि ज्ञान की सत्ता के विचार के बिना विचार का आरम्भ नहीं हो सकता है, तो ज्ञान के सत्त्व-असत्त्व के विचार का आरम्भ भी नहीं होगा। क्योंकि यह भी विचार स्व से पूर्व स्व के न होने से ज्ञान के सत्त्व-असत्त्व-विचार-पूर्वक नहीं है। अर्थात् यदि ऐसा नियम करें तो ज्ञान रूप कीचड़ में गौ के तुल्य फँस जाने से विचार का आरंभ अशक्य हो जायगा। 'पुत्र होगा' 'बिजली चमक गई'—इत्यादि भूत-भविष्यत्-विषयक विज्ञानस्थल में असत् विषय को ही व्यवहार का कारण आप भी मानते हैं। तथा असत् कार्य्य ही "कार्यपूर्ववर्त्ति-कारणं"—यहां कारणत्व का निश्चायक होता है ॥५८॥

शंका—सद्वादीके मतमें अन्य कालमें सत् (सत्त्व) घटादि ज्ञान का विषय होता है, और असद्वादी के मत में घटादि अन्य काल में भी असत् है, यह दोनों मतमें विशेष है।

समाधान—जिस काल में व्यवहार होता है, उस काल में असत्त्व दोनों मत में एक सा है। और जिस काल में व्यवहार नहीं होता है, उस काल में सत्त्व चोरों से घर लूट जाने पर पहरे वालों के जागने के तुल्य व्यर्थ है ॥५९॥

शंका—व्यवहारकाल में दोनों मत में एक सा असत्त्व होनेपर भी सद्वादी के मत में अन्यकालमें घटादि के सत् होनेसे स्वरूप और विशेषण से युक्त घटादि हैं, अतः विज्ञान स्वभाव से उसको विषय करता है। और असद्वादी के मत में अत्यन्त (कालान्तर में) भी

विशेषणतश्च व्यवच्छिन्नतयाऽनंगीकारात् कुत्र स्वभावतो विज्ञानं सम्बन्धि निरूप्येत॥६०॥
न, उक्तमत्राऽसतोपि तदेव स्वरूपं, तस्य नियतस्वरूपस्यैव नियतविशेषणस्यैवासत्त्वात्। अन्यथाऽतिप्रसङ्गात्। भ्रान्तिविषयेण दत्तोत्तरत्वाच्चेत्यलमतिप्रपञ्चेन ॥६१॥

इति शून्यवाद-विचारः

अथ स्वप्रकाश-विज्ञान-विचारः।

अपरे पुनः चेतसोपि शून्यताऽङ्गीकारे मनःप्रत्ययमनासादयन्तः सर्वमिदमसदेव विश्वम् इत्यभिधातुं सहसैवानुत्सहमाना मन्यन्ते—विज्ञानं तावत् स्वप्रकाशं स्वतएव सिद्धस्वरूपम्। न खलु विज्ञाने सति जिज्ञासोरपि कस्यचित् जानामि नवेति संशयः, न जानामीति वा विपर्य्ययः, व्यतिरेकप्रमा वा। तेन जिज्ञासितस्याऽतत्त्वज्ञानव्यतिरेकप्रमाणानामभावसमुदायः स्वव्यापकं जिज्ञासितस्य प्रमितत्वमानयति। अन्यथा हि जिज्ञासितप्रमितत्वव्यतिरेकव्यापकं जिज्ञासित-व्यतिरेकोल्लेखि ज्ञानमविघ्नितजिज्ञासस्य स्यात्। अतः सर्वजनस्वात्मसम्वेदनसिद्धमेवास्यबोधस्य स्वरूपम् ॥६२॥

असत् घटादि विज्ञान का विषय कैसे हो सकता है? क्योंकि शून्यवादमें घटादि स्वरूप और विशेषण से युक्त नहीं हैं, फिर स्वभाव से विज्ञान का सम्बन्ध कहां होगा? ॥६०॥

समाधान—मैंने इस विषय में कहा है, कि असत् का स्वरूप भी स्वरूप ही है। अर्थात् नियत-स्वरूप और विशेषण से युक्त ही घटादि का असत्त्व है। यदि सर्वथा असत् मानें तो 'घटः असन्' 'घटो न' इत्यादि प्रयोग भी नहीं होंगे, और "इदं रजतं" इस भ्रम का विषय असत् रजत ही जैसे 'रजतीयं ज्ञानं" इस व्यवहार का कारण होता है, वैसे ही सब जगह असत् ही व्यवहार का कारण होता है। विज्ञान के बोध के लिये इतना ही बहुत है, अतः विस्तार व्यर्थ है ॥६१॥ इति शून्यवाद-विचारः।

अथ स्वप्रकाशवाद-विचारः।

शून्यवाद-खण्डन—विज्ञानको शून्य मानने में सन्तोष न करने वाले, तथा सारे संसार को असत् कहने में उत्साह से रहित वेदान्ताचार्य्य मानते हैं कि—स्वप्रकाश स्वतः (आप से) ही सिद्ध स्वरूप विज्ञान है। क्योंकि विज्ञान होने पर किसी जिज्ञासु को भी "मैं जानता हूँ या नहीं" ऐसा सन्देह, या ज्ञान में "यह ज्ञान नहीं है यह इच्छा है" ऐसा भ्रम, या "मैं नहीं ही जानता हूँ" ऐसी अभाव-प्रमा नहीं होती है। इससे जिज्ञासित-विज्ञान में सन्देह एवं मिथ्याज्ञान और व्यतिरेक प्रमा के अभाव का समूह अपने व्यापक जिज्ञासित विषय की प्रमिति (यथार्थज्ञान) का आक्षेप

१—"घटः" ऐसा ज्ञान होने पर जैसे घट में सन्देह विपर्ययादि नहीं होते हैं, वैसे ही घटज्ञान में भी सन्देहादि नहीं होते हैं। इससे अनुमान होता है कि घट के साथ २ घट-ज्ञान भी ज्ञात होता है। अर्थात् ज्ञान सूर्य्य के तुल्य अपने विषय (घटादि) के साथ २ स्व का (अपना) भी प्रकाश करता है अतः स्व-प्रकाश है। यदि ज्ञान को स्व-प्रकाश न मानें तो सन्निकर्षादि कारण रहते जिज्ञासा होने पर घट-ज्ञान में सन्देहादि होने चाहियें, क्योंकि यह व्याप्ति है कि "यत्र २ सन्निकर्षादि-कारण-सत्त्वे जिज्ञासायाम् अज्ञातत्वम् तत्र २ सन्देहादिः" अतः स्वप्रकाश-विज्ञान के स्वतः सिद्ध होने से शून्यवाद ठीक नहीं है, विज्ञानवाद ही ठीक है यह वेदान्त-मत है। यहाँ संक्षेप से उस मत का विचार करते हैं।

व्यवसायस्यानुव्यवसायनियमान्न तत्र संशयादिरिति चेन्न, यत्रैवानुव्यवसाये ज्ञेयता नोपेया तत्र जिज्ञासायाम् आत्मधर्म्मिकं तत्संशयमारभ्य व्यवसायविषयपर्य्यन्तं संशयाक्रान्तेर्दुष्परिहरत्वात् । विषयिसद्भावसंशये तद्विषयेपि संशयस्य सम्भवात् । एवं त्रिचतुरसंवेदनकक्षाज्ञानध्रौव्यनियमाभ्युपगमेऽपीति ॥६३॥ स्वप्रकाशेतु मान-मेय-भावव्यवस्थाया अभावादेव तदाश्रया दोषा निरवकाशाः । अन्यथा तु बोधस्वरूप-मेव न सिध्येत्, यदि हि विज्ञानं परतः सिध्येत् तदाऽनवस्था स्यात् । नच वाच्यम् अवश्यवेद्यताविरोनाभ्युपेयते स्वार्थव्यवहारस्तु स्वरूपसत्तया सूयते इति क्वानव स्थेति ? यतः तस्यां प्रमाणानुपन्यासे स्वरूपसत्तापि कुतः, ययाव्यवहारोपपत्तिः को ब्रूते सती सा वित्तिः, असत्येव न कुतः ? ॥६४॥

सामान्यतो वित्तेस्तथात्वविधावपेक्षितसिद्ध्या यत्र विशेषरूपायां प्रमाणाऽप्रवृत्तिः तदा

करेगा। अन्यथा (विज्ञान की प्रमिति यदि न हो तो) विज्ञान के अभाव का व्यापक—जिज्ञा-सित-विज्ञान के अभाव को विषय करने वाला—ज्ञान (सन्देहादि) अवश्य होने चाहियें। और होते नहीं हैं, इससे जानना चाहिये कि सब मनुष्यों के अपने ज्ञान से बोध का स्वरूप सिद्ध ही है ॥६२॥

शून्यवाद-समर्थन—व्यवसाय (ज्ञान) का अनुव्यवसाय (द्वितीय ज्ञान) होता है, इससे वहां (ज्ञानमें) सन्देह आदि नहीं होते हैं।

खण्डन—जिस ज्ञान का ज्ञान नहीं होगा उसकी जिज्ञासा होने पर सन्देह आदि हो जायँगे। और उसमें (ज्ञान में) सन्देह होने पर प्रथम ज्ञान के विषय तक संदेह हो जायगा। क्योंकि विषयी (ज्ञान) के सन्देह से विषय में सन्देह अवश्य होता है, ऐसे ही तीन या चार ज्ञान-प्रवाह का ज्ञान अवश्य होना जो वादी मानते हैं, उनके मत में भी सन्देह आदि दोष जानना चाहिये ॥६३॥

प्रश्न—स्वप्रकाश मानने पर वही ज्ञान कर्म्म और क्रिया दोनों कैसे होगा ? क्योंकि क्रिया-कर्म्म भाव और विषय-विषयिभाव भेद में होते हैं।

उत्तर—विज्ञानवाद में विज्ञान से अलग बाह्य किसी भी पदार्थ का स्वीकार न होने से विषय-विषयिभाव ही नहीं होता है। और यदि भेद में विषय-विषयि-भाव मानें तो विज्ञान सिद्ध ही नहीं होगा। और यदि विज्ञान की सिद्धि अन्य विज्ञान से मानी जाय तो अनवस्था हो जायगी।

समर्थन—वित्ति (ज्ञान) का अवश्य ज्ञान हो ऐसा नहीं मानते हैं, किन्तु ज्ञान स्वरूपसत्ता से ही स्वविषय (घटादि) के व्यवहार का निमित्त होता है। इससे अनवस्था नहीं होती है।

खण्डन—उस वित्ति (ज्ञान) में प्रमाण के न होने से उसकी स्वरूपसत्ता कैसे सिद्ध होगी ? जिससे व्यवहार की प्रवृत्ति होगी। कौन प्रमाण कहेगा कि वित्ति सती है ? असती ही वित्ति क्यों न हो ? ॥६४॥

समर्थन—व्यवहार में कारण होने से सामान्य रूप से ज्ञान के सिद्ध होने पर व्यव-हारकाल में जिस ज्ञान में प्रमाण नहीं है, उसमें भी पीछे जिज्ञासा होने पर विशेष-व्यवहार या स्मरण ही प्रमाण हो सकता है ॥ ६५ ॥

तत्र सत्त्वसाधनासत्त्वेपि जिज्ञासायां सत्यां पश्चाद्व्यवहारसत्त्वैव वा अन्यद्वा प्रमाणमस्त्येवेति चेन्न ॥६५॥

तस्यापि कथं सत्त्वमित्यनवस्था वा स्यात्, शेषासिद्ध्या सर्वासिद्धिर्वा प्रसज्येतेत्यर्थाऽसिद्धिपर्य्यन्तस्य व्यसनस्य दुरुत्तरत्वात् । सेयम् 'अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यतीति' ॥६६॥

घटसत्तां हि व्यवहरता प्रामाणिकेन तत्र प्रमाणसद्भावो वाच्यः । यदि प्रमाणमनुपन्यस्य सास्तीत्यङ्गीक्रियते, तदा वैपरीत्यमेव वा किं न स्यात् । ततश्च घटसत्तायां प्रमाणसत्ता दर्शनीया, तथाच प्रमाणसत्तापि तत्प्रमाणसत्तामन्तरेण प्रामाणिकस्य नाङ्गीकारार्हा, सर्वप्रमाणसत्तानिवृत्तेः वस्तुसत्तानिवृत्तिनियतत्वात् । अन्यथा सप्तमरसादेरप्यापत्तेः—इति व्यक्तमनवस्थादौस्थ्यमस्वप्रकाशवादिनः स्यात् । यदि हि विनैव प्रमाणसत्तां प्रमाणसत्तां परोऽङ्गीकारयेत् । तदा घटसत्तामपि तथैवाङ्गीकारयतामिति घटेपि वृथा प्रमाणोपन्यासः ॥६७॥

अथ नाव्यवधानलग्नवित्तितद्वित्तिधाराऽभ्युपगम्यते, किं नाम कदाचित् कुतश्चित् काचित् वित्तिः प्रमीयते इति सर्वा वित्तिः प्रमाणसिद्धैवेत्यभ्युपेयते इति चेन्न,

---

खण्डन—जिस सामान्य या विशेष व्यवहार से ज्ञानकी सिद्धि होती है, उस व्यवहार की सिद्धि भी ज्ञान के अधीन ही है, तथा उस ज्ञानकी सिद्धि भी अन्य ज्ञान के अधीन है, इस तरह अनवस्था हो जायगी । या जिस ज्ञानका ज्ञान न होगा उसकी असिद्धि से सब की असिद्धि हो जायगी । इस तरह से अर्थ की असिद्धि तक दोष हो जायगा । जो परीक्षक उपलम्भ (ज्ञान) का प्रत्यक्ष नहीं मानते हैं, उनके मत में अर्थ सिद्ध नहीं होगा, इस धर्मकीर्त्ति के वचन का भी यही अभिप्राय है ॥ ६६ ॥

घट-व्यवहार के करने वाले प्रामाणिक को घट में प्रमाण अवश्य कहना चाहिये । यदि प्रमाण को न देकर "घट है" ऐसा स्वीकार करें, तो उलटा ही अर्थात् "घट नहीं है" ऐसा ही स्वीकार क्यों न किया जाय । तस्मात् घट में प्रमाण अवश्य दिखाना चाहिये । तब तो प्रमाण भी प्रमाण के विना स्वीकार के योग्य नहीं है । क्योंकि सब प्रमाणों के अभाव से वस्तु का अभाव अवश्य होता है, यदि प्रमाण न होने पर भी वस्तु की सिद्धि हो तो सप्तम रस को मानना पड़ेगा । इस प्रकार से ज्ञान को जो स्व-प्रकाश नहीं मानते हैं, उनके मत में अनवस्था साफ ही है; यदि वादी प्रमाण के विना ही प्रमाण को स्वीकार कराना चाहें तो प्रमाण के विना ही घट का भी स्वीकार करावें, फिर घट में प्रमाण देना व्यर्थ ही है ॥ ६७ ॥

समर्थन—अन्य विषय के ज्ञान होने से धारावहनके तुल्य अव्यवधान से ज्ञान और तद्-ज्ञान—(उस ज्ञान का ज्ञान) धारा नहीं होती है, किन्तु जिज्ञासा होनेपर व्यवहार आदि हेतु से कोई २ वित्ति प्रतीत होती हैं । अतः सामान्य लक्षण से सब वित्ति प्रमाण-सिद्ध ही हैं, ऐसा माना जाता है ।

खंडन—'जिज्ञासा होने पर'...इत्यादि कथन से ज्ञात होता है कि आप भी व्यवधान से उत्पन्न ज्ञान और तज्-ज्ञान-धारा मानते हैं । परन्तु मान नहीं सकते हैं । ऐसा मानते यदि

स्यादप्येवं यदि घट इति घटं जानामीत्यतोऽधिका— घटवित्तितद्वित्तिधारया विषयभावेन प्रविष्टया तादृग्विषयशतभारमन्थरा—वित्तिरस्मदादेरुत्पद्यमानाऽनुभूयेत ॥ ६८ ॥

यद्यस्मदादिविलक्षणजन्मनि सा सम्भाव्यते, तदापि यस्या वित्तेः तावद्वित्तिगर्भिता धीर्विषयः साप्यन्यया कयाचिदुल्लेख्येत्यत्र प्रमाणाभावश्च । अनिर्मोक्षापत्तिश्च । न हि स्वमन्तर्भाव्य कयाचिद्द्धिया स प्रवाहो ग्राह्यः। तथासति स्वप्रकाशतासिद्धेः । अत एवान्योन्यविषयता निरस्ता । स्वविषयकान्योन्यग्रहे स्वग्रहापत्तेः ॥६९॥

नच पुरुषान्तरेण सा प्रमास्यते न तु तदभाव इति प्रमातेऽस्ति । तदर्थमपि प्रमाणान्तरसद्भावपरम्परापत्तेः ॥७०॥

नचैवं[1] घटसामग्री-तत्सामग्री-गवेषणेऽप्यनवस्था स्यात् ? वैषम्यात्, यदि हि घटसामग्री-तत्सा-

"घटः" "ज्ञातोघटः" इससे अधिक ज्ञान-प्रवाह (जिसमें विषयरूप से अनेक ज्ञान प्रविष्ट हों) अनुभव गोचर होता, परन्तु होता नहीं है ॥६८॥

समर्थन—हम लोगों से विलक्षण जन्म वाले योगियों की बुद्धि का विषय—विच्छिद्य उत्पन्न—विषय भार से मन्थर—ज्ञान भी होता है । खण्डन—तब भी जिस योगी के ज्ञान का विषय—विच्छिद्य उत्पन्न (व्यवधान रखकर उत्पन्न)—विषय शतभार से मन्थर (अनेक ज्ञानरूप विषयों के पड़ने से मन्द)--पूर्वोक्त ज्ञान होता है, वह योगी का ज्ञान भी किसी ज्ञान का विषय होता है, इसमें कोई प्रमाण नहीं है । समर्थन— वह योगी का ज्ञान भी योगी के अन्य ज्ञान का विषय होता है । खण्डन—ज्ञानधारा के अविश्राम होने से अन्य विषय का अज्ञान और मोक्ष का अभाव हो जायगा । समर्थन— उस ज्ञान-प्रवाह का ग्रहण करने वाला ज्ञान स्व-(अपनेआप) का भी ग्रहण करता है । खण्डन—ऐसा मानने पर ज्ञान स्व-प्रकाश सिद्ध हो गया । समर्थन—योगी के ज्ञान के प्रवाह में अन्त का ज्ञान अन्त के समीप के ज्ञान को, और समीप का ज्ञान अन्तकेज्ञान को विषय करता है; इससे न अनवस्था है, और न स्वप्रकाशता ही है। खण्डन-अन्त्य-ज्ञान स्व को विषय करने वाले उपान्त्य-ज्ञान (अन्त के ज्ञान का समीपवर्ती ज्ञान) को विषय करता हुआ स्व का भी ग्रहण करेगा। एवं उपान्त्य ज्ञान, स्व के ग्रहण करने वाले अन्त्य-ज्ञान को ग्रहण करता हुआ स्व का भी ग्रहण करता है, इस तरह अन्योन्य-ग्रह में भी स्वप्रकाश ही ज्ञान सिद्ध हुआ ॥ ६९ ॥ समर्थन— एक पुरुष के ज्ञानों के प्रवाह का अन्त्यज्ञान—अन्य-विषय के सञ्चार से, और मोक्ष होने से, विश्रान्त भी—अन्य पुरुष से गृहीत होता है, इससे अन्त्य की असिद्धि से सबकी असिद्धि नहीं है । खण्डन— अन्य पुरुष का अन्त्य-ज्ञान अन्य-पुरुष के ज्ञान का गोचर होता है । इसमें भी प्रमाण आप अवश्य देंगे। उसमें भी अन्य प्रमाण की अपेक्षा होने से अनवस्था वैसी ही है । किञ्च (और) अन्य पुरुष से भी अंत्य-ज्ञान ही गृहीत होता है, उसका अभाव गृहीत नहीं होता है, इसमें कुछ प्रमाण नहीं है ॥ ७० ॥

शंका—यदि ज्ञान का ज्ञान तथा उस ज्ञान का अन्य ज्ञान इस प्रकार से ज्ञान के प्रवाह को अनवस्थित न मानें, तो ज्ञान की सिद्धि ही नहीं होगी । अतः ज्ञान की अन्यथा

1 यहाँ शंकाकर्त्ता नैयायिक हैं, और समाधान-कर्ता वेदान्ती हैं । दोनों घट-सामग्री को परमाणु और प्रकृति (माया) में विश्रान्त मानते हैं । और घटादि के अनित्यत्व का कारण सामग्री का अविश्राम नहीं है, किन्तु जन्यत्व है । अतः शंका-समाधान दोनों समक्ष में नहीं आते हैं ।

मग्री-धारा कुत्रचिद्द विच्छिद्येत, तदा घटः सदातनः स्यात् इत्यार्थापत्त्यैव घटः सामग्री-परम्पराविच्छेदरहित एव प्रमीयते । यदि तु ज्ञानेऽप्येवं स्यात् तदा स्वस्य प्रवेशात् स्वप्रकाशापत्तिः । अप्रवेशादनवस्था । अवेदने शेषासिद्ध्या सर्वासिद्धिः—इति व्यसनं दुरुत्तरमेव । ये च मानमेयाश्रया दोषाः कीर्त्तनीयाः तेपि प्रसज्येरन् ॥७१॥ न च तैर्दोषै र्नास्त्येव ज्ञानमित्यास्थेयम् । स्वतः सर्वसिद्धस्य दुरपह्नवत्वात् । स्वप्रकाशाङ्गीकारादेव चाऽनुभवस्य सर्वदोषप्रहानेर्वक्ष्यमाणत्वात् । प्रकाशात्मतामात्रस्यैव स्वतः सिद्धिसम्भवे जडात्मनां धर्म्माणां केषामपि तदन्तर्भावानुपपत्तिः । अत एव धर्म्मोपग्रहप्रवर्त्तिष्णुवाग्व्यवहाराविषयत्वम्, कालानवच्छेदमादाय च नित्यत्वोपचारः ॥७२॥

देशानवच्छेदमादाय विभुत्वव्यपदेशः । प्रकारावच्छेदविरहनिबन्धनश्च सर्वात्मत्वाऽद्वैतादिव्यवहारः । सौगतप्रभाकरादिवद्द भावे नैयायिकवच्चाभावेऽभावानतिरेकस्वी-

असिद्धि रूप अर्थापत्ति प्रमाण से अनवस्था स-प्रमाण है, अतः दोष नहीं है । अन्यथा (यदि अनवस्था को सर्वत्र दोष मानें तो) घट के अनित्यत्व की अन्यथाऽनुपपत्तिसे घट-सामग्री-प्रवाह की अनवस्था भी दोष कही जायेगी । समाधान—यदि घट की सामग्री और उस सामग्री की सामग्री, इस प्रकार से अधः (पीछे) दौड़ती अनवस्था का कहीं भी अन्त (विश्राम) मानें, तो घट अनित्य सिद्ध नहीं होगा । अतः घट के अनित्यत्व की अन्यथाऽनुपपत्ति रूप प्रमाण-सामर्थ्य से अनवस्था दोष नहीं है । और ज्ञान की सिद्धि स्व-प्रकाश मानने पर भी होती है, अतः ज्ञान की सिद्धि की अन्यथाऽनुपपत्ति रूप प्रमाण के न होने से ज्ञान के प्रवाह की अनवस्था दोष है । यदि प्रवाह का कहीं विच्छेद मानें, तो अन्त्य की असिद्धि से सब की असिद्धि होती है, और यदि अन्त्य ज्ञान को स्व-विषयक मानें तो ज्ञान स्वप्रकाश सिद्ध होता है । और यदि ज्ञान को अन्य ज्ञान का विषय मानें, तो अन्य ज्ञान के साथ ज्ञान का सम्बन्ध कहना होगा । और वह सम्बन्ध—सम्बन्धी ज्ञान के द्रव्य न होने से—संयोग नहीं हो सकता है । तथा दोनों के गुण होने से समवाय नहीं हो सकता है । और भिन्न होने से तादात्म्य नहीं हो सकता है । द्रव्य आदि सात पदार्थों में अन्तर्भाव के न होने से विषय-विषयि-भाव का असम्भव है, अतः वह भी नहीं हो सकता है । ज्ञान असम्बद्ध का ही ग्रहण करता है—यह भी नहीं कह सकते हैं । क्योंकि यदि असम्बद्ध का ग्रहण करे तो अन्य का भी ग्रहण हो जायगा । ॥७१॥

प्रश्न—उक्त दोषों से ज्ञान ही नहीं है, ऐसा क्यों न मानें ? उत्तर—ज्ञान सब मनुष्यों के अपने अनुभव से सिद्ध है । अतः ज्ञान का अस्वीकार नहीं हो सकता है । स्वप्रकाश होने से ही अनवस्था और असम्बन्ध आदि दोष नहीं होता है, यह कहेंगे; केवल ज्ञान की ही स्वतः सिद्धि का सम्भव है, इसी से ज्ञानस्वरूपब्रह्म को सत्ता-गुणत्व-ज्ञानत्व आदि जड़ धर्म्मों के सम्बन्ध से प्रवृत्त-वाग्व्यवहार का अगोचर (अविषय) कहा है । प्रश्न—यदि ब्रह्म में कोई धर्म्म नहीं है "तो सत्यं ज्ञानमानन्दम्ब्रह्म" इस श्रुति में नित्यत्व धर्म्म का व्यवहार कैसे होता है ? उत्तर—काल के सम्बन्ध से वस्तु में अनित्यत्व का व्यवहार होता है, और वह (काल-संबन्ध) ब्रह्म में नहीं है । अतः अनित्यत्व के अभाव को मान कर उपचार (आरोप = कल्पना) से नित्यत्वव्यवहार होता है, जैसे रक्तादि (लाल पीले आदि) रूप के अभाव के होने से आकाश में नील रूप का व्यवहार होता है ॥७२॥

प्रश्न—'जगद् बृंहयति (व्याप्नोति) इति ब्रह्म'—इस व्युत्पत्ति से तथा 'महतो महीयान्' इस श्रुति से ब्रह्म में परम महत् परिमाण को अवश्य मानना पड़ेगा । उत्तर—देश के सम्बन्ध

कारादेव चाद्वैताऽव्याघातः। भ्रमविषयनिषेधवच्च प्रतियोगिनः सर्वथैवासिद्ध्याऽपि न काचित् क्षतिः ॥७३॥ तदेतत्तु श्रुत्या प्रमाणेनोपलक्षणन्यायात् तात्पर्य्यतः प्रकाश्यते। तेन परमार्थतोऽभिधानाभिधेयभावविरहे तात्पर्य्यतः श्रुतिस्तस्मिन्नविद्यादशायां पराभ्युपगमरीत्या प्रमाणमित्युच्यते। वस्तुतस्तु स्वात्मसिद्धमेव चिद्रूपम् ॥७४॥ ननु च स्वप्रकाशत्वं ज्ञानस्येत्यनुपपन्नमिदम्, क्रियाकर्म्मभावस्य भेदव्यतिरेकेणानुपपत्तेः; कार्य्या क्रिया हि कर्म्मणो भवति, कर्म्म च कारणं क्रियायाः, नच स्वेनैव स्वनिष्पादनम् शक्यम्, पूर्वापरभावविशेषस्य हेतुहेतुमद्भावरूपत्वात्, नच तस्मादेव तदेव पूर्वमपरं च सम्भवति। तदनवच्छिन्नकालविशेषस्य तत्पूर्वशब्दार्थत्वात्, तदा च तस्य सद्भावस्वीकारे स एव कालः तदवच्छिन्नः तदनवच्छिन्नश्चेति विरोधात् ॥७५॥ मैवम्, क्रियायाः कर्म्म-

से मूर्त्तत्व (परिमितत्व) का व्यवहार होता है, और ब्रह्म में मूर्त्तत्व नहीं है, अतः आरोप से विभुत्व (व्यापकत्व) का व्यवहार होता है। प्रश्न— घटत्वादि एक २ धर्म्म के सम्बन्ध से घटादि घटत्वाद्यात्मक हैं; और द्वैत हैं। और ब्रह्म सर्व धर्म्म के सम्बन्ध से सर्वात्मक तथा अद्वैत है। इस रीति से ब्रह्म में सर्व धर्म्मों का सम्बन्ध मानना पड़ेगा। उत्तर— घटत्वादि एक २ धर्म्म के सम्बन्ध से घटादि असर्व-धर्म्मात्मक हैं; और ब्रह्म में असर्व-धर्म्मात्मकत्व के अभाव के होने से आरोपित सर्व धर्म्मात्मकत्व का व्यवहार होता है। प्रश्न—द्वैत के अभाव को अद्वैत कहते हैं, और ब्रह्म में द्वैत का अभाव है, वह अधिकरण रूप नहीं है, अतः निर्धर्म्मक ब्रह्म सिद्ध नहीं हुआ। उत्तर—बौद्ध तथा प्राभाकर लोग जैसे अभाव को अधिकरण रूप मानते हैं, और नैयायिक जैसे अभाव में स्थित अभाव को अधिकरण रूप मानते हैं, वैसे ही हम भी अभाव को अधिकरण रूप ही मानते हैं। प्रश्न—यदि द्वैत के अभाव को अद्वैत कहते हैं, तब तो प्रतियोगी रूप से द्वैत भी मानना पड़ेगा। अतः अद्वैत ब्रह्म है—यह कथन नहीं बनता है। उत्तर—जैसे भ्रमस्थल में असत् (मिथ्या) रजत का ही 'नेदं रजतं' निषेध होता है, ऐसे ही असत् (मिथ्या = कल्पित) द्वैत का ही निषेध होता है। अभाव-ज्ञान में प्रतियोगी का ज्ञान अपेक्षित है। प्रतियोगी की प्रमा (यथार्थज्ञान) अपेक्षित नहीं है, द्वैत का भ्रम रूप ज्ञान है ही। प्रश्न—ब्रह्म यदि वाक् (वाणी) का अ-गोचर है तो उसमें श्रुति प्रमाण कैसे हो सकती है? उत्तर—यद्यपि धर्म्म-सम्बन्ध के न होने से ब्रह्म पद-वाच्य नहीं है। तथा योग्यता-ज्ञान के न होने से वाक्यार्थ भी नहीं है। तब भी जैसे 'काकवन्तो देवदत्तस्य गृहाः' इस वाक्य में काकपद उपलक्षण रूप से तृणच्छादन (छप्पर) का प्रतिपादन करता है, वैसे ही श्रुति विशेषण (जगत्कर्तृत्वादि) को त्याग कर तात्पर्य्य-बल से ब्रह्म को कहती है। तस्मात् वाच्य-वाचक भाव से रहित उस ब्रह्म में अविद्या-दशा (व्यवहार) में नैयायिकादि की रीति से श्रुति प्रमाण है। यथार्थ में अपने आप से सिद्ध चिद्रूप ब्रह्म है। प्रश्न—ज्ञान स्व-प्रकाश है यह बात युक्त नहीं है। क्योंकि क्रिया—कर्म्मभाव भेद के विना नहीं होता है। देखिये क्रिया कर्म्म का कार्य्य है। और कर्म्म क्रिया का कारण है। और स्व से स्व की उत्पत्ति नहीं होती है। क्योंकि पूर्व-पर-भाव कार्य्य-कारण-भाव रूप है। और अपने से आप पूर्व तथा पर नहीं हो सकता। अपने से अनवच्छिन्न (रहित) काल पूर्व—शब्द का अर्थ है। यदि पूर्वकाल में भी कार्य्य को मानें तो—वही काल उस कार्य्य से युक्त है, और अयुक्त-ऐसा विरोध होजायगा ॥७५॥ उत्तर—क्रिया कर्म्म से जन्य है—इस नियम को

जन्यतानियमानङ्गीरात्। सर्वथैवानागत-विषय विज्ञाने तदसम्भवात्। कचिज्जनकतामादाय च कर्म्मणि कारकत्वव्यपदेशात्। करणव्यापारविषयत्वाद्व वा परसमवेतक्रियाफलभागित्वाद्वा कर्म्मलक्षणात् विनापि क्रियाजनकत्वेन कर्म्मव्यवहारोपपत्तेः ॥७६॥ किञ्च तत् कर्म्मत्वं यत् स्वंप्रति विरुध्यते ? । परसमवेतक्रियाफलभागित्वम् इति चेन्न, अपादानस्यापि व्याप्तेः। अपादानं कर्म्मापि इति चेन्न, वृक्षात्पतति पर्णमितिवत् वृक्षम्पर्णं पततीत्यपि स्यात्। विवक्षातः कारकाणि भवन्तीति तदविवक्षया नैवम् इतिचेन्न, वस्तुतः सतः ताद्रूप्यस्य यदि विवक्षा स्यात्तदा तदपि स्यात्। अपादानस्य कर्म्मत्वं न विवक्ष्यते इति शाब्दिकसम्प्रदायोऽयम् इति चेत्। तर्हि तत्र निवृत्तसर्वकर्म्मव्यवहारेऽपि स्वकृतकर्मलक्षणानुरोधेन कर्म्मत्वमभ्युगच्छता वस्तुमात्रं कर्म्मेत्यपि लक्षणं सावकाशितं स्यात्। कथञ्च लोकोत्तरप्रज्ञेन निवृत्तसर्वकर्म्मव्यवहारेऽपि स्वकृतकर्म्मत्वमस्तीत्यधिगतम् ? । अपादानेतरद्व ईदृशं कर्म्मेति चेन्न, तत्रापि नदी वर्द्धते इत्यादौ तद्वृद्धेरप्राप्ततीरभागादिप्राप्तिफलायाः सकर्म्मकत्वापत्तेः।

हम नहीं मानते हैं। क्योंकि "घटं ज्ञास्यति" इस भावीस्थल में व्यभिचार है। प्रश्न—यदि कर्म्म क्रिया का कारण नहीं है, तो कर्म्म की कारक में गणना का हेतु क्या है ? उत्तर—कहीं ("आत्मानं जानाति" इस स्थल में) पर क्रिया का जनक कर्म्म होता है, अतएव कारक में कर्म्म की गणना होती है। प्रश्न—अतीत और अनागत कर्म्म-साधारण इसके (कर्म के) लक्षण के न होने से अनुगत कर्म्म का व्यवहार कैसे होगा ? उत्तर—करण का जो व्यापार है उसके विषय को कर्म्म कहते हैं। अथवा अन्य में रहनेवाली क्रिया के फल से युक्त को कर्म्म कहते हैं, इन लक्षणों से क्रिया का जनक न होने पर भी 'घटं ज्ञास्यति' इत्यादि स्थल में कर्म्मत्व का व्यवहार होता है। क्रिया के जनक होने से नहीं होता ॥७६॥ प्रश्न—और वह कर्म्मत्व क्या है जो स्व का कर्म्मत्व स्व में विरुद्ध है ? निर्वचनकर्त्ता— अन्य में विद्यमान क्रिया के फल से युक्त कर्म्म है। खण्डनकर्त्ता—'वृक्षात् पर्णं पतति' यहाँ पर्णनिष्ठ पतन रूप क्रिया के विभाग रूप फल से युक्त वृक्ष रूप अपादान में कर्म्म के लक्षण की अति-व्याप्ति होजायगी। निर्वचन—अपादान कर्म्म भी है। खण्डन—जैसे 'वृक्षात्पतति' प्रयोग होता है, वैसे ही 'वृक्षं पतति' प्रयोग हो जायगा। निर्वचन—कारक वक्ता की इच्छा से होते हैं, यहाँ वक्ता की कर्म्मत्व की इच्छा न होने से द्वितीया नहीं होती है। खण्डन—यदि वस्तुतः अपादान कर्म्म है तब जिस काल में कर्म्मत्व रूप से कहने की इच्छा होगी उस काल में 'वृक्षम्पतति' ऐसा प्रयोग भी होजायगा।

निर्वचन—अपादान की कर्म्मत्व-रूप से विवक्षा नहीं होती है, ऐसा वैयाकरणों का सम्प्रदाय है। खण्डन—जिस में कर्म्म का कोई भी व्यवहार नहीं होता है, उस में स्वकल्पित लक्षण के अनुरोध से कर्म्मत्व को मानने वाले आप वस्तु मात्र कर्म्म है-ऐसी ही लक्षण की कल्पना क्यों न करें ? जब कोई दोष दे तो वैयाकरणों के सम्प्रदाय का आश्रयण कीजिये। किञ्च-जिसमें कर्म्मत्व-कृत कोई भी व्यवहार नहीं होता है; उस अपादान में कर्म्मत्व को लोक से उत्तर (अधिक) बुद्धि वाले आपने कैसे जाना? अर्थात् वृद्धों का जब अपादान में कर्म्मत्व व्यवहार नहीं होता है, तब उसको कर्म्म मानना ठीक नहीं है। निर्वचन—अपादान से इतर जो पर में समवेत क्रिया के फल का आश्रय, वह कर्म्म है-इस निवेश में कुछ दोष नहीं है। खण्डन—इसमें भी 'नदी वर्द्धते' इसस्थल में नदी की वृद्धि रूप क्रिया का जो फल-अप्राप्त तीर भाग में

अपादानेतरदिति स्थाने क्रियानाशकेति करणेऽप्यस्य दोषस्य तादवस्थ्यात्। विनाशलक्षणायां 'वृद्धौ तदसम्भवाच्च। वृक्षं त्यजतीत्यादवकर्म्मत्वप्रसङ्गाच्च। आत्मानं जानामीत्यत्र परत्वाभावादव्याप्तेः। तत्राप्युपाधिभेदात्परत्वम्, कर्त्तृत्वभोक्तृत्वाद्युपहितस्यैवात्मनोऽङ्गीकृत्वाभ्युपगमात् इति चेन्न; यतोऽस्तु तावद्द यथाकथंचिदेवं, तथाप्यध्यात्मविदो निरुपाधिमात्मानं जानतो ज्ञानं नात्मकर्म्मकं स्यात्। पच्यते फलं स्वयमेवेत्यादौकर्मकर्त्तरि का गतिः स्यात्? सर्वज्ञमीश्वरं मन्यमानेन च नित्यज्ञाने तस्मिन् भगवति फलनाशकत्वस्यानभ्युपगमाच्चम्यत्येतल्लक्षणाऽसिद्धेः। तस्माद्द व्याकरणकारैः शब्दसिद्ध्यर्थं नदीवृद्ध्यादिवत् कर्म्मापि परिभाषितमिति अलं तदनुगतलक्षणगवेषणया। करणव्यापारविषयः कर्म इति चेन्न, हस्तेन रामेण शरेण इत्यादावतिप्रसङ्गात्। लक्षणं विनापि क्रियाजनकत्वे सति व्यापा-

---

प्राप्ति–उस का आश्रय होने से तीर को कर्म्मत्व हो जायगा। निर्वचन—क्रिया का नाशक जो पर समवेत क्रिया का फल, उसका भागी कर्म्म है; और वृक्षनिष्ठ विभाग क्रिया का नाशक नहीं है; किन्तु अधः संयोग ही पतन रूप क्रिया का नाशक है, अतः दोष ('वृक्षं पतति' ऐसा प्रयोग) नहीं है। खण्डन—इस लक्षण में भी 'नदी वर्द्धते' इसी स्थल में ही दोष है। क्योंकि नीर-(जल) तीर संयोग रूप फल वृद्धि रूप क्रिया का नाशक है, अतः तद्-भागी (आश्रय) होने से तीर कर्म्म हो जायगा। किञ्च–जहाँ नाश रूप वृद्धि है, वहाँ असम्भव हो जायगा; अर्थात् जहाँ 'वृध' धातु का छेदन अर्थ है, वहाँ ('वृक्षं वर्द्धते वर्धकिः' यहां) नाश रूप फल क्रिया का अ-नाशक है, अतः वृक्ष को कर्म्मत्व नहीं होगा। किञ्च–'वृक्षं त्यजति' यहां विभाग रूप फल क्रिया का नाशक नहीं है, अतः वृक्ष में कर्म्मत्व नहीं होगा। और 'आत्मानं जानाति' यहां पर (इतर) के न होने से कर्म्मत्व नहीं होगा। निर्वचन—शरीर-इन्द्रिय से युक्त—स्थूल शरीर युक्त—आत्मा कर्त्ता है, और कर्तृत्वादिविशिष्ट—सूक्ष्मशरीर-युक्त—आत्मा कर्म्म है, इस रीति से औपाधिक भेद के होने से दोष नहीं होगा। खण्डन—यद्यपि उपाधि भिन्न २ हैं, तब भी उपहित (उपाधि वाला) आत्मा एक ही है; इससे कर्त्ता-कर्म्म दोनों में भेद दुर्लभ ही है। किञ्च (और) जो अध्यात्मविद् हैं (निरुपाधि आत्मतत्त्व को जानते हैं) उनके अभिप्राय से ज्ञान का 'आत्मानं' कर्म्म नहीं होगा। किञ्च—'पच्यते फलं स्वयमेव' इस प्रयोग में जहाँ कर्म्म की कर्तृत्व रूप से विवक्षा है (अर्थात् कर्म को ही कर्त्ता मान लिया है) वहाँ पर 'पर' के न होने से फल में कर्म्मत्व नहीं बनेगा।

किञ्च—(और) जो ईश्वर को सर्वज्ञ मानते हैं, उनके मत में ईश्वर का ज्ञान नित्य है, फल नाश्य नहीं है, अतः 'ईश्वरः सर्वंजानाति' इस स्थल में 'सर्व' को कर्म्मत्व नहीं होगा। कर्म्म का निर्दुष्ट लक्षण नहीं हो सकता है, अतः वैयाकरणों ने नदी-वृद्धि आदि के तुल्य कर्म्म की भी शब्द-सिद्ध्यर्थ केवल परिभाषा (संकेत) की है। ऐसा ही मानना उचित है। अतः कर्म्म के अनुगत लक्षण का अन्वेषण व्यर्थ है। निर्वचन— करण के व्यापार का विषय कर्म्म है। खण्डन—'हस्तेन रामेण शरेण वाली हतः' इस जगह में हस्त-रूप करण के व्यापार का विषय होने से शर कर्म्म हो जायगा। किञ्च—लक्षण के विना भी, क्रियाजनक होकर व्यापार का उद्देश्यत्व-रूप अनुगत (सब कर्मों में रहने वाला) धर्म से कर्म्म का व्यवहार होगा। शेष 'ईश्वराभिसन्धि' ग्रन्थ

टी० १ वर्ध छेदने चुरादि का धातु है। वहाँ 'वृध' इस पाठान्तर के अनुसार यह ग्रन्थ है।

रोद्देश्यत्वेन कर्म्मव्यवहारोपपत्तेः। शेषश्चेश्वराभिसन्धौ स्वप्रकाशवादे निर्वक्ष्यामः ॥७७॥ ननु चाऽभेदे विषयविषयिभावस्यैवासंगतत्वम्, विषयित्वं हि विषयसम्बन्धिता,स स्वन्धश्च भेदमन्तरेणासम्भवदवस्थितिः, सम्बन्धमितेः सम्बन्धिस्वरूपभेदमितिव्यतिरेके वैपरीत्यावधारणात् ॥७८॥ मैवम् । विषयविषयिभावसम्बन्धो हि न सम्बन्धिस्वरूपाद्भिन्नः तथाभूतत्वेऽपि चान्ततः तत्सम्बन्धस्यापि स्वाश्रयात्मकत्वमभ्युपगम्यम्, अनवस्थाभयात् । तथासति च सैव यथा सम्बन्धमितिः सम्बन्धस्वरूपात् सम्बन्धिनोर्भेदमनादायैव पर्य्यवस्यतीत्यभ्युपगन्तव्यम् । स्वभावसम्बन्धस्येतरसम्बन्धमर्य्यादातिशायित्वात् । तथा विनापि सम्बन्धिभेदं विषयविषयिभावात्माऽयं सम्बन्धः पर्य्यवसास्यति, तदवगमोपि तथावगमव्यतिरेकेणैव भविष्यति को विरोधः ? ॥७९॥ नचैवं घट-तज्ज्ञानयोर्यादृग्विषयविषयिभावः ततोमात्रयाऽपि स्वप्रकाशे विषयविषयिभावान्यत्वे बाध्यतैकत्र स्यात्। अस्त्येव ह्यविद्याविद्यमाने घट-तज्ज्ञाने बाध्यत्वम्, परमार्थसति तु स्वप्रकाशे पारमार्थिकत्वमिति द्वयोरननुगमेऽपि न दोषः ॥८०॥ अथवा स्वात्मना सह क्रियाकर्म्मभावो विषयविषयिभावो वा स्वप्रकाशार्थ इति नाभ्युपेयमेव, यथा तु भवतां सत्तासम्बन्धादित-

के स्वप्रकाश प्रकरण में कहेंगे ॥७७॥ शंका—अभेद में विषय-विषयि-भाव असङ्गत है, क्योंकि विषयित्व विषय की सम्बन्धिता है, और सम्बन्ध की स्थिति सम्बन्धियों के भेद के बिना हो नहीं सकती है । क्योंकि जहाँ जहाँ सम्बन्धी के भेद की प्रमा है, वहाँ ही सम्बन्ध की प्रमा होती है, और स्व-प्रकाश ज्ञान स्थल में सम्बन्धी के भेद की प्रमा नहीं है; अतः विषय-विषयि-भाव भी नहीं होगा ॥७८॥

समाधान—विषय-विषयि-भाव रूप सम्बन्ध सम्बन्धी के स्वरूप से भिन्न नहीं है । यदि उसको सम्बन्धी के रूप से भिन्न भी मानें, तब भी अन्त में उसके सम्बन्धको अवश्यमेव सम्बन्धी-स्वरूप मानना पड़ेगा। यदि उसे सम्बन्धी-स्वरूप न मानें, तो सम्बन्ध का सम्बन्ध, फिर उसका सम्बन्ध, इस प्रकार से अनवस्था हो जायगी। ऐसा होनेपर जैसे विषय-विषयि-भाव-रूप सम्बन्ध की बुद्धि सम्बन्धी के भेद के ज्ञान के बिना होती हैं। क्योंकि स्वरूप सम्बन्ध का स्वभाव इतर सम्बन्ध के स्वभाव से भिन्न होता है, वैसे ही विषय-विषयि-भाव रूप यह सम्बन्ध सम्बन्धी के भेद के बिना ही सिद्ध होगा, और उसका ज्ञान भी सम्बन्धी के भेद के ज्ञान के बिना ही होगा, इसमें विरोध क्या है ? ॥७९॥ प्रश्न—घट और उसका ज्ञान इन दोनों का जैसा विषय-विषयि-भाव होता है, यदि उससे थोड़ा भी स्वप्रकाश ज्ञान के विषय-विषयि-भाव में भेद हो, तो एकस्थल में वह अवश्य बाध्य होगा। उत्तर—अविद्या से कल्पित और घट तद्-(घट) ज्ञान के बाधित होने से उसका सम्बन्ध विषय-विषयि-भाव भी बाधित ही है; और परमार्थ में जो सत् स्वप्रकाश उस में वह (संबन्ध) परमार्थ-सत् है, उन दोनों में अनुगत एक रूप के न होने पर भी कोई हानि नहीं है ॥ ८० ॥ अथवा स्व के साथ क्रिया-कर्म्म

१ यहाँ भविष्यत्कालिक प्रयोग कर आगे 'अवोचाम च जल्पे' इत्यादि भूतकालिक प्रयोग किया है । इससे संदेह होता है—कि ग्रन्थकार ने प्रथम 'ईश्वराभिसन्धि' का निर्माण कर 'खण्डन' का निर्माण किया है ? अथवा 'खण्डन' का निर्म्माण कर 'ईश्वराभिसन्धि' का निर्माण किया है ? अथवा दोनों का निर्माण एक काल में हुआ है ? परन्तु मेरे विचार में तो दोनों का निर्माण एक साथ ही हुआ है ।

त्र सद्व्यवहारव्यवस्था, सत्ता तु स्वयमेवसद्रूपा, नचैतावता स्वात्माश्रयता तस्याः, तथा ज्ञानमपि स्वतएव सिद्धस्वरूपम् ॥८१॥ अथवा यथा बहुव्रीहिसमासे तद्गुणसंविज्ञाने गुणमादायैव प्रधानस्यान्यपदार्थस्य बहुव्रीहिसिद्धपदप्रतिपाद्यता, तथा विज्ञानस्याऽविषयमपि स्वात्मानमादायैव स्वविषयव्यवहारप्रवर्त्तनं समर्थ्यताम् ।

सोयं गुरूणां सविषयकस्वप्रकाशतापक्षो न ब्रह्मस्वप्रकाशतापक्षः । तत्र विषयाभावात् । एतावन्मात्रेण तु स्यात्, यथा स्वाविषयेपि कुटादौ बहुव्रीहिवाक्यं व्यवहारं प्रवर्त्तयति इति, तथा ज्ञानमविषयेऽप्यात्मनि अविद्यादशायामिति ॥८२॥

तदेवं यद्व यदन्यत्र दृष्टवैधर्म्यं स्वप्रकाशे पर्य्यवसास्यति, तत्सर्वमन्यथानुपपत्तिरेव स्वप्रकाशसाधकतया प्रदर्शिता स्वीकारयिष्यति । तद्व यथा—अन्यो ज्ञाताऽन्यश्च ज्ञेय इत्यन्यत्र दृष्टमहमितिव्यवहारान्यथानुपपत्या त्याज्यम् । तथा अन्यज् ज्ञानमन्यज् ज्ञेयमिति—जानामीतिव्यवहारान्यथानुपपत्या त्याज्यम् । सर्वतोबलवती ह्यन्यथानुपपत्तिः तथादृष्टतामात्रबलमवलम्ब्य प्रवृत्तं तर्कशतमपि बाधते । तदिदमाहुः—'प्रमाणवन्त्यदृष्टानि कल्प्यानि 'सुबहून्यपि'-इति ॥८३॥ तस्मात्—

भाव या विषय-विषयि-भाव स्वप्रकाश शब्द का अर्थ नहीं मानना चाहिये । किन्तु जैसे आप के मत में सत्ता के सम्बन्ध से द्रव्यादि में सत् व्यवहार होता है, और सत्ता स्वयं सद्रूप है, अतः सत्ता में आत्माश्रय दोष भी नहीं होता है, ऐसे ही ज्ञान-स्वविषय (घटादि) और स्व (ज्ञान) दोनों का साधक है ॥ ८१ ॥ अथवा जैसे तद्गुण-संविज्ञान बहुव्रीहिसमास में गुण (समास के अन्तर्गत पद का अर्थ) का ग्रहण कर के ही प्रधान (अन्य पदार्थ) कुटादि पद का वाच्य है, ऐसे ही विज्ञान भी—स्व के अविषय अपने आत्मा को ग्रहण करके ही—स्व विषय में व्यवहार की प्रवृत्ति कराता है ।

यह—गुरु (प्रभाकर) का सत्य विषय से युक्त विज्ञान-स्व-प्रकाशता पक्ष है । ब्रह्म-स्वप्रकाशतापक्ष नहीं है, क्योंकि उस पक्ष में विषय असत् होता है । केवल इतना साम्य है, कि जैसे 'लम्बकर्ण' और 'कुटादि' पद स्व के अवाच्य कर्ण-कुट आदि में व्यवहार का प्रवर्त्तक है । ऐसे ही ज्ञान, स्व के अविषय अपने आत्मा (स्वरूप) में व्यवहार का अविद्या-दशा में प्रवर्त्तक है, ॥८२॥ जैसे "अहं" इस व्यवहार की अन्यथाऽनुपपत्ति से घटादि व्यवहार में दृष्ट—"ज्ञाता अन्य होता है" और "ज्ञेय अन्य होता है"—यह नियम त्यागा जाता है, और "जानामि" इस व्यवहार की अन्यथा—अनुपपत्ति से 'ज्ञान अन्य होता है—ज्ञेय अन्य होता है' यह नियम त्यागा जाता है। ऐसे ही स्वप्रकाश के साधन में प्रदर्शित अन्यथा-अनुपपत्ति ही—जिस जिस का अभाव घटादि-व्यवहार में देखा गया है, और स्वप्रकाश में भाव देखा गया है—उन सबों (अभेद में किया-कर्म भाव विषय-विषयि-भाव आदि) का स्वीकार करावेगी। अन्यथाऽनुपपत्ति (अर्थापत्ति) सब प्रमाणों से बलवती है, अतः अर्थापत्ति—लोक में ऐसा ही देखा गया है, इस बल का केवल अवलम्बन कर प्राप्त तर्क शत को भी—बाध कर सकती है । किसी आचार्य्य ने कहा भी है,—कि "लोक में अदृष्ट भी बहुत सी वस्तुओं का स्वीकार प्रमाण के होने पर किया जाता है ।" ॥८३॥

१ 'अदृष्टशतभागोपि न कल्प्यो निष्प्रमाणकः' इति अस्योत्तरार्द्धम् ।

"अन्यथानुपपत्तिश्चेदस्ति वस्तुप्रसाधिका । पिनष्टि दृष्टवैषम्यं सैव सर्वबलाधिका" ॥६॥

वाच्याऽन्यथोपपत्ति र्वा त्याज्यो वा दृष्टताग्रहः । नह्येकत्र समावेशः, छायातपवदेतयोः ॥७॥ इति ॥८४॥

तदित्थं त्वदङ्गीकृतसद्विचारलक्षणोपपन्नैरेवंविधैर्विचारैः स्वप्रकाशता भवता सुप्रतिपदा, अस्माभिस्तु स्वसंवेदनबलादेव स्वतः सिद्धस्वरूपं विज्ञानमास्थीयत इति ॥८५॥ (इति स्वप्रकाश-विज्ञान-विचारः)

अथ शून्यवाद-स्वप्रकाशवादयोर्भेदः ।

एवं च सति सौगतब्रह्मवादिनोरयं विशेषः यदादिमः सर्वमेवानिर्वचनीयं वर्णयति, तदुक्तं भगवतालङ्कावतारे "बुद्ध्या विविच्यमानानां स्वभावो नावधार्य्यते । अतो निरभिलप्यास्ते निःस्वभावाश्च देशिताः"—इति विज्ञानव्यतिरिक्तं पुनरिदं विश्वं सदसद्भ्यां विलक्षणं ब्रह्मवादिनः संगिरन्ते, तथाहि नेदं सत् भवितुमर्हति वक्ष्यमाणदूषणग्रस्तत्वात् । नाप्यसदेव, तथासति लौकिकविचारकाणां सर्वव्यवहारव्याहत्यापत्तेः, ॥८६॥ यदपि निर्वक्तुमसामर्थ्यें गुरव उपास्यन्ताम् येभ्यो निरुक्तयः शिक्ष्यन्ते—इत्यु-

---

अर्थापत्ति पदार्थ का, साधक यदि है मान; वे ही दृष्टि-विरोध का चूर्ण करेंगी मान ॥६॥

उपपत्ति हि तू अन्यथा, करो या छोड़ो दृष्टि । एक जगह कस होयगी, छाया तप की सृष्टि ॥ ७ ॥ ८४ ॥

इस रीति से आप के द्वारा अङ्गीकृत सद्विचार (कथा) के लक्षण से युक्त विचार द्वारा आपको ज्ञान की स्वप्रकाशता जाननी चाहिये । हम तो अपने अनुभव से स्वतः सिद्ध ब्रह्म रूप विज्ञान को प्राप्त हैं ॥८५॥ इति स्वप्रकाश-विज्ञान-विचार ।

अथ शून्यवाद और विज्ञान वाद का भेद ।

ऐसा होने पर बौद्ध और वेदान्तियों में यह भेद है—कि बौद्ध तो सब वस्तुओं को ही अनिर्वचनीय कहते हैं । देखिये 'अलङ्कारावतार' नामक ग्रन्थ में भगवान् बुद्ध के शिष्यों ने कहा है कि—"बुद्धि से विचारने पर वस्तु के स्वभाव निश्चित नहीं होते हैं । अतः सम्पूर्ण वस्तु स्वभाव से रहित और अनिर्वचनीय हैं" । और विज्ञान से भिन्न सब वस्तु सत्-असत् से विलक्षण हैं, यह ब्रह्मवादी कहते हैं । देखिये यह प्रपञ्च सत् नहीं है, क्योंकि वस्तु की सिद्धि लक्षण से होती है, और लक्षण वक्ष्यमाण दूषणों से दूषित हैं । तथा असत् भी नहीं हैं, क्योंकि लौकिक तथा परीक्षक के व्यवहार के विषय होते हैं ॥८६॥ प्रश्न—यदि निरुक्ति

१ बौद्धों के चार भेद हैं—माध्यमिक, योगाचार, सौत्रान्तिक, वैभाषिक । इनमें प्रथम शून्यवादी, द्वितीय क्षणिक विज्ञान-वादी, तृतीय क्षणिक विज्ञान से अनुमेय क्षणिक बाह्य पदार्थ-वादी, चतुर्थ क्षणिक-विज्ञान से अभिन्न क्षणिक बाह्य पदार्थ-वादी हैं । यहाँ शून्यवादी और वेदान्तियों का भेद दिखाया है ।

२ अलंकारावतारे इति पाठः—इति विद्यासागरः, पुस्तकस्यानुपलम्भात् क सुपाठः इति निर्णेतुमशक्यते ।

पालम्भवचनम्, तत्तदा शोभेत, यदि मेयस्वभावानुगामिनीयमनिर्वचनीयतेति न ब्रूयुः, वक्तृदोषादिति च वदेयुः। यस्तु वादी निरुक्त्यभिमानं धत्ते, स निर्वक्तुं न तु शक्नोति वक्तव्यदोषात् ॥८७॥

नच ते दोषाः स्वकमपि घ्नन्तः जातयः कथं न स्युरिति वाच्यम्, यतो निर्वचनीयत्वं बाध्यते तै र्दोषैः स्वयमप्यनिर्वचनीयैरेव। अनिर्वचनीयैरेव च तै र्व्यवहियत एवेति कुतोऽस्मान् प्रति व्याघातः स्यात्। तज्जातित्वस्य च निरुच्य योजयितुमशक्यत्वात् ॥ ८८ ॥ ननु सदसत्पक्षयोर्दोषदर्शनादनिर्वचनीयतेतिब्रुवाणस्य किं सदसत्त्वसंशयः? किम्वा सदसत्त्व-पक्षबहिर्भावाभ्युपगमः? आद्ये भवितव्यं तावत्सदसत्त्वयोरन्यतरेणेत्येकपक्षदोषस्याभासत्वं, तत्र सत्त्वपक्षदोषस्यैवाभ्युपेयमावश्यकत्वात्, यदि तावत्सत्त्वपक्षः तदा सत्त्वपक्ष-दोषः कथं संगच्छेत? अथाऽसत्त्वपक्षः तदा सर्वासत्त्वे तद्दोषः कथं सद्भाववान् भवितुं प्रभवेत्? द्वितीयस्तु व्याघातादेवासम्भवी। 'परस्परविरोधे हि न प्रकारान्तरस्थितिरिति' ॥८९॥ तदेतदनाकलितपराभिसन्धेः प्रत्यवस्थानम्। यो हि सर्वमनिर्वचनीयसद-

(लक्षण) नहा कर सकते हैं, तो उन गुरुओं की सेवा कीजिये, जिनसे निरुक्ति की शिक्षा मिलती है। उत्तर—यह निन्दा गर्भ प्रश्न तब शोभा देता, यदि आप मेय के स्वभाव को ही अनिर्वचनीय न कह कर वक्ता के दोष से अनिर्वचनीय है—ऐसा कहते, जो वादी निरुक्ति (लक्षण) करने का अभिमान करते हैं, वे भी निरुक्ति को वक्तव्य (मेय) के दोष से नहीं कर सकते हैं ॥८७॥

प्रश्न—वे अव्याप्ति-अतिव्याप्ति आदि जैसे प्रमाण-प्रमेय आदि के लक्षणों को दूषित करते हैं, वैसे ही स्व-लक्षणों को भी दूषित करते हैं। अतः प्रमाण आदि के लक्षण का खण्डन जाति है। स्वव्याघातक (अपने स्वरूप को नष्ट करने वाले) असत् उत्तर को जाति कहते हैं। उत्तर—अव्याप्ति आदि भी—स्व-लक्षण में अव्याप्ति आदि दोष के होने से—सत्-असत् से विलक्षण अनिर्वचनीय अवश्य हैं। किन्तु अनिर्वचनीय दोषों से ही लक्षणों के खण्डन द्वारा जगत् की अनिर्वचनीयता बोधित होती है। क्योंकि आप तो अनिर्वचनीय अव्याप्त्यादि दोषों से भी व्यवहार करते ही हैं। फिर मेरे कथन में व्याघात कैसे हो सकता है? किञ्च—जाति की निरुक्ति (लक्षण) भी आप नहीं कर सकते हैं, अतः जाति भी असत् है। फिर मेरे कथन में आप 'जाति' कैसे दे सकते हैं? ॥ ८८ ॥ प्रश्न—सत्-असत् दोनों पक्ष में दोष है—इस युक्ति से अनिर्वचनीय कहने वाले आप को सत्-असत्-विषयक सन्देह है? या तृतीय पक्ष का स्वीकार है? यदि सन्देह है, तो सत्त्व असत्त्व दोनों में एक अवश्य सिद्ध होगा, और एक पक्ष के दोष को आभास कहना पड़ेगा। सत्त्व पक्ष के दोषों को ही आवश्यक होने से आभास कहा जायगा। क्योंकि यदि सत्त्व पक्ष है, तब तो सत्त्व पक्ष के दोष आभास हैं ही। और यदि असत्त्व पक्ष है, तब भी सब के असत् होने से सत्त्व पक्ष के दोष भी असत् हैं। सत्-असत् से विलक्षण तृतीय पक्ष का आश्रयण तो व्याघात होने से असंगत है। सत्त्व-असत्त्व दोनों आपस में विरुद्ध हैं। अतः इनसे भिन्न तृतीय पक्ष नहीं है। क्योंकि जो सत् नहीं है, वह अवश्य असत् है, और जो असत् नहीं है, वह सत् है ॥८९॥ उत्तर—इस २ दोष से सत्-पक्ष का दोष आभास है, इस प्रकार से साफ साफ जब तक दोष न दें, तब तक सत्त्व-पक्ष का स्थापन या अनिर्वचनीयत्व का खण्डन नहीं हो सकता है। और

सत्त्वं ब्रूते, स कथमनिर्वचनीयतासत्त्वव्यवस्थितौ पर्य्यनुयुज्येत, साऽपि हि कृत्स्नप्रपञ्चपरसर्वशब्दाभिधेयमध्यनिविष्टैव। परस्यैव व्यवस्थया एवं पर्य्यवस्यति–निर्वचनप्रतिक्षेपादनिर्वचनीयत्वं, विधिनिषेधयोरेकतरनिरासस्येतरपर्य्यवसायितायास्तेनाभ्युपगमात्। ततः परकीयरीत्येदमुच्यते—अनिर्वचनीयत्वं विश्वस्य पर्य्यवस्यतीति। वस्तुतस्तु वयं सर्वप्रपञ्चसत्त्वासत्त्वव्यवस्थापनविनिवृत्ताः स्वतः सिद्धे चिदात्मनि ब्रह्मतत्त्वे केवले भरमवलम्ब्य चरितार्थाः सुखमास्महे। ये तु स्वपरिकल्पितसाधनदूषणव्यवस्थया विचारमवतार्य्य तत्त्वं निर्णेतुमिच्छन्ति, तान् प्रतिब्रूमः—न साध्वीयं भवतां विचार-व्यवस्था, भवत्कल्पितव्यवस्थयैव व्याहतत्वात्॥६०॥ अतएवास्मदुपन्यस्यमानदूषणस्थितिविषयाः पर्य्यनुयोगा निरवकाशाः, त्वद्व्यवस्थयैव त्वद्व्यवस्थाया व्याहत्युपन्यासात्। नचोपन्यास एव निर्बन्धकारणम्, 'विचारोपन्यासस्य सदसत्त्वोपगमाद्युदासीनैर्विचार्य्यमित्युपेत्यैव परं विचारप्रवर्त्तनायाश्शक्यत्वमित्यावेदितत्वात्॥६१॥ यदि तु विचारस्य सत्त्वमनभ्युपेत्य

यदि अनिर्वचनीयत्व का खण्डन भी हो तो हानि क्या है, जो सम्पूर्ण जगत् को अनिर्वचनीय कहता है, वह अनिर्वचनीयत्व को भी अनिर्वचनीय ही कहेगा, क्योंकि जगत् के मध्य में अनिर्वचनीयत्व भी आ गया है।

प्रश्न—आप यदि अनिर्वचनीयत्व का साधन न करेंगे, तो वह सिद्ध कैसे होगा?

उत्तर—पर की व्यवस्था के अनुरोध से इस प्रकार निर्वचनीयत्व (लक्षण) के खण्डन से अनिर्वचनीयत्व सिद्ध होता है। क्योंकि विधि या निषेध इन दोनों में से एक के खण्डन से अन्य की सिद्धि अर्थात् फलित होती है, इसको पर भी मानते हैं। अतः संसार अनिर्वचनीय है, यह कथन भी दूसरों की रीति से है; यथार्थ में हम तो सारे संसार के सत्त्व, असत्त्व के साधन से निवृत्त होकर स्वतः सिद्ध चिद्रूप केवल ब्रह्मतत्त्व का निश्चय पाकर कृतकृत्य हो कर सुख से स्थित हैं। जो परीक्षक स्वकल्पित साधन और दूषण की व्यवस्था से कथा के आरम्भ की इच्छा करते हैं, उनसे हम कहते हैं, कि यह आप की व्यवस्था ठीक नहीं है, क्योंकि आप के कल्पित दूषणों से ही खण्डित है। ॥६०॥ प्रश्न—अव्याप्ति आदि दोषों के लक्षणों में दोष के होने से वे अनिर्वचनीय हैं कि नहीं? यदि अनिर्वचनीय हैं, तो उन दोषों से प्रमाण-प्रमेय के लक्षण दूषित कैसे होंगे? और यदि अनिर्वचनीय नहीं है, तो उन दोषों से ही द्वैत हुआ।

उत्तर—हम उन दोषों को भी अनिर्वचनीय ही मानते हैं, अतः द्वैत नहीं है। और आप उन दोषों को मानते हैं। अतः आप के मत के अनुसार उन दोषों से प्रमाण-प्रमेय के लक्षणों का खण्डन करते हैं। प्रश्न—दोषों और कथा के स्वीकार के बिना दोषों का कथन नहीं हो सकता है, क्योंकि कथा में स्वीकृत ही का कथन होता है, अतः दोषों का उपन्यास (कथन) ही उनके स्वीकार का हेतु होगा। उत्तर—विचार (कथा) और दोषों के सत्त्व असत्त्व के स्वीकार में उदासीन होकर ही विचार करना चाहिये इस बात को मान कर ही विचार की प्रवृत्ति हो सकती है। इस बात का निवेदन कर चुके हैं॥ ६१ ॥ यदि कहें कि विचार के सत्त्व को न मान कर विचार नहीं हो सकता है, तब प्रमाण की प्रवृत्ति के बिना विचार के सत्त्व का स्वी-

---

१ विचारस्येति सुपाठः विचारोपन्यासस्येति कुपाठः, अनन्वयात्। विचारस्येत्यस्य निर्बन्धेऽन्वयः निर्बन्धः = स्वीकारः। उपन्यास इत्यस्याग्रे दोषाणामिति शेषः। विचारं विना दोषोपन्यासानुपपत्तेरिति।

न विचारयितुं शक्यमित्युच्यते, तदा प्रमाणमव्यापार्य्य न तदीयसत्त्वाभ्युपगमोपि शक्यतेऽतिप्रसङ्गादिति विचारस्य विचार्य्यग्रहणेऽनवस्थया विचारारम्भ एवाशक्यः स्यात् ॥६२॥

नच पूर्वपूर्वसिद्धत्वाद्व विचारे विचारान्तरमिदानीमगवेषणीयम् । विचारस्य पूर्वसिद्धत्वे विचार्य्यरूपस्वविषयव्यवस्थितत्वात् तस्य, विचार्य्यमपि पूर्वमेव विचारितमित्यनारम्भ एव विचारस्य । अथ विचार्य्यविशेषस्य पूर्वमसिद्धत्वात्तदर्थं विचारारम्भः, तर्हि विचारविशेषस्यापि तद्विषयकस्य पूर्वमसिद्धिरेवेति वृथा शुष्कचर्वणम् ॥६३॥ यदि च त्वद्दर्शनरीत्याऽभिधीयमानम् अस्माभिर्बाधं बाधसे, तदा स्वाभ्युपगमरीतिबाधाऽभिधायितैव ते स्यात् । अस्माभिर्निर्वाह्यमानस्य त्वया खण्डनयुक्त्यैव बाधेऽस्माकमेव जेतृता, 'खण्डनयुक्तयो बाधिकाः, निर्वाह्यपक्षश्च बाध्य'-इत्यस्यास्मदुक्तपक्षस्य त्वयैव निर्वाहात् । तस्मात् त्वया निर्वाह्यमस्माभिश्चखण्डनीयमितीदृश्यामेव परं कथायां त्वन्निर्वाह्यनिर्वाहे तव जयो नान्यथेति ॥६४॥ तदेवं भेदप्रपञ्चोऽनिर्वचनीयः, ब्रह्मैवतु परमार्थसदद्वितीयमिति स्थितम् ॥६५॥ (इति बौद्ध-वेदान्ति-भेदविचारः)

साक्षाद्धीः स्वरूपधीः स्वेन रूपेण वस्तुनो भानमिति चेन्न। अनुमानादिव्याप-नात्। अनुमानादौ लिङ्गाद्यपेक्षत्वात्तदवच्छिन्नकालसम्बद्धबोधत्वं न लध्यक्ष इति चेन्न। व्यभिचारात्। यत्र लिङ्गादि भाव्यादिबोधकं तत्र तत्कालताव्यभिचारात्। एतेन यदि न लिङ्गकालावच्छिन्नव्यापकप्रतिभासोऽनुमा तदाकूटव्याप्यानुमितस्य व्यापकस्य दैवव-शात् सत्यव्याप्यव्यक्त्यन्तरवतः प्राप्तौ व्याप्तिकालावच्छिन्नव्यापकप्राप्त्या तावत्यंशे प्रमा-त्वं प्रमाविशेषान्तर्भावानिर्वाह्यमापद्येतेति निरस्तम्। भूतादिव्यापकानुमाने व्याप्यकाल-त्वासम्भवात्। तथापि चाग्न्यादिमदंशमात्रे प्रमात्वापातदुष्परिहरत्वस्योक्तत्वात् ॥६७॥

समर्थन—स्वरूप का ज्ञान अर्थात् जो धर्म्म जिसमें हो उस धर्म्म से विशिष्ट उस धर्म्मी का ज्ञान प्रत्यक्ष है।

खण्डन—अनुमति में भी जो धर्म्म जिसमें है उस धर्म्म से विशिष्ट ही धर्मीका उल्लेख होता है, अतः अनुमिति में अतिव्याप्ति हो जायगी।

समर्थन—लिङ्गादि काल से अनवच्छिन्न धर्मी की जो बुद्धि वह स्वरूप धी प्रत्यक्ष है और अनुमिति में लिङ्गकाल से अवच्छिन्न धर्मी भासता है, अतः अनुमिति में अतिव्याप्ति नहीं होगी।

खण्डन—जिस स्थल में विशिष्ट मेघोदय से भावी वृष्टि की अनुमिति करते हैं, उस स्थल में लिङ्गकाल से अनवच्छिन्न ही धर्म्मी भासता है, अतः उस अनुमिति में अति-व्याप्ति वैसी ही है। अनुमिति में साध्य के विशेषणत्वरूप से लिङ्गकाल से अवच्छिन्नत्व अवश्य भासता है। अन्यथा पर्वत में धूलीपटल में धूमभ्रम के अनन्तर जात–पर्वतो वह्नि मान्–यह ज्ञान प्रमा हो जायगा। उक्त ज्ञान प्रमाही है ऐसी इष्टापत्ति आप नहीं कर सकते; कारण कि स्वीकृत प्रमा में अन्तर्भाव न होने से उक्त ज्ञान को पञ्चमी प्रमा मानना पड़ेगा वह अनिष्ट है, यह किसी आचार्य्य का कथन भी खण्डित जानना चाहिये—कारण कि भूत भावी साध्यस्थलमें व्यभिचार होनेसे लिङ्गकाल से अवच्छिन्नत्व साध्य के विशेषणरूप से नहीं भासता है। किञ्च लिङ्गकाल से अवच्छिन्नत्व का अनुमिति में भान मानें तब भी विशिष्ट अंश में उक्त ज्ञान प्रमा न होगा, परन्तु वह्नि अंशमें प्रमात्व हो ही जायगा ॥६७॥

समर्थन—अनुपहित वस्तु का जो ज्ञान वह प्रत्यक्ष है।

खण्डन—विशेषण से उपहित विशेष्य के प्रत्यक्ष में अव्याप्ति हो जायगी।

समर्थन—कारण से उपहित जो न हो उसका ज्ञान प्रत्यक्ष है।

खण्डन—घट का कारण जो दण्ड उससे उपहित पुरुष का "दण्डी पुरुष" इत्याका-रक प्रत्यक्ष में अव्याप्ति हो जायगी।

समर्थन—स्वकारण से अनुपहित का जो ज्ञान वह प्रत्यक्ष है।

खण्डन—यह परिष्कार भी स्वपदरूपी सिंह की कुक्षि में निक्षिप्त है अर्थात् स्वपद के विवेश से ही खण्डित है, कारण कि स्वपद को यदि कारण व्यक्तिपरक मानें तो जिस धूम व्यक्ति को स्वशब्द से ग्रहण करेंगे, उससे अन्य धूम से उपहित वह्नि की अनुमिति में अति-व्याप्ति हो जायगी।

यदि स्वपद का कारणसामान्यपरक मानें तो अन्य के कारण दण्ड से उपहित पुरुषादि के प्रत्यक्ष में अव्याप्ति हो जायगी।

अनुपहितप्रतीतिः साक्षाद्धीरिति चेन्न। विशिष्टप्रविष्टविशेष्यप्रत्यक्षाव्यापनात्। करणानुपहितत्वं विवक्षितमिति चेन्न। परकरणोपहिताव्यापनात्। स्वकरणोपहितत्वस्य च स्वपदकुक्षिनिक्षिप्तत्वात्।

व्याप्त्याद्युपहितत्वादीनां व्यतिरेकस्य यत्र समुच्चयः सा धीः साक्षाद्धीरिति चेन्न। व्याप्त्यादिप्रत्यक्षाव्यापनात्। असिद्धत्वाच्च। पर्व्वतोऽग्निमानित्येव प्रतिज्ञानात्। शब्देन च स्वाप्रतिपादनात्। शाब्दादिमितेश्च प्रत्यक्षत्वापादनात्॥ ६८॥

अव्यवहितधीत्वं साक्षाद्धीत्वमिति चेन्न। व्यवधानविकल्पानुपपत्तेः। यदि द्रव्यविशेषान्तरावस्थितिर्व्यवधिः, तदानीमप्रत्यक्षविभुधियां साक्षात्त्वापत्तिः। अथ ज्ञापकज्ञानपूर्वसत्ता व्यवधानं तदा परत्वाद्यप्रत्यक्षतापत्तिरिति। विशिष्टवैशिष्ट्यं व्यवधानमिति चेन्न। धूमविशिष्टे वह्निवैशिष्ट्यमिति स्वरूपस्थितौ तथात्वे कार्य्यकारणभावविरोधः प्रतीतौ धूमवैशिष्ट्यस्य धर्मिविशेषणत्वे हेतोरंशतः स्ववृत्तिः। साध्यविशेषणत्वे व्याप्तिग्राहिप्रत्यक्षेऽप्यव्यवधानाभावात् न साक्षात्त्वं स्यात्॥ ६९॥

समर्थन—व्याप्त्यादि के उपहितत्व का अभाव जिस ज्ञान में हो वह प्रत्यक्ष है।

खण्डन—वह्निव्याप्यो धूमः इस व्याप्ति के प्रत्यक्ष में धूम के विशेषणरूप से व्याप्ति भासती है, अतः उसमें अव्याप्ति हो जायगी। किञ्च अनुमिति आदि में व्याप्ति आदिका भान नहीं होता है, कारण कि "पर्वतो वह्निमान्" इत्यकारक ही अनुमान में प्रतिज्ञावाक्य होता है—शब्दसे भी [शब्द से उपहित अर्थ का] बोध नहीं होता है—अतः अनुमिति में अतिव्याप्ति के निरासार्थ उक्त विशेषण व्यर्थ है और उक्त विशेषण न देने पर अनुमिति आदि में अतिव्याप्ति हो जायगी॥ ६८॥

समर्थन—इन्द्रियों से अव्यवहित वस्तु की धी साक्षात्धी (प्रत्यक्ष) है।

खण्डन—व्यवधान क्या वस्तु है इस बात की अनुपपत्ति होने से यह लक्षण भी अयुक्त है—देखिये यदि ज्ञेय और इन्द्रियोंके मध्यमें द्रव्य विशेष की स्थिति को व्यवधान कहें तो विभु (आकाशादि) की अनुमितिरूप बुद्धि में अतिव्याप्ति हो जायगी, कारण कि ज्ञेय (आकाशादि) और इन्द्रिय इन दोनों के मध्य में कोई द्रव्य नहीं है। यदि ज्ञापक (स्वजनक) जो ज्ञान उसकी (स्व की उत्पत्ति से पूर्वसत्ता को व्यवधान कहें तो ह्रस्वत्वादि तथा परत्वादि का ज्ञान भी प्रतियोगि ज्ञान से जन्य है, अतः ह्रस्वत्वादि ज्ञान में अव्याप्ति हो जायगी। यदि विशिष्टवैशिष्ट्य को व्यवधान कहें तो दण्डी पुरुष इस प्रत्यक्ष में अव्याप्ति हो जायगी। यदि हेतु धूम, आदि से विशिष्ट पर्वत में वह्नि आदि के वैशिष्ट्य को व्यवधान कहें तो यदि धूम विशिष्ट पर्वत में वह्नि का वैशिष्ट्य रहता है, ईदृश स्थिति में व्यवधान मानें तो कार्यकारण भाव में विरोध होगा। अर्थात् कारण होने से धूम से प्रथम ही वह्नि सिद्ध है, फिर धूम विशिष्ट में ही वह्नि वैशिष्ट्य रहता है, यह कैसे हो सकता है और यदि प्रतीति में धूमविशिष्ट में वह्निवैशिष्ट्य को व्यवधान कहें तो यदि धर्मी (पर्वत) में धूम वैशिष्ट्य को विशेषण मानें तो "धूमवान् पर्वतो वह्निमान धूमवत्त्वात्" ऐसा ज्ञान के आकार होने से अंशतः आत्माश्रय हो जायगा। कारण कि विशिष्टवृत्तिधर्म्म विशेषणवृत्ति भी होता है और यदि धूम वैशिष्ट्य के साध्य के विशेषणत्व को व्यवधान कहें तो "वह्निः धूमव्यापकः" इस व्याप्तिप्रत्यक्ष में अव्याप्ति हो जायगी॥ ६९॥

अथ ज्ञानस्य जातिभेदः कश्चित्साक्षात्त्वं, तत्रानुभवत्वेन परापरभावानुपपत्तिः स्मृतेरपि साक्षात्कारित्वादिति केचित्। तन्न। स्मृतेस्तथात्वानभ्युपगमात्। स्वप्नस्य तावत् स्मृतित्वासिद्धेः सिद्धौ वा तत्र साक्षात्त्वारोपोपगमात्। भावनाबलजस्य च क्वचिदालोकादिधर्मिकप्रियाद्याश्रयधर्मारोपत्वं शुक्तिरजतभ्रमवत् निमीलितनयनादेश्च स्वप्नवदेव गतिरवगन्तव्येति।

इदन्तु स्यात् परमाण्वादिबुद्धावनुव्यवस्यमानायां परमाणुप्रतीत्यंशेऽपि साक्षात्त्वमनुभूयत इत्यत्र न नः सम्प्रतिपत्तिः। अन्यथा लिङ्गबुद्धिलक्षणया प्रत्यसत्त्या वह्निरपि मानसप्रत्यक्ष एव न लैङ्गिक इति परेण सुवचत्वात्। एवं प्रत्यभिज्ञायां पूर्वदेशकालस्थितिमस्य पश्यामीति कस्यानुभवो यद्बलाऽत्तथाभ्युपेयं तस्मात्प्रतीति कलहोऽयम्॥७०॥

निर्वचन—ज्ञान का जातिविशेष, साक्षात्व है तथा वह साक्षात्त्व-जाति ही प्रत्यक्ष का लक्षण है—इस लक्षण में कोई आचार्य्य यह दोष देते हैं कि साक्षात्त्व स्मृति में होने से अनुभवत्व से अल्पदेश वृत्ति नहीं है तथा अनुमिति में न होने से अधिकदेशवृत्ति भी नहीं हैं अर्थात् स्मृति में साक्षात्त्व है और अनुभवत्व नहीं है ,एवं अनुमिति में अनुभवत्व है और साक्षात्त्व नहीं है, प्रत्यक्ष ज्ञान में दोनों हैं, अतः सङ्करदोष होने से साक्षात्त्वजाति नहीं है, परन्तु यह दोष युक्त नहीं है, कारण कि स्मृति में साक्षात्त्व है इसमें कुछ प्रमाण नहीं है, जाग्रत् में अनुभूत पदार्थ हो सँस्कार के बल से स्वप्नदशा में प्रतीत होता है, अतः स्वप्न स्मृति है यह कथन युक्त नहीं हैं, कारण कि कदाचित् अननुभूतस्वशिरःच्छेद आदि भी स्वप्न में भासते हैं, अतः स्वप्न स्मृति नहीं है, यदि स्वप्न को स्मृति मानें भी तो भो स्वप्न बाह्य इन्द्रियों से अजन्य होने से प्रत्यक्ष नहीं है, किन्तु स्वप्न में प्रत्यक्षत्व का आरोप मात्र होता है कामी मनुष्य को [जो भावना के बल से कामिनी की] प्रतीति होती है वह भी प्रत्यक्षायमाण अर्थात् प्रत्यक्षरूप स्मृति नहीं हैं, किन्तु शुक्ति में रजत की प्रतीति के तुल्य आलोक में प्रिया के मुखादि का भ्रम मात्र है। निमीलितनेत्रवाले मनुष्य को जो कदाचित् कुछ वस्तु की प्रतीति हो जाती है, वह भी स्वप्न के तुल्य स्मृति ही है, अतः स्मृति में प्रत्यक्षत्व के न होने से साङ्कर्य्य नहीं है।

खण्डन—द्व्यणुकं, स्वपरिमाणात् अणुतरपरिमाणाऽरब्धम्, कार्य्यद्रव्यत्वात्, पटवत्, इस अनुमिति के बाद "जात परमाणुमनुमिनोमि" इस अनुव्यवसाय में अनुमित्यंश में प्रत्यक्षत्व के तथा परमाण्वंश में परोक्षत्व के होने से साङ्कर्य्य है, अतः प्रत्यक्षत्व जाति नही है। यदि कहें कि परमाणु की अनुमिति, आत्मा में है और आत्मा मनः संयुक्त है, अतः ज्ञानलक्षणप्रत्यासंति होने से परमाण्वंश में भी उक्त अनुव्यवसाय प्रत्यक्षही है तो यह युक्त नहीं है, कारण कि ऐसा मानने पर वह्निसम्बद्ध धूम का ज्ञान आत्मा में समवेत है और आत्मा, मनः संयुक्त है, अतः ज्ञानलक्षणप्रत्यासत्ति ही होनेसे अनुमिति भी प्रत्यक्ष ही जायगी "किञ्च" सोऽयँदेवदत्तः इस प्रत्यभिज्ञान में तत्ता अंशमें स्मृतित्व तथा इदन्ता अंशमें प्रत्यक्षत्व होने से भो सांकर्य्य है, अतः प्रत्यक्षत्व जाति नहीं है। किस मनुष्य के इदन्ता अंशके तुल्य तत्ताविशिष्ट अंश में भी अर्थात् देवदत्त के पूर्वदेशकाल सम्बन्ध अंश में (पश्यामि) इत्याकारक अनुव्यवसाय अनुभव सिद्ध है, जिसके बल से उस अंश में भी प्रत्यभिज्ञा को प्रत्यक्ष मानें तस्मात् तत्ता अंश में प्रत्यभिज्ञा प्रत्यक्ष है—यह वाद विवाद ग्रस्त है॥ ७०॥

यदि च साक्षात्त्वं जातिरध्यक्षमानिका तदा प्रतीतौ कस्याञ्चिदध्यक्षानध्यक्षविवादो न स्यात्। न हि घटादिप्रत्यक्षत्वे विवदन्ते। क्वचिदस्फुटत्वाद्विवाद इति चेत्। मैवम्। निरंशे वस्तुनि कः स्फुटत्वानवभासः। यद्येकार्थसमवायिभिर्भूयोभिः सहोपलम्भः, स ज्ञानत्वादिवत्साक्षात्त्वेऽपि तर्हीति ज्ञानादित्वे न विवादः साक्षात्त्वेत्विति विशेषो वाच्यः। दर्शनकृतो हि विवादो न मात्सर्य्येण वाङ्मात्रेण वा किन्तु तत्त्वाभिमानादेव।

प्रत्यक्षार्थधर्मिकायाश्चानुमायां साक्षात्त्वपरोक्षत्वसङ्करो दुर्वारः। परोक्षत्वं न जातिः, किन्तु साक्षात्त्वमेव तथा केवलन्तु साक्षात्त्वाभावः परोक्षत्वमिति चेन्न। अस्यार्थस्याऽविनिगन्तव्यत्वापत्तेः। सर्वज्ञमनुमन्यमानस्य च मते दृष्टलिङ्गादेरीश्वरस्य लिङ्गयादिबुद्धावपरोक्षत्वेनापि विरोधः॥ ७१॥

लिङ्गादिधीजन्यत्वमनुमितित्वादौ प्रयोजकमिति चेत्। साक्षात्त्वेऽपि तर्हीन्द्रियसन्निकर्षादिजत्वमिति साक्षादपि सा न स्यात्।

किञ्च प्रत्यक्षत्व को प्रत्यक्षरूप प्रमिति का विषय मानें तो किसी २ प्रतीति में जो विवाद होता है कि यह ज्ञान प्रत्यक्ष है वा नहीं वह न होना चाहिये अर्थात् वायुज्ञान कोकोई प्रत्यक्ष और कोई अनुमिति मानते हैं, तथा अभावज्ञानको कोई प्रत्यक्ष तथा कोई अनुपलब्धि रूप प्रमाण से जन्यप्रमित्यन्तर मानते हैं—यह मतभेद न होना चाहिये, कारण कि घटादि के प्रत्यक्ष में किसीको विवाद नहीं होता है कि घटज्ञान प्रत्यक्ष है वा अनुमिति।

समर्थन—वायुज्ञान में प्रत्यक्षत्व को स्फुट अवभासके न होने से मतभेद होता है।

खण्डन—प्रत्यक्षत्व जाति निरंश (अखण्ड) हैं, अतः इसका स्फुट अवभास क्या वस्तु है। यदि कहें कि ज्ञानरूप एक अर्थ में समवायी जो ज्ञानत्व, अनुभवत्व, अपरोक्षत्व आदि बहुत से धर्म्म हैं उनके साथ जो अवभास वह स्फुट अवभास है तो वह स्फुट अवभास ज्ञानत्व के तुल्य प्रत्यक्षत्व में भी हैं, फिर ज्ञानत्व आदि में तो विवाद होता नहीं है और प्रत्यक्षत्व में विवाद होता है इसमें कोई विशेष कारण कहना चाहिये। यह दर्शन कारोंका विवाद है अतः ईर्ष्या अथवा वाङ्मात्र से नहीं है; किन्तु तत्वज्ञानके अभिमान से है। किञ्च जहां धर्म्मी (पक्ष) प्रत्यक्ष हैं, उस अनुमिति में पक्षांशमें प्रत्यक्षत्व तथा साध्यांश में परोक्षत्व होने से भी साङ्कर्य्य है। परोक्षत्व जाति नहीं है, किन्तु प्रत्यक्षत्व का अभावही परोक्षत्व हैं, अतः साङ्कर्य्य नहीं है, यह कथनभी युक्त नहीं, कारण कि परोक्षत्व हां जाति है और परोक्षत्व का अभाव ही प्रत्यक्षत्व है ऐसा न मानने में कुछ विनिगमक (प्रमाण) नहीं है। किञ्च जो आचार्य्य सर्वज्ञ ईश्वर को अनुमितिसिद्ध मानते हैं उनके मतमें ईश्वर का धूमज्ञानके अनन्तर जो वह्नि का ज्ञान होता है वह ईश्वरीय ज्ञान होने से प्रत्यक्ष तथा लिङ्ग ज्ञानके अनन्तर होने से

साङ्कर्य्य होने से प्रत्यक्षत्व जाति नहीं है॥ ७१॥

परोक्ष भी हैं, अतः उस ज्ञानमें

समर्थन—लिङ्गजत्व अनुमितित्व का प्रयोजक है और ईश्वरीय ज्ञान, नित्य होने से

अनुमिति नहीं है।

खण्डन—यदि ऐसा है तो इन्द्रिय सन्निकर्षजत्व प्रत्यक्षत्व का प्रयोजक है। उसके न होने से ईश्वरीयज्ञान प्रत्यक्ष भी न कहावेगा और ईश्वरीय ज्ञान को सब आचार्य्य अपरोक्ष मानते हैं। अतः ईश्वरीय ज्ञान अपरोक्ष नहीं है ऐसी इष्टापत्ति आप नहीं कर सकते।

व्यञ्जकोपाधिनियता च जातिरिष्यते। नच तदत्र उक्तप्रकारबाधात्। नच व्यञ्जकनियमानभ्युपगतया न तदत्रोपगम्यमिति वाच्यम्। किं मया दृष्टं तथा किं वा केनचित्कथितमिति संशयानुपपत्तेः। प्राग्भूतायां स्मर्य्यमणायां तद्बुद्धौ त्वन्मते मनसा ज्ञानरूपया प्रत्यासत्त्या प्रत्यक्षीक्रियमाणायां साक्षात्त्वाऽग्रहो विना व्यञ्जकाभावं कथं स्यात्।

अर्थधर्मश्च साक्षात्त्वमिति स्वप्रकाशवादे निरस्तम्।

तथाप्यबाधितसाक्षात्त्वबुद्धिव्यवहारबलादन्ततः पदार्थान्तरमपि साक्षात्त्वमननुमत्य न निस्तारोऽस्ति, भ्रान्तेरप्यभ्रान्तिपूर्वकत्वादिति चेन्न। तस्यापि साक्षाद्ग्रहे क्वचिदपि तद्विवादो न स्यादित्यादिदोषसाम्यात्, अनुमानादिवेद्यत्वे च लिङ्गाद्यनुपपत्तेः, क्व च व्याप्त्यादिग्रह इत्यादिदुरुत्तरपरम्परैव स्यात्। सप्तपदार्थनियमसाधनानि च न कथं परिपन्थीनि स्युरिति ॥ ७२ ॥

किञ्च व्यञ्जक जो धर्म्म उससे नियत ही जाति होती है, और प्रत्यक्षत्व का व्यञ्जक-उक्त इन्द्रियार्थ सन्निकर्षोत्पन्न ज्ञानत्व आदि के खण्डित होने से कोई है नहीं, अतः प्रत्यक्षत्व जाति नहीं है।

समर्थन—व्यञ्जक उपाधि से नियत ही जाति होती है इस नियम को हम नहीं मानते हैं।

खण्डन—इस नियम को न मानें तो "क्या मैंने देखा था वा किसीसे सुना था" ऐसा कदाचित् सन्देह होता है "वह उत्पन्न नहीं होगा, कारण कि प्राक्काल में जात बुद्धि व्यक्ति को स्मृत होने पर अथवा तुम्हारे मत में ज्ञानरूप प्रत्यासत्ति से प्रत्यक्ष होने पर प्रत्यक्षत्व जाति का अनिश्चय हो नहीं सकता है और जो व्यञ्जक मानते हैं, उनके मतमें व्यक्ति के ग्रहण होने पर भी व्यञ्जक के अनिश्चय से जाति का कदाचित् अनिश्चय हो सकता है। ज्ञान का धर्म्म साक्षात्व नहीं है; किन्तु ज्ञेय का धर्म्म है तद्विषयक होने से ज्ञान में साक्षात्व व्यवहार होता है इस बातका खण्डन स्वप्रकाश (कर्म्म लक्षण के खण्डन) के प्रस्ताव में कह चुके हैं।

समर्थन—तब भी अबाधित साक्षात्त्व की बुद्धि वा व्यवहार के बल से [साङ्कर्य्य होने से जाति न होने पर भी] पदार्थान्तर साक्षात्त्व को विना मानें निर्वाह नहीं होगा कारण कि भ्रान्ति भी प्रमापूर्वक ही होती है।

खण्डन—उस पदार्थान्तर साक्षात्त्व को यदि प्रत्यक्ष ज्ञान का विषय मानें तो कहीं भी सन्देह न होना चाहिये—यह पूर्व उक्त दोष है। किञ्च साक्षात्त्व बुद्धि वा व्यवहार अनिर्वचनीय साक्षात्त्व से उपपन्न हैं, अतः कोई लिङ्ग वा अनुपपन्न भी नहीं है। जिससे साक्षात्त्व की सिद्धि हो। तथा यावत् किसी व्यक्ति में साक्षात्त्व का प्रत्यक्ष न हो तावत् व्याप्तिग्रह भी नहीं हो सकता। तथा साक्षात्त्व को पदार्थान्तर मानने में सात ही पदार्थ हैं अष्टम नहीं है यह आपका नियम भी बाधक है ॥ ७२ ॥

निर्वचन—लिङ्ग जन्यत्व का जो अभाव तथा शब्द जन्यत्व का जो अभाव तथा सादृश्य जन्यत्व का जो अभाव इन अभावत्रय से युक्त बुद्धि प्रत्यक्ष है।

लिङ्गादिजलाभावसमुदायवती धीः साक्षादिति चेन्न । परोक्षविषयसंशयादावतिव्याप्तेः । ईदृशी प्रमा तथेति चेन्न । प्रत्यक्षभ्रमाव्याप्तेः ॥

अनुमानादिव्यवच्छेद्यतत्तदसाधारणकारणाजनिता धीः साक्षादिति चेन्न । एवं हि प्रत्यक्षतत्तदपरव्यतिरिक्ता धीरनुमानादिरिति वैपरीत्यमेव कुतो न स्यादित्यविनिगम्यत्वं स्यात् । तेषु व्यवच्छेद्येष्वेकत्र्यादि परिहाय व्यवच्छेद्यहेत्वजनितत्वेनापि साक्षात्त्ववत्तत्र तत्रानुगतबुद्ध्याद्यन्तरापत्तेः । व्यवहारे सति निमित्तानुसरणं, न तु निमित्तानुसरणेन व्यवहार इति चेन्न । निमित्तस्यानत्यापत्तिद्वारस्यैव कल्प्यत्वात् । तत्तज्जनितत्वाभावो हि तेनैव रूपेणानुगतव्यवहारप्रत्ययावादध्यान्न त्वन्येनापि । तथात्वे यावत्परिदृष्टव्यक्तिविशेषान्यत्वेन व्यवहारोपपत्तौ गोत्वाद्युच्छेदप्रसङ्गः । तस्मात्—

खण्डन—परमाणु जगत् के कारण हैं, वा प्रधान इस परोक्षविषयक सन्देह में तथा प्रधान ही जगत् का कारण है, इस भ्रम में तथा-सामे माता, इस स्मृति में अतिव्याप्ति हो जायगी । उक्त अभावत्रयविशिष्ट प्रमा प्रत्यक्ष है—यह नहीं कह सकते हैं, कारण कि प्रत्यक्षभ्रम में अव्याप्ति हो जायगी । प्रत्यक्षप्रमाही लक्ष्य है—यह कथन भी भ्रम प्रमा साधारण प्रत्यक्षमात्र के प्रस्तुत होने से अयुक्त है ।

समर्थन—अनुमिति, उपमिति, शाब्दबोध, परोक्ष, सन्देह, भ्रम, स्मृति आदि जो व्यवच्छेद्य उन व्यवच्छेद्यों के जो असाधारण कारण उनसे अजन्य बुद्धि प्रत्यक्ष है ।

खण्डन—इसी रीति से प्रत्यक्षादि तत्तत् व्यवच्छेद्य के असाधारण कारण से अजन्यज्ञान अनुमिति आदि हैं ऐसा अनुमिति आदि का भी लक्षण कर सकते हैं, अतः अन्योन्याश्रय हो जायगा ।

किञ्च प्रत्यक्ष अनुमिति इन दोनों में वृत्ति प्रत्यक्षादि त्रय में वृत्ति अथवा चतुष्टय में वृत्ति भी तत् तत् व्यवच्छेद्य के असाधारण कारण से अजन्यत्वरूप एक लक्षण होने से प्रत्यक्षादि दो वा तीन में भी अनुगत बुद्धि वा व्यवहार हो जायगा ।

समर्थन—प्रत्यक्ष आदि दो वा तीन में अनुगत व्यवहार नहीं ही होता हैं, अतः अनुगत लक्षणरूप निमित्त का कल्पन नहीं होगा, कारण कि व्यवहार के अनुसार से ही निमित्त की कल्पना होती है ।

खण्डन—सत्य है, व्यवहार के अनुसार से ही लक्षणरूप निमित्त की कल्पना होती है, परन्तु निमित्त की कल्पना भी ऐसी ही होनी चाहिये, जिसमें कोई अतिप्रसङ्ग का द्वार न हो और पूर्वउक्त दोष होने से पूर्वउक्त लक्षणरूप निमित्त ऐसा नहीं है ।

किञ्च यदि अनुमित्यादि तत्तत् व्यवच्छेद्य के असाधारण कारण से जन्यत्वाभाव को प्रत्यक्ष कहें तो उक्त जन्यत्वाभावरूप से ही अनुगतव्यवहार वा अनुगतप्रतीति का निमित्त उक्त लक्षण होगा, प्रत्यक्षत्व रूप से व्यवहार वा प्रतीति का निमित्त नहीं होगा । यदि उक्त जन्यत्वाभावरूप से हीं प्रत्यक्ष व्यवहार वा प्रतीति की उपपत्ति मानें, तो परिदृष्ट अश्वादि व्यक्ति से अन्यत्व रूप से ही गवादि प्रतीति की भी उपपत्ति हो जायगी, फिर गोत्वादि का उच्छेद हो जायगा । तस्मात् इदं प्रत्यक्षं वा अयं गौः इत्यादि विधिमुख से जायमान प्रत्यक्ष है, अतः व्यतिरेक से अर्थात् उक्त जन्यत्वाभावरूप लक्षण से इनका

विधिजः प्रत्ययोऽन्योऽयं व्यतिरेकासमर्थनः ।
नैवं चेदपराद्धं ते किमन्यापोहवादिना ॥४१॥७३॥

शब्दानुमानोपमानजप्रमितिव्यतिरिक्तत्वे सति प्रमितित्वं प्रत्यक्षलक्षणमभिधाय यः कोपि न त्रपते स प्रष्टव्यः, किं प्रत्येकमिदं लक्षणमुत मिलितम् । नाद्यः प्रत्येकं व्यभिचारात् । द्वितीये किं मिलितानां निषेधः, उत निषेधानां मिलितत्वम् । नाद्यः प्रत्येकमेव व्यभिचारात् । न हि प्रत्येकमनुमित्यादौ मिलिततद्रूपसम्भवः । नापि द्वितीयः मिलितास्वनुमित्यादिषु निषेधमेलकसम्भवेऽपि प्रत्यक्षत्वानभ्युपगमात् ।

न बह्वाश्रयाणामुक्तनिषेधानां लक्षणत्वमपि त्वेकाश्रयाणामिति चेन्न । समुदायिभेदेऽपि समुदायस्यानुमित्यादिवदेकतोपचारबीजाविशेषाभ्युपगम इति हि वक्ष्यते । असमुदायत्वे सतीत्यपि विवक्षितमिति चेन्न । समुदायत्वविशिष्ट एवांशतः स्वात्मनि

समर्थन नहीं हो सकता है, यदि ऐसा न मानें तो अन्य अपोहवादी बौद्धों का क्या अपराध है कि इनका कथन न माना जाय ॥७३॥

लक्षणान्तर खण्डन

शब्दज, अनुमानज उपमानज, प्रमिति से भिन्न जो प्रमिति वह प्रत्यक्ष है—ऐसा लक्षण कह कर जो लज्जित नहीं होते हैं, उनसे पूछना चाहिये कि क्या प्रत्येक लक्षण है, वा मिलित, इनमें प्रत्येक अर्थात् शब्दज प्रमिति व्यतिरिक्त प्रमितित्व आदि तो लक्षण नहीं हैं, कारण कि शब्दजप्रमितिव्यतिरिक्त प्रमितित्व अनुमिति में अतिव्याप्त हैं। एवं प्रत्येक निवेश में अन्यत्र भी लक्षण को अतिव्याप्त जानना चाहिये। यदि मिलित लक्षण कहें तो शब्दज तथा अनुमानज तथा उपमानज प्रमितिसमुदाय से व्यतिरिक्त प्रमितित्व लक्षण है वा शब्दज प्रमिति का जो भेद तथा अनुमानज प्रमिति का जो भेद तथा उपमानज प्रमितिका जो भेद एतत् भेदत्रयविशिष्ट प्रमिति लक्षण है। इनमें प्रथम पक्ष में समुदाय के भेद के प्रत्येक में होने से प्रत्येक में अतिव्याप्ति हो जायगी, कारण कि प्रत्येक अनुमिति आदि समुदायरूप नहीं है, और द्वितीय कल्प में अनुमित्यादि त्रय समुदाय में प्रत्येक अनुमिति आदि के भेदत्रय के होने से अतिव्याप्ति हो जायगी।

समर्थन—शब्दादि प्रतीति के भेदत्रय से युक्त एक जो प्रतीति वह प्रत्यक्ष है, अनुमित्यादि त्रय समुदाय में एकत्व नहीं हैं, अतः अतिव्याप्ति नहीं।

खण्डन—यद्यपि समुदाय के एकदेश अनुमित्यादि अनेक हैं, परन्तु समुदाय एक ही है, अर्थात् प्रत्येक अनुमिति आदि में गुणरूप एकत्व के न होने पर भी उपचार से जैसे एकत्व व्यवहार होता है, वैसे ही अनुमित्यादि समुदाय में भी उपचार से एकत्व व्यवहार होता है; कारण कि उपचार का बीज परोक्षत्वरूप एक धर्म्म अनुमित्यादित्रय में भी विद्यमान हैं।

समर्थन—उक्त लक्षण में समुदाय से भिन्नत्व का भी निवेश है, अतः अनुमित्यादित्रय के समुदाय में अतिव्याप्ति नहीं होगी।

वृत्तिविरोधभयेनासमुदायत्वस्यैष्टव्यत्वेन तादृशि प्रसङ्गो दुर्वारः । ७४–ज्ञानस्यैवं विवक्षितमिति चेन्न । विशिष्टस्यापि ज्ञानस्य ज्ञानत्वादेव ।

एकेति च किमाश्रयव्यक्त्यभेदो विवक्षितः, उताभिन्नजातीयता, उतैकोपाधिकता, उतैकसङ्ख्यायोगिता, उत द्व्यादिसंख्यायोगिता उत द्व्यादिसङ्ख्यायोगाभावः । आद्ये तद्विशिष्टस्याव्यापकतादोषः व्यक्त्यात्मनोऽभेदस्य व्यावृत्तत्वात् धर्मिणा च लक्षणविशेषणेऽलक्ष्यधर्मत्वं धर्मस्य स्यात् स्वस्यैव स्वधर्मत्वानुपपत्तेः । आश्रयाभेदस्योपलक्षणत्वे प्रागुक्तदोषः ।

द्वितीये तदेवाभिन्नजातीयत्वं लक्षणमस्तु अवश्यन्तया प्राथम्येन प्रतीयमानत्वात् । न तृतीयः परोक्षप्रमितित्वस्यानुमित्यादिषु मिलितास्वपि भावात् । नापि चतुर्थः वैशेषिकपक्षे गुणतया तदभावात् भावे वाऽनुमित्यादित्रयवृत्तीनां त्रयाणामप्यभावानामेकत्वसङ्ख्यासामानाधिकरण्यसम्भवात्, मिलितानामप्येकसमुदायापेक्षया

खण्डन—यदि कहें कि समुदायत्व विशिष्ट में समुदायत्व रहता है, तो विशिष्टवृत्तिधर्म्म को विशेषणवृत्ति अवश्य होनेसे अंशतः आत्माश्रय हो जायगा, अतः समुदायत्वविशिष्ट भी असमुदाय ही है ॥ ७४ ॥

समर्थन– उक्त लक्षण में प्रमितित्व का भी निवेश है और समुदाय प्रमिति नहीं है।

खण्डन—समुदायत्वविशिष्ट अनुमित्यादि, प्रमिति है, अतः समुदाय भी प्रमिति ही है। किञ्च लक्षण में निविष्ट एक शब्द से लक्षणाश्रय लक्ष्यव्यक्ति का अभेद अभिप्रेत है वा एक जाति का आश्रयत्व, अथवा एक उपाधि का आश्रयत्व, वा एकत्व संख्या का योग, यद्वा द्वित्व आदि संख्या का योगाभाव अभिप्रेत है। प्रथम कल्प में धर्मी (लक्ष्य) को लक्षण के विशेषण होने से लक्षण लक्ष्य का धर्म्म न हो सकेगा, कारण कि जैसे स्व स्व का धर्म नहीं हो सकता, वैसेही स्व विशिष्ट भी स्व का धर्म नहीं हो सकता। यदि कहें कि लक्ष्य व्यक्ति का अभेद लक्षण में विशेषण नहीं है, किन्तु उपलक्षण है, अतः उक्त दोष नहीं, तब भी व्यक्तिरूप अभेद व्यावृत्त (अन्य व्यक्ति से पृथग्भूत) है, अतः जिस व्यक्ति को लक्षण में उपलक्षण करें, उससे अन्य व्यक्ति में अव्याप्ति हो जायगी, कारण कि व्यक्ति के अभेद को व्यावृत्त होने से व्यक्तिमात्र को उपलक्षण कर नहीं सकते। द्वितीय वा तृतीय कल्प में यदि वह जाति वा उपाधिप्रत्यक्षत्व वा अर्थजत्व ही हो तो वही जाति वा उपाधि लक्षण रहे प्रकृत लक्षण व्यर्थ है, कारण कि उक्त लक्षण में विशेषण होने से वह जाति वा उपाधि अवश्य ज्ञेय है, तथा उक्त जाति वा उपाधि को लक्षण मानने में लाघव भी है। यदि यत् किंचित् जाति वा उपाधि का ग्रहण हो तो परोक्षत्वरूप जाति वा उपाधि अनुमित्यादि त्रय में भी है, अतः अनुमित्यादिसमुदाय में अतिव्याप्ति हो जायगी। चतुर्थ कल्प में वैशेषिक के मत के अनुसार एकत्व संख्या प्रत्यक्ष में भी नहीं हैं, अतः असम्भव हो जायगा और अन्यमत के अनुसार अनुमित्यादित्रय में उक्त अभावत्रय भी हैं तथा समुदाय की अपेक्षा से एकत्व संख्या भी हैं, अतः अनुमित्यादि समुदाय में अतिव्याप्ति हो जायगी। पंचम कल्प में वैशेषिक के मत के अनुसार अनुमित्यादित्रय में भी द्वित्वादि संख्या के अभाव होने से अति-

तथात्वात्, । नापि पञ्चमः वैशेषिकमतानुसारेणानुमित्यादित्रयेऽपि तदभावस्य तुल्यत्वात् । अतदनुसारे प्रत्यक्षव्यक्तिष्वपि द्व्यादिसङ्ख्यायोगात् ॥७५॥

तथापि नैकस्यां प्रत्यक्षव्यक्तौ द्व्यादिपरिसमाप्तिः द्व्यादिसङ्ख्यापरिसमाप्त्यभावश्च तदभावशब्देन विवक्षित इति चेन्न । का हि परिसमाप्तिर्यैकस्यां व्यक्तौ नास्तीत्युच्यते । तत्रैव वृत्तिर्द्व्यादेः परिसमाप्तिः सैकस्यां व्यक्तौ नास्तीति चेन्न । एवमेकत्वस्यापि न क्वचित्परिसमाप्तिः स्यात् न हि तस्य तत्रैव वृत्तिरन्यस्यैकत्वाभावप्रसङ्गात् । अत एकत्वसङ्ख्यावत्यामेव व्यक्तौ द्व्यादिपरिसमाप्तिरित्यविशेष एव ।

एकव्यक्तिगतैकत्वसङ्ख्याव्यक्तिर्नान्यत्रेति चेन्न । सत्ताव्यक्तेरप्येवम्भावप्रसङ्गात् अननुगतत्वापत्तेश्च । सत्त्वैकैव जातिरूपा एकत्वन्तु प्रतिव्यक्ति भिन्नं गुणपदार्थ इति

व्याप्ति हो जायगी, तथा अन्य मतके अनुसार प्रत्यक्ष में भी द्व्यादि संख्या है, अतः असम्भव हो जायगा ॥ ७५ ॥

समर्थन—तब भी एक प्रत्यक्ष व्यक्ति में द्वित्व आदि सङ्ख्या की परिसमाप्ति (पर्य्याप्ति) नहीं है और द्व्यादि की परिसमाप्ति का अभाव लक्षण में निविष्ट है, अतः असम्भव नहीं होगा।

खण्डन—द्वित्वादि संख्या की परिसमाप्ति क्या है जो एक व्यक्ति में नहीं है ?

समर्थन—केवल उसीमें वृत्तित्व द्वित्व की परिसमाप्ति हैं वह द्वित्व की परिसमाप्ति एकही व्यक्ति में नहीं है, कारण कि द्वित्व दो व्यक्तियों में रहता है।

खण्डन—यदि तत्रैववृत्तित्व को पर्य्याप्ति कहें तो एकत्व की भी कहीं पर्य्याप्ति न होगी, कारण कि एकत्व अन्यत्र भी रहता है, अन्यथा अन्यत्र एकत्व का अभाव हो जायगा। अतः वृत्तित्वमात्रके ही पर्य्याप्तित्व होने से एक प्रत्यक्ष व्यक्ति में भी द्वित्व की पर्य्याप्ति ही हैं, अभाव नहीं हैं, अतः लक्षण का असम्भव हो जायगा।

समर्थन—एक व्यक्तिगत एकत्व व्यक्ति अन्यत्र हो रहता है, अतः तत्रैववृत्तित्वरूप पर्य्याप्ति एकत्व में हैं।

खण्डन—सत्ताव्यक्ति भी ऐसी ही हो जायगी अर्थात् एक व्यक्तिगत सत्ता अन्यत्र न रहेगी। यदि सत्ता को भी प्रतिव्यक्ति भिन्न मानें तो "इदं सत्" "इदं सत्" यह अनुगत प्रतीति नहीं होगी। किंच यदि प्रतिव्यक्तिव्यावृत्त एकत्व को मानें तो 'इदमेकम्' 'इदमेकम्' यह अनुगत प्रतीति न होगी। किञ्च यदि एकत्व को नाना मा तो सब एकत्व के लक्षण में प्रवेश तो हो नही सकता, किन्तु एकही एकत्व का निवेश कर सकते हैं; अतः जिस प्रत्यक्ष व्यक्तिगत एकत्व का निवेश करेंगे उससे अन्य व्यक्ति में अव्याप्ति हो जायगी।

समर्थन—सत्ता एक ही जातिरूप है तथा एकत्व प्रतिव्यक्ति भिन्नगुण पदार्थ है।

खण्डन—निश्चय, आप वैशेषिकों के वञ्चन में आ गये हैं। अन्यथा सत्ता और एकत्व दोनों की प्रतीति वा व्यवहार में भेद न देखते हुए भी आप युक्तिविरुद्ध असम्बद्ध एकत्व को गुण तथा सत्ता को जाति क्यों कहते।

समर्थन—यदि एकत्व जाति है, तो द्रव्यत्व के तुल्य, एकत्व का भी सत्ता के साथ पर अपरभाव होना चाहिए। वह हो नहीं सकता; कारण की सत्ता में सत्ता नहीं रहती है और एकत्व रहता है तथा एकत्व में सत्ता है, और एकत्व नहीं है; अतः सांकर्य्य होने से एकत्व जाति नहीं है ?

चेत्। नूनं वैशेषिकैर्व्विप्रलब्धोऽसि, कथमन्यथा सदेकप्रत्यययोरनुभवव्यवहारविशेषमपश्यन्नपि कानिचित्कानिचिदसम्बद्धान्यक्षराणि प्रलपसि। सत्वैकत्वयोः परापरत्वानुपपत्तेरेवं स्यादिति चेन्न। साम्यात्। जातिपरापरत्वध्रौव्यमेव च क्वाप्येकन्यूनवृत्तित्वे प्रमाणं स्यात्। क्व तथेति चेन्न। शैलेऽनलस्यानुमायां क्व हस्तवितस्त्यादौ तदंश इत्यनिश्चयवददोषत्वात् ॥७६॥

नन्वस्तु मा वासीदेकत्वमनुगतं किमनेनात्र निरूपितेन, द्वित्वादि यत्र न समाप्यते अभिहिताभावत्रयं चास्ति तत्प्रत्यक्षमिति। मैवम्। अनुमित्यादित्रयेऽपि न त्रित्वं परिसमाप्तम्। एवं सत्यन्यानि त्रीणि न स्युः। अन्या सा त्रित्वव्यक्तिर्याऽन्यत्रेति चेन्न। त्रित्वव्यक्तेः कस्याश्चिदनुमित्यादित्रये समाप्त्यभावात्।

काचिदपि त्रित्वव्यक्तिर्यत्र न समाप्यत इति चेन्न। अव्यापकत्वात्। प्रत्यक्षत्वस्य च त्रित्वव्यक्तेश्चावश्यं सामानाधिकरण्यस्य वैशेषिकमतव्युत्थितेन भवताऽभ्युपगम्यत्वात्। अन्यथा प्रत्यक्षव्यक्तयस्तिस्रो न स्युस्, तदेव हि त्रिरभिधीयते यत्र त्रित्वं परिसमाप्यते ॥७७॥

खण्डन—यदि सांकर्य्य का परिहारमात्र ही कर्त्तव्य है, तो सत्ता को गुण और एकत्व को जाति मान कर लीजिये, क्या हानि है। किंच सत्ता एकत्व इन दोनों में एक पर तथा एक अपर है, एक व्यक्ति में वृत्ति, जातिद्वय होने से, जैसे द्रव्यत्व—यह अनुमिति ही एक के न्यूनवृत्तित्व में प्रमाण है। सत्ता अपर जाति है वा एकत्व इस विशेष का अनिश्चय अनुमिति में दोष नहीं है, कारण कि अनुमिति से सर्वत्र सामान्यरूप से ही निश्चय होता है, विशेषरूप निश्चय कहीं नहीं होता है। पर्वत में धूम से वह्नि की अनुमिति में भी हस्त-परिमित वा वितस्तिपरिमित वह्नि है ऐसा विशेष निश्चय कहाँ होता है ॥७६॥

समर्थन—एकत्व अनुगत हो वा न हो यहाँ इस निरूपण का क्या प्रयोजन है, द्वित्व आदि की परिसमाप्ति जहाँ न हो और उक्त अभावत्रय हों वह प्रत्यक्ष है।

खण्डन—अनुमिति आदि त्रय में भी त्रित्व की परिसमाप्ति नहीं है, कारण कि अन्यत्र भी त्रित्व है, यदि अनुमित्यादि त्रय में ही त्रित्व की परिसमाप्ति मानें तो अन्यत्र त्रित्व न रहेगा।

समर्थन—अन्यत्र जो त्रित्व व्यक्ति है, वह अन्य ही है, अर्थात् अनुमिति आदि में जो त्रित्व है उसकी परिसमाप्ति उसीमें है वह अन्यत्र नहीं है।

खण्डन—यत् किञ्चित् त्रित्व व्यक्ति की परिसमाप्ति का अभाव अनुमित्यादि त्रय में भी है?

समर्थन—किसी भी त्रित्वव्यक्ति की परिसमाप्ति जहाँ न हो वह प्रत्यक्ष है।

खण्डन—आप वैशेषिक (कणादमुनि के अनुयायी) नहीं हैं। अतः प्रत्यक्ष में त्रित्व संख्या को अवश्य मानेंगे, यदि न मानें तो "प्रत्यक्षव्यक्तयस्तिस्रः" ऐसा व्यवहार आप के मत में कैसे होगा, कारण कि वे ही तीन हैं, जिनमें त्रित्व संख्या हो, अतः प्रत्यक्ष में भी सब त्रित्व का अभाव नहीं है ॥ ७७ ॥

किञ्च तथापि स एवातिव्यापकतादोषः, त्रित्वेनावच्छिन्नास्वनुमित्यादिव्यक्तिषु त्वदभिहितमभावत्रयमस्तीति तत्र प्रत्यक्षलक्षणं गतमित्यतिव्याप्तिरुक्ता तद्व्यावर्त्तनाय भवताऽभिधीयते काचिदपि त्रित्वव्यक्तिर्यत्र न समाप्यत इति। न चैवमुक्ते साऽतिव्याप्तिर्निवर्तते तत्राप्युक्तविशेषणस्य विद्यमानत्वात्। न हि त्रित्वावच्छिन्ने तस्मिन् त्रित्वव्यक्तिः काचिदपि समाप्यते, त्रित्वलक्षणैकोपाध्यवच्छिन्ने तस्मिन् त्रित्वव्यक्त्यन्तरं भवदप्याश्रयान्तरमादाय वर्त्तते न तु यत्रैव परिसमाप्यते। यत्र चोक्तमुपाधिभूतं त्रित्वं तेषु यदि त्रित्वसमाप्तिर्धर्मिषु दृश्येत तदा तद्दर्शनेन तत्र धर्मिमात्रे लक्षणव्यावृत्तिः सिद्ध्येत्। न तु त्रित्वविशिष्टे धर्मिणि तस्मादतिव्यापकत्वं तदवस्थमेव। अभावत्रयञ्च त्रित्वोपाध्यवच्छेदेन समुदिततामुपगतवति विशिष्टे धर्मिणि वर्त्तते नत्वविशिष्टे प्रत्येकमभावत्रयावस्थानस्य तेषु वक्तुमशक्यत्वात्।

अथ मन्यसे तादृशस्य विशिष्टस्य प्रमितित्वेनैव व्यवच्छेदः नह्यभावत्रयवत् त्रित्वं विशेषणमाश्रयकोटावन्तर्भाव्य तासु धर्मिव्यक्तिषु प्रमितित्वं वर्त्तते, किन्तु तेषां धर्मिणां स्वरूपमात्रे उक्ताभावत्रयं प्रमितित्वञ्चेत्येतद्यत्रास्ति तत्प्रत्यक्षमिति हि ब्रूम इति। न।

किञ्च ऐसा निवेश करने पर भी वही अतिव्याप्तिदोष है। देखिये-त्रित्व से युक्त अनुमिति आदि व्यक्ति में उक्त अभाव त्रय है, अतः वहाँ प्रत्यक्षलक्षण के होने से अतिव्याप्ति हुई। उसकी व्यावृत्ति के लिये आप निवेश करते हैं कि कोई भी त्रित्वव्यक्ति जहां परिसमाप्त न हो वह प्रत्यक्ष है। ऐसा निवेश करने पर भी उक्त अतिव्याप्ति का वारण नहीं होता है, कारण कि त्रित्वविशिष्ट उक्त विशेषण विद्यमान है। अनुमिति आदि में भी किसी भी त्रित्वव्यक्ति के न होने से त्रित्वलक्षण एक उपाधि से अवच्छिन्न (युक्त) अनुमित्यादि त्रय में अंशतः आत्माश्रय होने के भय से वह त्रित्व तो है नहीं, अन्य त्रित्व है, परन्तु वह भी घट पटादि अन्य आश्रय का आदानकर है। केवल उसमें नहीं है, जहाँ उपाधिभूत त्रित्व है, कारण त्रित्वविशिष्ट समुदाय एक है। केवल उन धर्मियों में त्रित्व देखा जाता है, अतः धर्मीमात्र में लक्षण की व्यावृत्ति नहीं हो सकती है। त्रित्वविशिष्टधर्म्मी में व्यावृत्ति नहीं हो सकती है, तस्मात् त्रित्वविशिष्ट में अतिव्याप्ति तदवस्थ ही है। शब्दादि प्रमिति का अभावत्रय त्रित्वरूप उपाधिविशिष्ट धर्मी में है, केवल धर्मी में नहीं है। एक एक में दो अभावों के होने पर भी तीन अभाव नहीं है, कारण कि शब्दप्रमिति में शब्दप्रमितित्व का अभाव नहीं होता है।

समर्थन—अनुमिति आदि समुदाय में अतिव्याप्ति का व्यवच्छेद (वारण) प्रमितित्व के निवेश से ही होगा, कारण कि जैसे उक्त अभावत्रय, त्रित्व विशिष्ट धर्म्मी में हैं, वैसे प्रमितित्व, त्रित्वविशिष्टधर्म्मी में नहीं है, किन्तु धर्म्मीमात्र में है और उक्त अभावत्रय तथा प्रमितित्व दोनों जहां एक में रहें, वह प्रत्यक्ष है ऐसा हम कहते हैं।

खण्डन—आप भी किसी भिन्नधर्म से युक्त ही धर्म्मी में प्रमितित्व तथा उक्त अभावत्रय को मानेंगे, देखिये-यदि प्रमितित्व के क्वाचित्कत्व में नियामक न कहा जाय तो वस्तुमात्र ही प्रमिति हो जायगी, वा कुछ भी प्रमिति नहीं होगा। नियम में यदि अन्य की अपेक्षा न हो तो सर्वत्र सत्ता या असत्ता हो जायगी, कारण कि भावों का क्वाचित्कत्व नियामक से

भवताऽपि भिन्नभिन्नधर्मावच्छिन्नस्यैव धर्मिणः प्रमितित्वमभावत्रयवत्त्वञ्चावश्यमभ्युपगन्तव्यम् । तथा हि—यदि प्रमितित्वस्य क्वाचित्कत्वे नियामकं नोच्यते तदा सर्वा प्रमितिः स्यात् न वा काचिदपि ।

सर्व्वत्र सत्ताऽसत्ता वा नियमेऽन्यानपेक्षया ।
नियामकाद्धि भावानां क्वाचित्कत्वस्य सम्भवः ॥४२॥

तन्नियामकमाश्रये विशेषणीभूतं वा वक्तव्यं, उपलक्षणीभूतं वा । आद्ये यदेव प्रमितित्वस्याश्रयविशेषणं तदेव यत्राभावत्रयस्यापि तस्य तदा त्रित्वावच्छिन्नेऽनुमित्यादावभावत्रयस्य दर्शितत्वात्तत्र च प्रमितित्वेनापि त्रित्वावच्छिन्ने भवितव्यमिति प्रमितित्वान्न तद्व्यवच्छेदः । अथान्यावच्छिन्ने प्रमितित्वमन्यधर्मावच्छिन्ने चाभावत्रयसम्बन्धः, तदा नास्ति त्वत्पक्षेऽपि प्रमितित्वस्यैकधर्मविशिष्टाश्रयत्वलक्षणमेकाश्रयत्वं विशिष्टेऽपि धर्मिण्याश्रितो धर्म्याश्रित एवेति कृत्वा च प्रमितित्वस्याभावत्रयसमानाश्रयत्वेऽनुमित्यादित्रयेऽपि प्रसङ्गस्तदवस्थः ।

नापि द्वितीयः उपलक्षणीभूतेन केनचिद्धर्मेण योऽसावुपलक्षितो धर्मी स एव खलु त्रित्वविशिष्टोपि विशेषणवतोपि यावद्विशेष्यवस्तुनो विशेष्यवस्त्वात्मकत्वात् । यथा दण्ड्यपि पुरुषः पुरुष एव, एवञ्च सत्युपलक्षितादनन्यभूते त्रित्वविशिष्टेऽप्यनुमित्यादौ प्रमितित्वमाश्रितं नियामकेनोपलक्षणेनोपलक्ष्याभेदव्यवस्थितितया तस्याप्यवच्छिन्नत्वात् । तथाचातिव्याप्तिर्व्वज्रलेपायिता ॥७८॥

होता है, उस नियामक को आश्रय में विशेषण मानें वा उपलक्षण। प्रथम पक्ष में जो प्रमितित्व का नियामक आश्रय में विशेषण है, यदि वही—अभावत्रय का नियामक भी आश्रय में विशेषण है तो त्रित्वविशिष्ट अनुमित्यादि त्रय में उक्त अभावत्रय को दिखा आये हैं और प्रमितित्व-भी त्रित्वविशिष्ट अनुमित्यादि में है, कारण कि दोनों के नियामक एक ही हैं, अतः प्रमितित्व रूप विशेषण से अनुमित्यादि समुदाय में अतिव्याप्ति का वारण नहीं हो सकता है। यदि अन्यधर्म्म से अवच्छिन्न (नियमित) आश्रय में प्रमितित्व तथा अन्यधर्म से अवच्छिन्न आश्रय में अभावत्रय मानें तो तुह्मारे पक्ष में भी प्रमितित्व तथा अभावत्रय एक धर्म विशिष्ट प्रत्यक्ष में नहीं हैं, अतः असम्भव हो जायगा। यदि कहे कि यद्यपि अवच्छेदक भेद है, तथापि प्रत्यक्षरूप धर्म्मी में प्रमितित्व और अभावत्रय दोनों हैं, अतः असम्भव नहीं है, तो अनुमिति आदि त्रय में भी त्रित्वविशिष्ट में अभावत्रय तथा प्रत्येक में अर्थात् प्रत्यक्षत्व विशिष्ट में प्रमितित्व भी हैं, अतः अतिव्याप्ति वैसी ही है। नियामक आश्रय में उपलक्षण है यह द्वितीय कल्प भी युक्त नहीं है, कारण कि उपलक्षणीभूत जो धर्म्म उससे उपलक्षित जो धर्म्मी है, वह धर्म्मी ही त्रित्वरूप विशेषण से विशिष्ट भी है; कारण कि विशेषणवान् विशेष्य भी विशेष्यरूप ही है, जैसे दण्डी पुरुष भी पुरुष ही है। ऐसा होने पर उपलक्षित में प्रमितित्व के होने से उपलक्षित से अनन्यभूत त्रित्वविशिष्ट अनुमिति आदि त्रय में भी प्रमितित्व है; कारण कि उपलक्ष्य के अभेदरूप से व्यवस्थित होने से त्रित्वविशिष्ट भी नियामक उपलक्षण से अवच्छिन्न है। अतः प्रत्यक्षलक्षण की अनुमित्यादि त्रय में अव्याप्ति-वज्रलेप तुल्य हो गई ॥ ७८ ॥

तथाप्युपलक्षकेण त्रित्वविशिष्टतया नोपलक्षितोऽसौ धर्मी, किन्तु स्वरूपेणेति चेन्न। उक्तमत्र। यदेव तदुपलक्षितं तदेव विशिष्टमपि। तथापि त्रिशिष्टेन रूपेण तावन्नोपलक्षितमिति चेत् मोपलक्षि। अविशिष्टेनापि तन्नोपलक्षितमेव अन्यथा प्रकृतेपि वैयधिकरण्यापत्तेः।

तदास्तामुल्लसत्पल्लवदलनविलसितेनेति। तदेवं लक्षणान्तरेऽपि प्रतिपादितोऽयं दूषणसमूहः स्वयमूहनीयः।

एतदेव परामृश्य भट्टैरिदमुदाहृतम्।
लक्षणस्याऽभिधानन्तु केनांशेनोपयुज्यते ॥४३॥

अन्याभिप्रायोक्तमपि हि तत्सामान्यतोऽप्युपपद्यमानमेवेति ॥७६॥

समर्थन—यद्यपि उपलक्षित से अनन्यभूत त्रित्व विशिष्ट है; तथापि उपलक्षक से त्रित्वविशिष्ट रूप से उपलक्षित नहीं होता है, किन्तु केवल धर्म्मीमात्र उपलक्षित होता है।

खण्डन—जो उपलक्षित है वही त्रित्वविशिष्ट भी है। यदि कहें कि त्रित्व विशिष्ट रूप से उपलक्षित नहीं है तो न सही। अविशिष्टरूप से भी तो उपलक्षित नहीं है, अन्यथा यदि अविशिष्टत्व रूप से उपलक्षित में प्रमितित्व को मानें तो अविशिष्टत्व से उपलक्षित में प्रमितित्व के तथा प्रत्यक्षत्वादि विशिष्टरूप से उक्त अभावत्रय के होने से प्रत्यक्ष में भी भिन्न अवच्छेद से प्रमितित्व और अभाव त्रय है, अतः प्रत्यक्ष में असंभव होजायगा। तस्मात् शङ्कारूपपल्लव जिसमें उल्लसित हैं ऐसे वचन का आडम्बर व्यर्थ है, इसी प्रकार अन्य लक्षणों में भी इन दूषणसमूहों की स्वयं ऊहा करनी चाहिये।

इसी बात को विचार कर भट्ट जी ने कहा है कि लक्षण का अभिधान किसी अंश में उपयोगी नहीं है। यद्यपि भट्टजी ने धर्म्म में नोदना (विधि) ही प्रमाण है वा नोदना प्रमाण ही है, धर्म्म में प्रत्यक्षादि लक्षण अनुपयोगी हैं–इस प्रस्ताव में कहा है, तथापि लक्षण सामान्य में भी भट्टजी का कथन उपयोगी हो सकता है क्योंकि लक्षणमात्र उक्त प्रकार से खण्डित हैं ॥ ७६ ॥

इति प्रत्यक्षलक्षण खण्डनानुवाद।

अनुमानलक्षण खण्डनारम्भः

अनुमानमपि किमुच्यते। करणपक्षे लिङ्गपरामर्शोऽनुमानमिति चेत् किं लिङ्गत्वम्। व्याप्तस्य पक्षधर्मत्वमिति चेत्, न। संशयस्योपलक्षणत्वे तत्र दृष्टापि व्यापकं तत्परामर्शोऽतिप्रसङ्गात्। अतएव न तस्य वर्त्तमानस्यातत्कालेऽप्युपलक्षणत्वात्। विशेषणत्वे चानुमाय व्यापकं धर्मिनाशवदप्रवृत्त्यापत्तेः। पक्षधर्माद्धेतोः पक्षांशे विशेष्ये साध्यसिद्धिरीदृशश्च वैयधिकरण्यमिष्टमेवेत्यतो नैवमिति चेन्न। पक्षमादाय वैयधिकरण्ये नियतसामानाधिकरण्यलक्षणव्याप्तिलोपापत्तेः। तथापि विशेष्यमादाय साऽस्त्येवेति चेन्न। साध्यविशेषसिद्धिरपि यत्र व्याप्तिबलायातं सामान्यं तत्र सामान्यप्रतीत्यपर्य्यवसानबलादेवेति सामान्यविशेषसिद्धावनुपयोगिनी पक्षधर्मता त्वदिष्टा केवलं सिद्धसाधनपरिहारायानुमितिकारणत्वेनैष्टव्या सिद्धसाधनञ्च न स्वार्थानुमाने दोष इति नानुमितिमात्रहेतुनिवेशिनी सेति। मोक्षमार्गैर्हि—

अनुमानलक्षण खण्डन

खण्डनकर्ता—अनुमान भी क्या वस्तु है अर्थात् लक्षण न होने से अनुमान भी अनिर्वचनीय ही है। "अनुमीयतेऽनेनेत्यनुमानम्"—इस करणव्युत्पत्तिपक्ष में लिङ्ग के परामर्श (ज्ञान) को अनुमान कहते हैं।

खण्डन—इस लक्षण के घटक लिङ्ग की निरुक्ति होनी चाहिये, अतः पहिले यह कहिये कि लिङ्ग क्या वस्तु है ?

निर्वचन—पक्षवृत्ति धूमादि व्याप्तिविशिष्ट लिङ्ग है।

खण्डन—जिस धर्मी में साध्य का सन्देह हो वह पक्ष है—यहां सन्देह पक्ष में
उपलक्षण है वा विशेषण। यदि उपलक्षण मानें तो जहाँ पर्वत में वह्नि के प्रत्यक्ष होने पर
भी धूम का परामर्श होता है, वहां पर धूमपरामर्श अनुमान तथा धूम लिङ्ग कहा जावेगा।
वर्त्तमान जो सन्देह उससे उपलक्षित धर्मी में वृत्ति व्याप्तिविशिष्ट धूमादि लिङ्ग है और
प्रकृतस्थल में वर्त्तमान सन्देह नहीं है, अतः अतिप्रसङ्ग नहीं, यह कथन भी युक्त नहीं है,
कारण कि भूत, भविष्यत् भी [गुरुटीका कुरु-क्षेत्र इत्यादि स्थल में] गुरु, कुरु उपलक्षण
देखे जाते हैं। भावार्थ यह है कि वर्त्तमान, विशेषण ही होता है उपलक्षण नहीं, अतः
यदि सन्देह में वर्त्तमान विशेषण हो तो सन्देह धर्मी का विशेषण हुआ उपलक्षण न रहा
और यदि सन्देह को धर्मी का विशेषण मानें तो वह्नि के अनुमान होने पर वह्नि के अर्थ
प्रवृत्ति न होनी चाहिये, कारण कि धर्मी के नाश होने पर धर्म के अर्थ प्रवृत्ति नहीं होती
है और यहां वह्नि की अनुमिति होने पर सन्देह के नाश होने से सन्देहविशिष्ट धर्मी
का भी नाश ही है।

निर्वचन—सन्देहविशिष्ट पर्वत में विद्यमान धूम से केवल पर्वत में वह्नि की अनुमिति
होती है और साध्यसिद्धि से सन्देह के नाश होने पर भी पर्वत विद्यमान है, अतः धर्मी
के नाश के तुल्य अप्रवृत्ति नहीं होती है।

"आगमेनानुमानेन ध्यानाभ्यासरसेन च ।
त्रेधाऽऽत्मनि प्रमाणानां संप्लवः स्वार्थमिष्यत इति ॥४४॥

एतेन संशययोग्यताऽपि निरस्ता ॥८०॥

व्याप्यत्वमिति चेत् । किं वस्तुगत्या व्याप्यस्य स्वरूपेण परामर्शोऽनुमानं व्याप्यतया वा । नाद्यः अगृहीतव्याप्तिनाऽपि धूमादिपरामर्शस्यानुमानताप्रसङ्गात् । नापि द्वितीयः व्याप्त्युल्लेखिनः प्रमाणस्यानुमानत्वप्रसङ्गात् । तस्यापि व्याप्यत्वग्राहिताया अवश्यवक्तव्यत्वात् । अतएव द्वितीयतृतीयविशेषणे अपि निरस्ते । धारावाहिनि तथात्वापत्तेः । गृहीतव्याप्तिनाऽपि युगपदुभयग्रहणे द्वावेतौ व्याप्यव्यापकाविति

खण्डन—यदि सन्देहविशिष्टपर्वत में धूम है तथा केवल पर्वत में वह्नि है, तो नियत सामानाधिकरण्यरूप साध्य की व्याप्ति साधन में न रही।

निर्वचन—सन्देहविशिष्टपर्वत में यदि धूम है, तो केवल पर्वत में भी है कारण कि विशिष्ट में वृत्तिधर्म विशेष्य में भी रहता है, अतः पर्वत में साध्य तथा साधन दोनों हैं, अतः व्याप्ति का विलोप नहीं।

खण्डन—पर्वत में व्याप्तिविशिष्ट धूम के ज्ञान से ही सामान्य से वह्नि का पर्वत में ज्ञान होगा और विशेषज्ञान के विना सामान्य के अपर्यवसान से विशेषवह्नि का भी पर्वत में ज्ञान होगा, अतः पक्षधर्मत्व के निवेश का सामान्य वा विशेषरूप से साध्य की सिद्धि में उपयोग तो है नहीं, केवल सिद्धसाधनरूप दोष की निवृत्ति ही में उपयोग है और सिद्धसाधनस्वार्थानुमान में दोष नहीं है, कारण कि मुमुक्षुओं के आगम (श्रवण) अनुमान (मनन) ध्यान (निदिध्यासन रूप प्रत्यक्ष) के आत्मा में होने से प्रमाणत्रय के एक में सङ्कर तथा शब्दसिद्ध आत्मा में अनुमिति देखने में आती है, अतः अनुमिति मात्र के हेतु में पक्षधर्मता का निवेश नहीं हो सकता है।

निर्वचन—सन्देहयोग्य साध्य से विशिष्ट पर्वतादि पक्ष है तथा उक्त पक्ष में वृत्ति व्याप्तिविशिष्ट धूमादि लिङ्ग हैं।

खण्डन—व्यापक वह्नि आदि के प्रत्यक्ष होने पर भी हेतु धूमादि का ज्ञान परामर्श हो जायगा, कारण कि साध्य का निश्चय होने पर भी साध्य के सन्देह की योग्यता है ही। अन्यथा उक्त पक्ष में कालान्तर में भी अनुमिति न होगी ॥ ८० ॥

निर्वचन—व्याप्तिविशिष्ट लिङ्ग है और तत्परामर्श अनुमान है ईयत् मात्र ही रहे, पक्षधर्मत्व का लिङ्गलक्षण में निवेश न रहे हानि क्या है। (१)

खण्डन—क्या वस्तुतः जो हेतु व्याप्तिविशिष्ट है उस हेतु का स्वरूप से परामर्श अनुमान है अथवा व्याप्तिविशिष्टत्व रूप से हेतु का परामर्श अनुमान है। प्रथम पक्ष में जिस पुरुष को व्याप्तिग्रह नहीं हुआ हो उसका "पर्वतो धूमवान्" यह ज्ञान अनुमान हो जायगा। द्वितीय पक्ष में व्याप्ति को विषय करनेवाला "धूमाग्नी व्याप्तौ" यह ज्ञान अनुमान हो जायगा, कारण कि व्याप्ति के उल्लेखवाला उक्त ज्ञान का व्याप्यत्व भी विषय होता ही है

१ परार्थानुमान स्थल में सिद्धसाधन को दोष होने से वहां अतिव्याप्ति के वारणार्थ पक्षवृत्तित्व का निवेश आवश्यक है तथापि आपात से यह ग्रन्थ है

परामर्शस्यानुमानत्वप्रसङ्गात् । न च तदनुमानमेव, असन्दिग्धतया पक्षत्वाभावेन तद्धर्मस्य हेतोः सिद्धसाधनवदपक्षधर्मत्वात् ॥८१॥

स्वार्थानुमाने नाऽयं दोष इति चेन्न । प्रत्यक्षलक्षणोपपत्त्या साक्षात्त्वासाक्षात्त्वविरोधापत्तेः । अव्यापकविषयत्वे सतीति चेन्न । व्याप्यविषयत्वाभावप्रसङ्गात् । व्याप्यत्वं हि सप्रतियोगिकग्रहणं तथा चैतस्य व्याप्यमिदमिति गृह्यते तथा च सति व्यापकस्यापि विशेषणस्य ग्रहणमवश्यं वक्तव्यमन्यथा विशिष्टग्रहणस्य वक्तुमशक्यत्वात् । विशेषतो व्यापकाविषयत्वे सतीति चेन्न । अग्निधूमौ व्याप्तावित्याप्तोपदेशात्पूर्व्वं भूयोगृहीतवह्निधूमसाहचर्यस्य वन्हिधूमाग्रहणकाले विमर्शवशाद्वा जायमानव्याप्तिग्रहणस्य व्याप्यपरामर्शोऽनुमानं स्यात् । न परामर्शः प्रत्ययमात्रं येन प्रथमग्रहणे प्रसङ्गः स्यात् किन्नाम प्रत्यभिज्ञानमिति चेन्न । विचारादाप्तोपदेशाद्वा प्रतीत्य व्याप्तिं पुनराप्तोपदेशाद्विचाराद्वा यैव मया व्याप्तिर्गृहीता सैवेयमिति प्रत्यभिजानानस्य व्याप्तिज्ञानमनुमानं

द्वितीय लिङ्गपरामर्श "यत्र २ धूमस्तत्र २ वह्निः" अथवा तृतीय लिङ्गपरामार्श (धूमवांश्चायम्) अनुमान है—यह कथन भी उक्त दोष से ही युक्त नहीं है, किञ्च धारावाही ज्ञान के द्वितीय वा तृतीय "पर्वतो धूमवान्" यह ज्ञान अनुमान हो जायगा । किञ्च जहाँ व्याप्ति के प्रत्यक्ष के बाद "धूमवह्नी व्याप्यव्यापकौ" यह मानस ज्ञान हुआ, वहाँ वह ज्ञान अनुमान हो जायगा और यह ज्ञान अनुमान ही है ऐसी इष्टापत्ति नहीं कर सकते, कारण कि यहाँ साध्य के सन्देह न होने से पर्वत पक्ष नहीं है, अतः उस पर्वत में विद्यमान हेतु, सिद्धसाधनस्थल के तुल्य पक्षधर्म नहीं है ॥ ८१ ॥

समर्थन—स्वार्थ अनुमान में अपक्षधर्म्मत्व दोष नहीं है, अतः व्याप्तिप्रत्यक्ष के अनन्तर जात "धूमवह्नी व्याप्यव्यापकौ" यह धूमपरामर्श, अनुमान ही है ।

खण्डन—यदि उक्त परामर्श को अनुमान मान लें, तो इसके अनन्तर जात "पर्वतो वह्निमान्" यह ज्ञान अनुमान से जन्य होने से अनुमिति तथा चक्षु के अन्वय होने से प्रत्यक्ष है, अतः अनुमितित्व प्रत्यक्षत्व से सङ्करदोष हो जायगा ।

निर्वचन—व्यापकाऽविषयक जो व्याप्यपरामर्श वह अनुमान है ।

खण्डन—जो ज्ञान व्यापक को विषय नहीं करता हो वह व्याप्यविषयक हो नहीं सकता, कारण कि व्याप्य, व्यापक से निरूपित होता है अर्थात् "इसका यह व्याप्य है" ऐसा ही व्याप्य का ज्ञान होता है, अतः व्याप्ति में विशेषणरूप से व्यापक अवश्य भासता है । अन्यथा विशेषण के भान के बिना विशिष्ट का भान हो नहीं सकता है ॥

निर्वचन—जिस ज्ञान का विशेषरूप से व्यापक विषय न हो ऐसा जो व्याप्यपरामर्श वह अनुमान है ?

खण्डन—"धूमाग्नी व्याप्यव्यापकौ" इस आप्त के उपदेश से अथवा पूर्वकाल में जिस पुरुष को बार २ वह्नि-धूम का साहचर्य्य ज्ञान हुआ हो उस पुरुष के वह्निधूम के अप्रत्यक्ष काल में विचार (तर्क) से जात व्याप्य परामर्श अनुमान हो जायगा, कारण कि शाब्द वा मानस होने से उक्त ज्ञान में व्यापक विशेष रूप से नहीं भासता है ।

समर्थन—ज्ञानमात्र को परामर्श नहीं कहते हैं; किन्तु प्रत्यभिज्ञा को कहते हैं और उक्त शाब्द वा मानसज्ञान प्रत्यभिज्ञारूप नहीं है, अतः उक्त ज्ञान अनुमान नहीं होगा ।

स्यात्। विशेषतो व्याप्यविषयत्वे सतीति चेन्न। अव्यापकत्वप्रसङ्गात्। एकव्यक्तिविषयत्वस्य व्यक्त्यन्तरेऽसम्भवात्सामान्यतो व्यक्तिविषयत्वस्य चातिप्रसञ्जकत्वात्॥८२॥

किञ्च धूमवत्त्वादेर्यदाकदाचिदग्निमत्त्वं वा प्रतीयते तदानीं वाऽग्निमत्त्वं पर्व्वतादेः। नाद्यः तदानीमिवान्यदाऽप्यग्न्यर्थिप्रवृत्तेस्तत्र प्रसङ्गात्। न द्वितीयः तदानीमग्निमत्तया व्याप्तत्वानवगमात्। तदेति धूमकालोऽपेक्षित इति चेन्न। क्वचिद्देशेऽन्यदाऽपि धूमस्यावस्थानमस्तीति कालान्तरस्यापि धूमकालत्वात्। तद्धूमकालोऽपेक्षित इति चेन्न। तच्छब्दस्य व्यक्तिविशेषवचनत्वेऽप्रतीतव्याप्तिकत्वं यत्किञ्चिद्व्यक्तिवचनत्वे चोक्तदोषापत्तिः। हेतोः पक्षधर्मतयाप्यपर्व्वतादिधर्मः साध्यो माभूत्तदस्तु कालान्तरे किं न

खण्डन—विचार वा आप्तोपदेश से व्याप्तिज्ञान होने पर जायमान—विचार वा आप्तोपदेश से जो व्याप्ति गृहीत हुई थी, वही यह व्याप्ति है—इस व्याप्ति प्रत्यभिज्ञा में अनुमानत्व हो जायगा।

निर्वचन—जिसका विशेष रूप से व्यापक तो विषय हो नहीं, ऐसा विशेषरूप से व्याप्यविषयक परामर्श अनुमान है?

खण्डन—विशेष से व्याप्तिविषयक हो इस वाक्य का पर्वतादिनिष्ठ तत्तद्धूमादि विषयक हो यह अर्थ है, वा सामान्य से व्यक्तित्वाधिकरण-विषयक हो वह अर्थ विवक्षित है। प्रथम पक्ष में अरण्यादिगत धूमपरामर्श में अव्याप्ति हो जायगी, कारण कि लक्षण में पर्वतगतधूम व्याप्ति का निवेश होने से अरण्यगतधूम में उक्त लक्षण का असम्भव है। द्वितीय पक्ष में सामान्य से व्यक्तित्वाधिकरण प्रत्यभिज्ञान का भी विषय है, अतः पूर्व उक्त प्रत्यभिज्ञा में अतिव्याप्ति हो जायगी॥८२॥

किञ्च—धूम से पर्वत में जिस किसी काल से सम्बद्ध वह्नि की प्रतीति होती है अथवा उसी काल से सम्बद्ध वह्नि की प्रतीति होती है—इन दोनों में प्रथम पक्ष युक्त नहीं, कारण कि जैसे उस काल में अग्नि के अर्थ मनुष्यों की प्रवृत्ति होती है वैसे ही अन्यकाल में भी प्रवृत्ति हो जायगी। और द्वितीय कल्प भी युक्त नहीं, कारण कि तात्कालिकत्वरूप से अग्नि की धूम में व्याप्ति नहीं है, किन्तु अग्नित्वरूप से ही अग्नि की धूम में व्याप्ति है।

निर्वचन—"यदा २ धूमस्तदा २ वह्निः" ईदृशव्याप्तिग्रह में काल भासता है, अतः धूमकालिक अग्नि की अनुमिति होती है।

खण्डन—किसी देश में दूसरे काल में भी धूम रहता है, अतः अन्यकाल को भी धूमकाल होने से अन्यकाल में भी अग्न्यर्थी की प्रवृत्ति होनी चाहिये।

निर्वचन—तद्शब्द परामर्शविषय धूमपरक है, अतः अन्यकाल में अग्न्यर्थी की प्रवृत्ति नहीं होती है।

खण्डन—यदि तद्शब्द को परामर्शविषय तत्तद्धूमव्यक्तिपरक मानें, तो तत्तद्धूमव्यक्तिविशेष में विशेषरूप से व्याप्तिग्रह है नहीं, फिर अनुमिति में उस काल का स्फुरण कैसे होगा। यदि तद्शब्द का जिस व्यक्ति में व्याप्तिग्रह हुआ है उस व्यक्तिपरक मानें तो सम्भव है कि अन्यकाल में विद्यमान धूम में भी व्याप्तिग्रह हुआ हो, अतः अन्यकाल में भी प्रवृत्ति हो जायगी।

स्यात्। तं कालमन्तर्भाव्य पक्षत्वे कथं पश्चान्निष्कम्पं प्रवर्त्तेत। धूमकालमन्तर्भाव्य चेदुक्तमावर्त्तते। तद्धूमकालश्चेदंशतः स्ववृत्तिः॥ ८३॥

कश्च व्याप्तिशब्दार्थ इति वक्तव्यम्। अविनाभावइति चेन्न। किमेकस्याव्यतिरेकेऽपरस्य भावोऽविनाभावपदार्थः, उत एकस्य व्यतिरेकेऽपरस्य व्यतिरेकः। यद्याद्यस्तदाऽव्यतिरेकोऽन्वयार्थ इत्येकस्यान्वयेऽपरस्यान्वय इत्युक्तं स्यात्। एवञ्च सति पार्थिवत्वलोहलेख्यत्वयोरन्ययो व्याप्तिः स्यात्।

न काचित्कः सम्बन्धो व्याप्तिः सार्व्वत्रिकस्य तथात्वेन विवक्षितत्वादिति चेत्। किमिदं सार्व्वत्रिकत्वं सम्बन्धस्य। सर्वासु तज्जातीयव्यक्तिषु विद्यमानतेति चेत्। नेयं सर्वतज्जातीयव्यक्त्यपरिज्ञाने शक्यावधारणा। न च सर्व्वास्ता व्यक्तयो विशेषतो ज्ञातुं शक्यास्तत्तत्प्रमितिकरणासम्भवात्।

हेतु में पक्षधर्मता केवल से पक्ष में ही वह्नि की सिद्धि होती है अपक्ष में नहीं, यह तो हो सकता है; परन्तु अन्यकाल में अग्नि की सिद्धि क्यों नहीं।

निर्वचन—अनुमितिकाल से वा लिङ्गकाल से विशिष्ट संदिग्धसाध्य धर्म्मी पक्ष है, अतः लिङ्गकाल अनुमिति में भासता है।

खण्डन—यदि लिङ्गकालविशिष्ट को पक्ष मानेंगे, तो लिङ्गकाल के नाश होने पर धर्म्मी के नाश के तुल्य प्रवृत्ति नहीं होगी।

निर्वचन—लिङ्गकाल, पक्ष में विशेषणरूप से नहीं भासता है, किन्तु धूमकाल भासता है और धूमकाल धूम की अनुवृत्ति होने से प्रवृत्ति काल भी है, अतः हानि नहीं।

खण्डन—यदि धूमकाल को पक्ष में विशेषण मानें, तो अन्य काल भी धूमकाल है अतः अन्यकाल में भी प्रवृत्ति होनी चाहिये। यदि च तद्धूमकाल, पक्ष में विशेषण मानें, तो "तद्धूमकालविशिष्टपर्वतः धूमवान्" ऐसा पक्षधर्म्मता के ज्ञान के होने से अंशतः धूम में धूमवृत्तित्व हो जायगा॥ ८३॥

किञ्च यह भी कहना चाहिये कि व्याप्ति शब्द का क्या अर्थ है यदि अविनाभाव को व्याप्ति शब्द का अर्थ कहें, तो क्या एक के अव्यतिरेक में अपर का भाव अविनाभाव शब्द का अर्थ है अथवा एक के व्यतिरेक में अपर का व्यतिरेक, अविनाभाव शब्द का अर्थ है? यदि प्रथम पक्ष है तो अव्यतिरेक अन्वय है, अतः एक के अन्वय में अपर का अन्वय—यह अर्थ हुआ ऐसा माननेपर लोहलेख्यत्व (कुठारादिच्छेद्यत्व) रूप साध्य का पार्थिवत्व में व्याप्ति हो जायगी, कारण कि एक पार्थिवत्व का जिस काष्ठादि में अन्वय है वहाँ लोहलेख्यत्व का भी अन्वय है।

समर्थन—काचित्कसम्बन्ध (अन्वय) व्याप्ति नहीं है, किन्तु सार्वत्रिक सम्बन्ध व्याप्ति है और सार्वत्रिक पार्थिवत्व का लोहलेख्यत्व में अन्वय, वज्र (हीरा) में व्यभिचार होने से नहीं है।

खण्डन—सम्बन्ध में सार्वत्रिकत्व क्या वस्तु है। यदि तज्जातीय सर्वव्यक्तियों में विद्यमानता है तो यावत् सर्वव्यक्तियों का ज्ञान न हो तावत् सर्वव्यक्तियों में सम्बन्ध की विद्यमानता का ज्ञान हो नहीं सकता और सब व्यक्तियों का विशेषरूप से ज्ञान कारण के न होने से हो नहीं सकता।

इन्द्रियेण सामान्यलक्षणया प्रत्यासत्त्या व्याप्तिग्रहणकाले सर्वास्तज्जातीयव्यक्तयो गृह्यन्ते यदनभ्युपगमे पण्डकमुद्वाह्य मुग्धायाः पुत्रप्रार्थनमिवेति वाचस्पतिरुपालम्भमवादीदिति चेत्। मैवम्। सामान्यलक्षणया प्रत्यासत्त्या व्याप्तिं गृह्णतः सार्वज्ञ्यप्रसङ्गात् ॥ ८४ ॥

क्वचिदप्यज्ञानं ते न स्यादिति च सार्व्वज्ञ्यापादनमिति न प्रतिकृत्यापि। प्रमेयतया व्याप्तिग्रहणकाले सर्वतज्जातीयव्यक्तिग्रहणे प्रमेयत्त्वादिसर्व्वं तदा ज्ञायत एव न तु रूपान्तरेणेति चेन्न। यदि रूपान्तरेण तत् प्रमेयं तदा रूपान्तरवतोऽपि प्रमेयत्वाधारतया कथमग्रहणम्। अथ न प्रमेयं नास्त्येव रूपान्तरेण तत्। येन तु रूपेणास्ति तेन सर्व्वेण प्रमेयमिति यावद्विद्यमानाकारेण ज्ञातत्वप्रसङ्गः। तथात्वस्वीकारे च ज्ञायतां प्रमेयत्वदर्शिना भवता मामकी चित्तवृत्तिः ततः श्रद्धास्ये ॥ ८५ ॥

समर्थन—चक्षुरिन्द्रिय से सामान्यलक्षणा प्रत्यासत्ति (सन्निकर्ष) द्वारा व्याप्ति ग्रह काल में सबव्यक्तियों का ग्रहण (ज्ञान) होता है। जिस सामान्यलक्षणा प्रत्यासत्ति के अस्वीकार में व्याप्ति के ग्रह का स्वीकार, पण्डक से विवाह कर मुग्धा स्त्री की पुत्र प्रार्थना के तुल्य है, ऐसा उपालम्भ वाचस्पति मिश्र ने किया है।

खण्डन—यदि सामान्यलक्षणा प्रत्यासत्ति से व्याप्तिग्रहण काल में सब व्यक्तियों का ग्रहण मानें, तो प्रमेयत्व के व्याप्तिग्रह काल में प्रमेयमात्र के ग्रह होने से मनुष्यमात्र को सर्वज्ञ हो जाना चाहिये ॥ ८४ ॥

प्रतिवन्दी सर्वज्ञत्व का प्रसङ्ग हो जायगा यह दोष का प्रसङ्ग भी सर्व ज्ञान के बिना हो नहीं सकता है, कारण कि जब आप सर्व को जानते ही नहीं है फिर मुझ मे सर्व ज्ञान का प्रसङ्ग (आरोप) करेंगे कैसे, अतः आपको भी सर्वज्ञत्व हो जायगा।

उत्तर—यह प्रतिकृत्या (प्रतिवन्दी) भी युक्त नहीं है। अनिष्टकारक देवता को कृत्या कहते हैं और उस देवता के निवारक देवता को प्रतिकृत्या कहते हैं। प्रकरण में लक्षण से प्रतिकृत्या शब्द प्रतिवन्दीपरक है, कारण कि मेरे चित्त में क्या है इस प्रश्न के उत्तर न देने से मेरे हृद्गत वस्तु को आप नहीं जानते यह बात सिद्ध होती है वह बात मेरे हृद्गत वस्तु के जानने पर नहीं हो सकती यह सर्वज्ञत्वापादन का आशय है।

समर्थन—सामान्यलक्षणा से प्रमेयत्वरूप से सर्व के ग्रहण होने पर भी रूपान्तर (तत्तद्रूप) से सर्व का ग्रहण नहीं होता है, अतः सर्वज्ञत्व प्रसङ्ग नहीं।

खण्डन—यदि तत्तद्रूप से तत् तत् वस्तु प्रमेय है, तो तत्तद्रूपविशिष्ट तत्तद्वस्तु को प्रमेयत्व रूप का आधार होने से प्रमेयत्व रूप से ग्रहण क्यों न हो, यदि अन्यरूप से वह प्रमेय नहीं है तो अन्यरूप से वह है नहीं, जिस रूप से वह है उस रूपसे वह प्रमेय है, अतः यावत् विद्यमान आकार से ग्रहण का प्रसंग हो जायगा। यदि आप मान लें कि यावत् विद्यमान आकार से सब वस्तु ज्ञेय है-तो प्रमेयत्व से सब वस्तु को देखनेवाले आप मेरे चित्त में वर्तमान वस्तु को जान लें, फिर आपके वचन में मैं श्रद्धा करूँगा ॥ ८५ ॥

समर्थन—जैसे अन्योन्याभाव, वैधर्म्य आदि रूपभेद, वस्तुओं में पृथक्त्वरूप है, वैसेही एकत्व, प्रमेयत्व आदि भी वस्तुओं का ऐक्यरूप ही है, तब प्रमेयत्व आदि भी

स्यादेतत् यथा भेदोऽन्योन्याभाववैधर्म्यादिः पृथक् तथैक्यमपि वस्तूनां, ततः प्रमेयत्वाद्यपि धर्मिणामेकत्वमेकमेव ततः प्रमेयत्वेन ज्ञायमानं तत् सर्वमपि तेनैक्येन प्रतीयमानैकव्यक्त्यात्मकमेव ज्ञायमानं भवतीति कथं तदेकत्ववेदिनः सार्व्वज्ञ्यम्। नच वाच्यं ननात्वमपि व्यक्तीनां प्रमेयमिति तदपि धर्मितया ग्राह्यमेवेति, यतस्तदपि प्रमेयत्वादिना गृह्यमाणमेकमेव गृहीतं भवतीति। तस्मात्—

"एको भावस्तत्त्वतो येन दृष्टः

सर्व्वे भावास्तत्त्वतस्तेन दृष्टा इति।,,

तत्त्वतस्ताद्रूप्येण एकीभूता इति। तदेतदपि नोपपन्नम्। नानैकमिति व्याहतप्रतीत्यापत्तेः॥

अथ रूपान्तरेण नानात्वं प्रमेयत्वादिना चैक्यमिति व्यवस्थित्या न व्याघातः स्यात्। तर्हि प्रमेयत्वाद्याधारस्य व्यक्तिभेदस्य कृत्स्नस्य ग्रहणात् सार्वज्ञापत्तिस्तादवस्थ्येवेति॥ ८६॥

धर्मियों के ऐक्यरूपही है, तस्मात् प्रमेयत्व रूप से ज्ञायमान वह सर्ववस्तु ऐक्यरूप से प्रतीयमान एक रूपात्मक ही ज्ञात होता है, अतः एकत्ववेदी के ऊपर सर्वज्ञत्व का प्रसङ्ग कैसे हो सकता है। यदि कहें कि व्यक्तियों का नानात्व भी प्रमेयत्व रूप से ज्ञात होता है अतः वस्तु नाना हैं तो यह युक्त नही है, कारण कि नानात्व भी प्रमेयत्व रूप से गृहीत एक ही होता है। यह कहा भी है कि जिस पुरुष ने एक भाव (वस्तु) को प्रमेयत्वादिरूप से देखा है उस पुरुष ने संपूर्ण भावों को प्रमेयत्वादि रूप से एकता को प्राप्त, ही देखा है।

खण्डन—यदि ऐसा मानें तो "नाना एक हैं" ऐसी व्याहत प्रतीति होने लगेगी। यदि कहें कि अन्यरूप से नाना है तथा प्रमेयत्व रूप से एक है, अतः व्याहत प्रतीति नहीं होगी तो प्रमेयत्व के आधार भिन्न २ सब व्यक्तियों के ग्रहण होने से सर्वज्ञत्व का आपादनरूप दोष पूर्ववत् ही रहा॥ ८६॥

किञ्च सामान्यलक्षणा प्रत्यासत्ति से सब व्यक्तियों के ज्ञान होने पर भी उन व्यक्तियों में व्याप्तिरूप सम्बन्ध में क्या प्रमाण है।

समर्थन—सब व्यक्तियों के तुल्य उनके व्याप्तिरूप सम्बन्ध (ज्ञान) में भी इन्द्रिय ही करण है और सामान्यलक्षणा प्रत्यासत्ति ही सन्निकर्ष है। अतः सम्बन्ध में इन्द्रिय ही प्रमाण है।

खण्डन—यदि सम्बन्ध में इन्द्रिय को प्रमाण मानें, तो (यत्र २ पार्थिवत्वम् तत्र २ लोहलेख्यत्वम्) ऐसा व्याप्ति निश्चय होने पर भी जो कहीं वज्र में व्यभिचार देखा जाता है वह न होना चाहिये, कारण कि इन्द्रिय से व्याप्तिरूप सम्बन्ध प्रमित है।

समर्थन—वहां व्याप्तिरूप सम्बन्ध की प्रतीति भ्रमरूप है, कारण कि पीछे बाधित होती है।

खण्डन—वह्नि के धूम में व्याप्ति ग्रह का जो इन्द्रिय और सामान्यलक्षणा प्रत्यासत्ति आदि कारण हैं, वे ही पार्थिवत्व के लोहलेख्यत्व में व्याप्ति ग्रह के भी कारण हैं, फिर जब कारण एक हैं तब पूर्वस्थल में अभ्रान्ति है उत्तरस्थल में भ्रान्ति है—यह विभाग हो नहीं सकता। पूर्वस्थल में दोष नहीं है उत्तरस्थल में दोष है यह विवेचन भी दुष्कर है।

किञ्च सामान्यलक्षणया प्रत्यासत्त्या तज्जातीयविशेषग्रहणे तासु सर्व्वासु व्यक्तिषु सम्बन्धास्तित्वे किं प्रमाणम्। सर्व्वव्यक्तिवत्तत्सम्बन्धग्रहेऽपि व्याप्तिग्राहकमिन्द्रियमेव प्रमाणमिति चेत्तर्हि क्वचिदेवमवधारितस्य यद्व्यभिचारो दृश्यते तन्न स्यात् इन्द्रियेण तत्सम्बन्धस्य प्रमितत्वात्। भ्रान्तिस्तत्र सम्बन्धप्रतीतिः पश्चाद्बाधादिति चेन्न। सामग्र्यभेदे काचिद्भ्रान्तिः काचिदभ्रान्तिरिति विभागानुपपत्तेः दोषादोषवैचित्र्यविवेचनस्य च दुष्करत्वात्।

कार्य्यभेदादेव सामग्रीभेदोऽप्युन्नेय इति चेत्। उन्नीयताम्। स एव तु कीदृगुन्नेय इति वाच्यम्। न तावत्सार्व्वत्रिकसम्बन्धभावाभावात्मकस्तदानीं भाविनां सम्बन्धानामसत्त्वेनाकारणत्वात्। सामान्यतश्च तज्जातीययोः सम्बन्धस्य प्रतीतेः पूर्व्वं सत्त्वं भ्रान्त्यभ्रान्तिसाधारणं, क्वचिदपि सम्बन्धाभावे भ्रान्तेरनुत्पादात्॥ ८७॥

किमेतावता अन्यएव तर्हि कार्य्यभेदात्कारणभेदः कल्पयिष्यत इति चेत्। स हि किमिन्द्रियसहकारिभूतः करणान्तरमेव वा कल्पनीय इति वाच्यम्। नाद्यः इन्द्रि-

---

समर्थन—कार्य्यभेद से अर्थात् पूर्वस्थल में प्रमाणरूप तथा उत्तरस्थल में भ्रमरूप व्याप्तिग्रह होता है इससे सामग्रीभेद को अनुमिति करनी चाहिये।

खण्डन—अनुमिति कीजिये, परन्तु यह कहिये कि वह सामग्रीभेद क्या है, वह्निधूम स्थल में सार्वत्रिक सम्बन्ध है और लोहलेख्यत्व पार्थिवत्वस्थल में सार्वत्रिक सम्बन्ध नहीं है। यह सामग्रीभेद तो आप नहीं कह सकते हैं, कारण कि व्याप्तिग्रहकाल में भावी सम्बन्ध है नहीं, अतः व्याप्तिग्रह के भावी सम्बन्ध कारण नहीं हो सकते हैं—यदि कहें कि सामान्यरूप से वह्नि धूमजातीय के सम्बन्ध व्याप्तिधूमग्रह से पूर्व विद्यमान है तो लोहलेख्यत्व और पार्थिवत्व का सम्बन्ध भी सामान्यरूप से काष्ठादि में व्याप्ति ग्रहकाल में विद्यमान ही है। यदि कहीं भी लोहलेख्यत्व पार्थिवत्व के सम्बन्ध का ग्रह न हो तो भ्रान्ति होगी कैसे ॥८७॥

समर्थन—कार्यभेद से कारणभेद की कल्पना करेंगे और वह सार्वत्रिक सम्बन्ध से अन्य ही है।

खण्डन—वह कारण क्या इन्द्रिय का सहकारी है? अथवा स्वतन्त्र (इन्द्रियनिरपेक्ष) अन्य ही कारण है। इनमें प्रथम पक्ष युक्त नहीं है; क्यों कि इन्द्रियाँ भावी भूत के सम्बन्ध (व्याप्ति) अंश में कारण नहीं हो सकती हैं और इन्द्रिय के व्यापार न होने पर भी वह्नि की व्याप्ति धूम में न हो तो भूयः सहदर्शन नहीं हो सकता है। इस विचारवाले मनुष्य को पूर्व प्रतीति परस्परसम्बद्ध धर्म्मिद्वय की व्याप्तिग्रह (ज्ञान) देखा जाता है यदि कहें कि चक्षुरादि के उपरामकाल में भी मनरूप इन्द्रिय है तो युक्त नहीं, कारण कि मन व्याप्तिग्रह में चाक्षुषादि ज्ञान के तुल्य कारण तो है, परन्तु परिकल्पनीयसहकारी से ही सर्वदोष की निवृत्ति होने से मन के करणत्व में प्रमाण नहीं है। जैसे चाक्षुषादि ज्ञान में चक्षु कारण है वैसे ही व्याप्तिग्रह में भी मन से अन्य ही कारण कल्पनीय है, और वह यदि व्याप्तिग्रह को प्रत्यक्ष मानें तो सप्तम इन्द्रिय हो जायगा, अन्यथा यदि मन को ही कारण मानें तो चाक्षुषादिज्ञान में भी चक्षु करण न होगा, कारण कि कह सकते हैं कि मन ही सुखानुभव के तुल्य चाक्षुष में भी करण है चक्षुसहकारी मात्र है।

यस्य भाविभूतसम्बन्धांशे प्रमाणत्वकल्पनायां प्रमाणाभावात् । प्रत्युत व्युपरतेन्द्रियव्यापारस्यापि विचारयतः पूर्वप्रतीतसम्बन्धधर्म्मिद्वयस्य व्याप्त्यवधारणदर्शनात् । तत्रापि मनोऽस्तीन्द्रियमिति चेत् अस्तु, तस्मिन् कार्य्ये मनसः करणत्वे तु प्रमाणाभावः । अवश्यपरिकल्पनीयेनान्येनैव सर्वानुपपत्त्युपशान्तेः । कारणत्वमात्रं तु चक्षुरादिजज्ञानवन्मनसस्तत्र स्यात् । चक्षुरादिवत्करणमन्यदेव तत्कल्पनीयमिति सप्तममिन्द्रियं प्रमाणान्तरं वा प्रसज्येत । अन्यथा चाक्षुषादिप्रतीतावपि चक्षुरादेः करणत्वं न स्यात् । शक्यते तत्रापि वक्तुं मन एव तत्र सुखादिप्रतीतिवत्करणं, चक्षुरादयस्तु सहकारिमात्रम् । नापि द्वितीयः, इन्द्रियान्तरप्रसङ्गात् प्रमाणान्तरप्रसङ्गाद्वा ॥८८॥

नापि विनाभाव एकस्य व्यतिरेकेणापरस्याव्यतिरेकस्तन्निषेधोऽविनाभाव इति द्वितीयः पक्षः । एवं हि लोहलेख्यत्वव्यतिरेकश्च पार्थिवत्वव्यतिरेकश्च क्वचिदस्तीति पार्थिवत्वलोहलेख्यत्वयोरप्यविनाभावः प्रसज्येत । सार्व्वत्रिकं व्यतिरेकयौगपद्यं विवक्षितं न तु क्वाचित्कम्, अत एवोच्यते अविनाभावनियम इति चेन्न । सार्व्वत्रिकान्वयावधारणनिरासन्यायेन सार्व्वत्रिकव्यतिरेकावधारणस्याप्यशक्यत्वात् । शक्यत्वे चाऽन्वयावधारणमेवास्तु सार्वत्रिकं, कृतं व्यतिरेकावधारणकुटिलिकया ।

स्वतन्त्र कारण भी नहीं है, कारण कि यह सप्तम इन्द्रिय वा पञ्चम प्रमाण हो जायगा ॥८८॥

एक के व्यतिरेक में अपर का अव्यतिरेक विनाभाव है और उसका निषेध अविनाभाव है—यह द्वितीय पक्ष भी युक्त नहीं है, कारण कि ऐसा होने पर लोहलेख्यत्व का व्यतिरेक (अभाव) और पार्थिवत्व का व्यतिरेक भी कहीं आकाश में है, अतः पार्थिवत्व लोहलेख्यत्व का भी अविनाभाव (व्याप्ति) हो जायगा ।

समर्थन—सार्वत्रिक व्यतिरेक का साहित्य विवक्षित है, क्वाचित्क साहित्य विवक्षित नहीं है । इसीसे अविनाभाव का नियम व्याप्ति है— ऐसा कहा है ।

खण्डन—सार्वत्रिक अन्वय के ज्ञान के तुल्य सार्वत्रिक व्यतिरेक का ज्ञान सामान्यलक्षणा के न होने से, शक्य नहीं है । किसी प्रकार अवधारण शक्य भी हो तो अन्वय का अवधारण ही व्याप्ति रहे, व्यतिरेक का अवधारण व्याप्ति है—यह कुटिलिका (वक्रोक्ति) व्यर्थ है ।

समर्थन—जिन साध्यसाधन के मध्य में साधन के—विपक्ष (साध्याभावाधिकरण) में—वृत्तित्व का बाधक वृत्तित्वाभाव का साधक हो उन दोनों का अन्वय, व्याप्ति है—ऐसा कोई आचार्य कहते हैं ?

खण्डन—यह भी युक्त नहीं है, कारण कि विपक्ष में वृत्तित्व का बाधक प्रमाण है वा तर्क ? यदि प्रमाण हो तो उनमें चक्षुरादि इन्द्रियां तो हो नहीं सकतीं, कारण कि इन्द्रियां, सम्बद्धमात्र को ग्रहण करती हैं, अतः इन्द्रिय से अतीत अनागत असन्निकृष्टविपक्ष का ज्ञान हो नहीं सकता, अन्यथा (यदि इन्द्रिय से हेतु में अतीत अनागत विपक्ष वृत्तित्वाभाव का ग्रहण मानें) कहीं भी व्यभिचार का सन्देह नहीं होना चाहिये ।

"ह्रदादिर् धूमाभाववान् वह्न्यभावात्" इत्याकारक अनुमिति भी विपक्ष का बाधक प्रमाण नहीं हो सकती है, कारण कि उक्तस्थल में धूमाभाव की जो वह्न्यभाव में व्याप्ति है

यत्र विपक्षे वृत्तौ बाधकमस्ति तयोरन्वयो व्याप्तिरिति केचित्। तन्न। यत्तु विपक्षे वृत्तौ बाधकं तत्प्रमाणं वा तर्को वा स्यात्। आद्ये न तावदिन्द्रियं तदसम्भवात्। अन्यथा व्यभिचाराव्यभिचारसंशयो न स्यात्। नाप्यनुमानम्। अनवस्थाप्रसङ्गात्। नाप्यर्थापत्तिः, अनुमानाव्यतिरेकात्। व्यतिरेके वा यदि लिङ्गिव्यतिरेकेण लिङ्गस्यानुपपत्तिस्तदा तत एव लिङ्गिसिद्धेः कृतमनुमानेन। अनेवम्भावे च तयोः किमायातम् ॥ ८६ ॥

अस्तु वा कथमपि तावदर्थापत्तिर्बाधिका, तथापि कीदृगभ्युपगम इति प्रष्टव्यम्। किं विपक्षवृत्तिबाधकसध्रीचीनो यत्र क्वचिदन्वयो व्याप्तिः, उत तत्सहितः सार्व्वत्रिकोऽन्वयः, उत किं नो विशेषगवेषणेन तत्सध्रीचीनः सामान्यतोऽन्वयो व्याप्तिः, उत सार्वत्रिकान्वयः स च विपक्षे बाधकादवगम्यते। नाद्यः विकल्पानुपपत्तेः, तथा हि किं विपक्षे वृत्तौ बाधकं सर्व्वव्यक्तिविषयमुत सामान्यविषयम्। आद्ये यत्राप्यनुमानं प्रवर्त्तनीयं तत्रावश्योपस्थाप्यया अन्यथाभावबाधकभूतयाऽर्थापत्त्यैव साध्यसिद्धेः शान्तमनुमानव्यसनेन ॥९०॥

उसके घटक विपक्ष का बाधक भी अनुमिति ही है, इस प्रकार अनवस्था हो जायगी। अर्थापत्ति भी विपक्ष में बाधक प्रमाण नहीं है, कारण कि अनुमिति में ही अर्थापत्ति का अन्तर्भाव है। यदि अर्थापत्ति को अनुमिति से पृथक् भी मानें तो भी यदि अर्थापत्ति को साध्य के अभाव में हेतु की अनुपपत्तिरूप मानें तो उसीसे (अर्थापत्ति से) ही साध्य की सिद्धि होने से अनुमान व्यर्थ हो जायगा। यदि अन्यरूप अर्थात् कारण आदि के विना कार्य्य आदि की अनुपपत्ति रूप मानें तो प्रकृत (विपक्षबाधकस्थल) में धूमाभावरूप साध्य तथा वह्न्यभावरूप हेतु को उससे क्या लाभ हुआ अर्थात् अर्थापत्ति से विपक्ष में धूम के बाध की सिद्धि नहीं हुई ॥ ८६ ॥

किसी प्रकार से विपक्ष में हेतु का बाधक अर्थापत्तिरूप प्रमाण हो तब भी यह पूछना है कि व्याप्ति का स्वरूप कैसा हुआ। क्या विपक्षवृत्तित्व के बाधक से सहित जिस किसी अधिकरण में अन्वय, व्याप्ति है अथवा विपक्षवृत्तित्व के बाधक से सहित सार्वत्रिक अन्वय, व्याप्ति है। अथवा विशेष विवरण (विचार) से क्या लाभ है। विपक्ष-वृत्तित्व के बाधक से सहित सामान्य से अन्वय व्याप्ति है। अथवा सार्वत्रिक अन्वय व्याप्ति है, और उसका ज्ञान विपक्ष में बाधक प्रमाण से होता है। इनमें प्रथम कल्प युक्त नहीं है, कारण कि विकल्प की उपपत्ति नहीं है। देखिये—क्या विपक्ष में हेतु के वृत्तित्व का बाधक; सर्वव्यक्तिविषयक होना चाहिये। अथवा सामान्यविषयक होना चाहिये। प्रथम कल्प में जिस पक्ष में साध्य की अनुमिति करनी है उस पक्ष में भी "अग्न्यभावे सति धूमाभावः" इस अन्यथाभाव के बाधक अर्थापत्ति से ही (अग्न्यभावे धूमभावोऽनुपपन्नः इति धूमभावेन वह्निभावः कल्प्यते) इस प्रकार साध्य की सिद्धि होने से अनुमान का व्यसन व्यर्थ है ॥ ६० ॥

द्वितीयकल्प में कहीं वज्रादि में व्यभिचार होने पर भी कहीं काष्ठादि में अव्यभिचार का आश्रयण कर बाधक अर्थापत्ति चरितार्थ (सफल) हो सकती है, कारण कि धूम का अधिकरणत्वमात्र अग्नि के अधिकरणत्वमात्र का व्यतिरेकी (विरोधी) है—ऐसा सामान्यतः

द्वितीये क्वचिद्व्यभिचारेऽपि क्वचिदव्यभिचारमाश्रित्य बाधकस्य चरितार्थत्त्वं धूमवत्तामात्रमग्निमत्तामात्रव्यतिरेकीत्येवंरूपो हि सामान्यतो विपक्षपक्षः, तत्र च बाधकं तयोरविरोधे पर्य्यवस्यति । अविरोधश्च क्वचित्साहित्याद्भवत्येवेति पार्थिवत्वलोहलेख्यत्वयोरप्येवम्भूतव्याप्तत्वप्रसङ्गः ।

नापि द्वितीयः विशेषणवैयर्थ्यात् । सार्वत्रिकोऽन्वय इत्येवोच्यताम् । न च सोऽपि सङ्गत इत्युक्तम् । नाऽपि तृतीयः । बाधकस्य सामान्यविशेषविषयताविकल्पोक्तयुक्त्यैव निरस्तत्वात् ॥ ६१ ॥

नापि चतुर्थः । तथा हि यद्धूमवत् तदग्निमदित्यत्रेदमन्वयस्य सार्वत्रिकत्वं वाच्यं, यत्सर्वासां धूमव्यक्तीनामग्निसम्बन्धित्वं, तद्यदि व्याप्तिग्रहकाले गृहीतं तदा पक्षस्यापि धूमवद्व्यक्तेरग्निमत्त्वं प्राक् गृहीतं स्मर्य्यत एवेति गतमनुमानम् । सामान्याऽग्निमत्त्वं तस्यापि गृहीतमेव विशेषतस्त्वनुमीयत इति चेन्न । विशेषत इति किमग्निमत्त्वस्य विशेषो व्यक्तिरूपो विवक्षितः, उत कालदेशादिसम्बन्धस्तस्य । नाद्यः सर्वव्यक्तीनां व्याप्तौ प्रतीतत्वेन भवतैवाङ्गीकारात् । । नापि द्वितीयः, अग्निमद्रूपतया स्मृतस्य पक्षीभूतस्य धूमवद्विशेषस्य चक्षुरादिभिरेव पर्वतत्वादिदेशकालविशेषादिमत्तया परिच्छेदात् । यथा प्राक्प्रत्ययाहितसंस्कारसध्रीचीनैश्चक्षुरादिभिः परिच्छिद्यमानेदानीम्भावदेशविशेषाव-

---

विपक्ष है। वहां बाधक अर्थापत्ति "धूमवत्तामात्रमग्निमत्तामात्रविरोधीति अनुपपन्नमिति—" धूमवत्तामात्रं अग्निमत्तामात्राविरोधि" इस प्रकार उन दोनों के अविरोध में पर्य्यवसित होता है। अविरोध कहीं साहित्य से भी होता ही है अतः लोहलेख्यत्व की पार्थिवत्व में व्याप्ति हो जायगी ॥ द्वितीयपक्ष भी युक्त नहीं है, कारण कि सार्वत्रिक अन्वय व्याप्ति है-इयन्मात्र कहने से ही कोई दोष नहीं होने से—विपक्षवृत्तिबाधकसहितरूप-विशेषण व्यर्थ हो जायगा। सार्वत्रिक अन्वय भी ग्राहक प्रमाण न होने से व्याप्ति नहीं है यह हम कह चुके हैं।

तृतीयकल्प भी युक्त नहीं, कारण कि विपक्ष में बाधक, सर्वव्यक्तिविषयक हो वा यत्किञ्चित्विषयक हो इस रीति से विकल्प कर प्रथमपक्ष के तुल्य खण्डित है ॥ ६१ ॥

चतुर्थ पक्ष भी युक्त नहीं, कारण कि "यत् धूमवत् तत् वह्निमत्" यहां अन्वय का सार्वत्रिकत्व यह है कि सर्वधूमवद् व्यक्तियों के अग्निसम्बन्धित्व, वह यदि व्याप्ति काल में गृहीत है तो धूमवत् पर्वतव्यक्ति का अग्निमत्व पहिले से ही गृहीत है, उसीका स्मरण होगा अतः अनुमान व्यर्थ है।

समर्थन—सामान्य से धूमवत्पर्वत का अग्निमत्व गृहीत है, विशेष रूप से अग्निमत्व की अनुमिति होती है।

खण्डन—अग्निमत्व का विशेष क्या है व्यक्तिरूप है वा काल देश सम्बन्धरूप है? इनमें प्रथमपक्ष युक्त नहीं, कारण कि व्याप्ति में सर्वव्यक्ति, सामान्यलक्षण से प्रतीत होती है यह आप भी मानते हैं। द्वितीयपक्ष भी युक्त नहीं, कारण कि "अग्निमत् है" इस रूप से स्मृत, पक्षभूत-धूमवत्-व्यक्ति की—चक्षुरादि से ही पर्वतादिदेश तथा वर्तमानादि काल-

स्थानादेः स एवायमिति प्रत्यभिज्ञायमानताऽङ्गीक्रियते। तथैवात्राऽप्यस्तु, कृतमनुमानेन ॥६२॥

नाप्युपमानं बाधकं विपक्षे शक्यं वक्तुं, तस्य नियतविषयत्वेनैतादृशे विषयेऽनुदयात्। नापि शब्दः, आप्तस्योपदेष्टुरभावे व्याप्त्यनवगमप्रसङ्गात्।

अभावस्तु कदाचित् स्यात्, सोऽपि निरूप्यमाणो न घटते। एवं स वाच्यो यदि वह्निव्यतिरेकेण धूमः स्यात्तदा तथोपलभ्येत, न चोपलभ्यतेऽतोऽनुपलम्भान्नास्ति तद्व्यतिरेकेणेति। तच्च न। तथा हि क्वचिद्व्यभिचारादर्शनाद्वाऽयमभावः प्रवर्तते, सर्वत्र व्यभिचारादर्शनाद्वा। नाद्यः पार्थिवत्वलोहलेख्यत्वयोरपि व्याप्तत्वप्रसङ्गात्। न द्वितीयः सर्वत्र योग्यानुपलम्भो वाऽनुपलम्भमात्रं वा वाच्यम्। नाद्यः सर्वत्र योग्यानुपलम्भासम्भवात्। नापि द्वितीयः, पार्थिवत्त्वलोहलेख्यत्वयोरपि सम्भवात्। तत्र वज्र एव व्यभिचार इति चेन्न। तदीयादर्शनदशायां व्यभिचारानवगमात्। तद्दर्शनदशायां

सम्बन्धि रूप से—प्रतीति होगी। जैसे पूर्वकाल में जात ज्ञान से जन्य संस्कार से युक्त चक्षुरादि से एतत्देशकालयुक्त कार्षापण-आदि की "स एव अयम्" इत्याकारक प्रत्यभिज्ञा होती है वैसे ही अनुमितिस्थल में भी है, अनुमान व्यर्थ है ॥ ६२ ॥

उपमान भी विपक्ष में बाधक नहीं है, कारण कि उपमान से केवल संज्ञासंज्ञीभाव का ही निश्चय होता है।

तथा शब्द भी विपक्षवृत्तित्व में बाधक नहीं है, कारण कि जहाँ आप्त उपदेष्टा का अभाव है, वहां पर व्याप्ति का ग्रह नहीं होगा।

विपक्ष में हेतु के वृत्तित्व का बाधक कथञ्चित् अभाव (अनुपलब्धि) हो सकता है, परन्तु विचारने से वह भी युक्तिसिद्ध नहीं होता। देखिये—अभाव का आकार ऐसा होता है कि यदि वह्नि के अभावाधिकरण में धूम होता धूम का उपलम्भ (प्रत्यक्ष) होता। उपलम्भ नहीं होता है, अतः वह्निव्यतिरेक में धूम नहीं है। वह हो नहीं सकता है कारण कि यदि कहीं साध्य व्यतिरेक हेतु के अदर्शन से यह अभाव प्रवृत्त होता हो तो कहीं आकाशादि में लोहलेख्यत्व के व्यतिरेक में पार्थिवत्व के अदर्शन से अभाव के प्रवृत्त होने से लोहलेख्यत्व का पार्थिवत्व में व्याप्तिग्रह हो जायगा। यदि सर्वत्र साध्य के व्यतिरेक में हेतु के अदर्शन से अभाव प्रमाण की प्रवृत्ति मानें तो, सर्वत्र योग्यानुपलम्भ से वा अनुपलम्भमात्र से प्रवृत्त होता है। प्रथम पक्ष युक्त नहीं है, कारण कि अतीतअनागत विप्रकृष्टादि सर्वत्र योग्यता का अभाव है। द्वितीय कल्प भी युक्त नहीं है, कारण कि लोहलेख्यत्व के व्यतिरेक (अभाव) के अधिकरण आकाश में पार्थिवत्व के अदर्शन से लोहलेख्यत्व की पार्थिवत्व में व्याप्ति हो जायगी।

समर्थन—वज्र में लोहलेख्यत्व के व्यतिरेक में पार्थिवत्व का दर्शन है ? अतः व्याप्ति नहीं।

खण्डन—वज्र अदर्शनदशा में पार्थिवत्व में व्यभिचार के अदर्शनकाल में व्याप्ति हो जायगी।

समर्थन—वज्र की दर्शनदशा में व्यभिचार है, जिस स्थल में कदापि व्यभिचारदर्शन नहीं वहाँ व्याप्ति रहती है।

तावदस्ति व्यभिचारो, यत्र तु न कदाचिदपि व्यभिचारदर्शनं तत्र व्याप्तिरिति चेत् । अत्रापि व्यभिचारो न दृश्यत इत्यत्रापि नियामकादर्शनात् ॥६३॥

नापि विपक्षे बाधकस्तर्को वाच्यः, तर्कस्य व्याप्तिमूलत्वाभ्युपगमेऽनवस्थाप्रसङ्गात् । तदनभ्युपगमे मूलशैथिल्येन तर्काभासत्वापातात् ।

अथ ब्रूषे न शक्यमिदं वक्तुं—तथाह्यग्निधूमव्यभिचारशङ्कायां बाधकस्तर्कोऽयमभिधीयते, यदि धूमोऽग्निं व्यभिचरेदकारणकः सन्नित्यः स्यात् न स्यादेव वा । स चायमनुत्तरस्तर्कः, तत्र शङ्कायां व्याघातापत्तेः । तदेव ह्याशङ्क्यते यस्मिन्नाशङ्क्यमाने स्वक्रियाव्याघातादयो दोषा नावतरन्तीति लोकमर्य्यादा । एवं सर्वत्रानुत्तरस्तर्को बाधकोऽभिधेय इति ॥६४॥

खण्डन—यदि ऐसा कहें तो कहीं भी व्याप्ति नहीं होगी कारण कि वह्नि का धूम में व्यभिचार नहीं देखा जायगा इसमें कुछ प्रमाण नहीं ॥६३॥

तर्क को भी विपक्ष में हेतु के वृत्तित्व का बाधक नहीं कह सकते हैं, कारण कि यदि व्याप्ति को तर्क का मूल मानें तो तर्क से व्याप्ति का ज्ञान और उस तर्क के मूल व्याप्ति का ज्ञान अन्य तर्क से एवं उस तर्क के मूल व्याप्ति का ज्ञान अन्य तर्क से एवं प्रकार से अथवा व्याप्ति के ज्ञान से तर्क की प्रवृत्ति और तर्क से व्याप्ति का ज्ञान इस क्रम से अनवस्था तथा अन्योन्याश्रय आदि हो जायेंगे। यदि व्याप्ति को तर्क का मूल न माने तो तर्क में मूल (प्रमाण) का अभाव हो जायगा।

समर्थन—तर्क से व्यभिचार का बाध नहीं होता है—यह आप नहीं कह सकते कारण कि धूम में अग्नि के व्यभिचार की शङ्का में यह तर्क कहेंगे कि यदि धूम अग्नि का व्यभिचारी होता तो अकारण हो कर नित्य होता वा नहीं होता यह तर्क अकाट्य है; उसमें यदि शङ्का हो तो व्याघात हो जायगा। वही शङ्का होती है जिस शङ्का में स्वक्रिया व्याघात आदि दोष अवतीर्ण न होते हों ऐसा होने पर सर्वत्र व्यभिचार की शङ्का में तर्क ही अकाट्य बाधक होंगे ॥ ६४ ॥

खण्डन—ऐसी शङ्का क्यों हो कि कार्य्यकारणभाव ही नहीं हो। ऐसी शङ्का हो सकती है कि शायद अग्नि से अन्यकारण से भी धूम होता हो तो वह धूम, वह्नि का व्यभिचारी हो सकता है।

समर्थन—यदि धूम, वह्नि के अन्यकारण से भी होता तो धूम एकजातीय (तुल्य) नहीं होता और तुल्य (एकजातीय) है अतः अन्य से जन्य नहीं है।

खण्डन—कहीं इन्द्रिय से जन्य तथा कहीं अनुमान से जन्य होने पर भी जैसे ज्ञान एक जातीय होता है, वैसे ही कहीं अन्य से जन्य होने पर भी धूम को एक जातीयत्व हो सकता है।

समर्थन—ज्ञानस्थल में इन्द्रियादि अवान्तर (विशेष साक्षात्कारित्व आदि) में प्रयोजक हैं, ज्ञानत्व में नहीं।

खण्डन—ज्ञानत्व आकस्मिक (प्रयोजक से रहित) न हो इस लिये ज्ञानत्व का अनुगत प्रयोजक अवश्य कहना होगा। वैसे ही वह्नि भी धूमविशेष में ही प्रयोजक है ऐसी शङ्का हो सकती है।

मैवम् । किमित्येवं शङ्कितव्यं यद्धेतुफलभाव एव न भविष्यति । एवन्तु शङ्कितव्यम् । अग्निं विहायान्यस्मादपि हेतोरयमुदेष्यतीति । न च वाच्यमेवं हि सति धूमस्यैकजातित्वं न स्यादिति । क्वचिदिन्द्रियजन्यत्वे क्वचिदनुमानादिजन्यत्वेऽपि ज्ञानैकजात्यवत्तदुपपत्तेः । तत्रेन्द्रियादीनामवान्तरसामान्ये साक्षात्कारित्वादौ प्रयोजकत्वं, न ज्ञानतायामिति चेन्न । ज्ञानत्वस्याऽऽकस्मिकत्वपरिहारार्थं तत्कारणस्यानुगतस्य भवताऽवश्यं वक्तव्यत्वात् । धूमेऽपि वह्नेर्विशेष एव प्रयोजकत्वस्य तद्वच्छङ्कितुं शक्यत्वात् । न दृश्यते तावदग्निप्रयोज्यो धूमे विशेष इति च न वाच्यम् । तददर्शनस्यापाततो हेत्वन्तरप्रयोज्यावान्तरजात्यदर्शनेनायोग्यतयाऽविकल्प्यत्वादप्युपपत्तेः । यदा तु हेत्वन्तरप्रयोज्यो धूमस्य विशेषो द्रक्ष्यते तदाऽसौ विकल्पिष्यत इति सम्भावनाया दुर्निवारत्वात् ॥६५॥

अस्त्यात्ममनोयोगोऽनुगतं कारणं ज्ञानोत्पत्ताविति चेन्न । यद्यात्ममनोयोगादुत्पद्यमानं ज्ञानं स्यादिच्छादयोऽपि ज्ञानं प्रसज्येरन् । यदि त्वदृष्टविशेषो वा शक्तिभेदो वा ज्ञानत्वजातिर्वा ज्ञानप्रागभावो वा तत्रानुगतं कारणमुच्यते, तदा तदितरत्रापि वह्निव्यभिचारे धूमस्यैकजात्यप्रयोजकतया शक्यत एव शङ्कितुम् ॥६६॥

समर्थन—अग्निकृत धूम में विशेष नहीं देखने में आता है ?

खण्डन—यह कथन भी युक्त नहीं है, कारण कि धूम में अग्निकृत विशेष का अदर्शन—आपात से अन्यहेतु से प्रयोज्य विशेष जाति के अदर्शन से उपपादित हो सकता है कारण कि जब वह्नि से अन्य हेतुजन्य, धूम का विशेष देखा जायगा, तब धूम के विशेष का ज्ञान होगा ऐसी सम्भावना का सम्भव है ॥ ६५ ॥

समर्थन—आत्ममनःसंयोगरूप अनुगत कारण, ज्ञानत्व का प्रयोजक है तथा वह्नि से अन्यकारणजन्यत्वरूप से सम्भावित जो धूम तत्साधारण धूमत्व का प्रयोजक अनुगत कोई कारण नहीं है।

खण्डन—यदि आत्ममनोयोग को ज्ञान का प्रयोजक मानें तो इच्छा आदि भी ज्ञान हो जायँगे। यदि अदृष्टविशेष को वा शक्तिविशेष को वा ज्ञानत्वजाति को वा ज्ञान के प्रागभाव को ज्ञान का अनुगत कारण मानें तो धूमस्थल में भी वह्नि के व्यभिचार में धूम के ऐकजात्य के प्रयोजक अदृष्टादि हैं—ऐसी शङ्का हो सकती है ॥ ६६ ॥

समर्थन—व्यभिचार देखने पर अदृष्ट को ऐकजात्य का प्रयोजक मानना युक्त है, धूमस्थल में व्यभिचार तो दीखता नहीं है, पुनः अदृष्टादि को ऐकजात्य का प्रयोजक मानना युक्त नहीं है ?

खण्डन—व्यभिचार होने पर ही ऐकजात्य का कल्पन युक्त है, परन्तु धूमस्थल में व्यभिचार न देखा जायगा इसमें प्रमाण नहीं है।

समर्थन—इस रीति से शङ्काकरनेवाले आप कहीं भी अनुमान नहीं कर सकेंगे और यावत् प्रतिवादी की आत्मा का अनुमान न हो तावत् कथा में प्रवृत्ति न होगी और यदि अनुमान करें तो स्वकर्तव्य अनुमान में ऐसी शङ्का होगी, अतः वही व्याघात आपके ऊपर भी हो जायगा।

दृष्टे व्यभिचारे युक्तमदृष्टादेरैकजात्यपरिकल्पनमिति चेत् । अस्तु दृष्टे तन्निश्चयः । अत्रापि व्यभिचारो न दृश्यत इत्यत्र नियामकाभावात् शङ्किष्यते । एवं शङ्कमानस्य भवतो न क्वचिदनुमानं स्यात् । प्रतिवाद्यात्माद्यनुमानादिव्यतिरेकेण कथायामेव प्रवृत्त्यनुपपत्त्या स्वयं स्वकर्त्तव्येष्वनुमानेष्वेतादृशशङ्काक्रमणात् स एव व्याघात इति चेन्न । धूमवद्व्यक्तेरपि वह्निकारणविशेषानुमानस्यैवं सति सदनुमानत्वप्रसङ्गात् । सामग्रीसाम्येन प्रमाप्रमावैचित्र्यानुपपत्तेः । साधारणधर्मदर्शनविशेषादर्शनादौ सत्यपि शङ्कायाश्चानुदये सामग्र्यां सत्यामपि कार्य्यानुदयात्परप्रतिपत्त्युत्पादनार्थं वचनादिरूपां प्रतिपत्तिसामग्रीमुत्पादयितुं यतमानस्य भवतोऽपि स्वक्रियाव्याघातस्तुल्यः ॥९७॥

खण्डन—आपका क्या अभिप्राय है, क्या जहां व्यभिचार की शङ्का हो वहां अनुमिति में दोष नहीं होता है यह अभिप्राय है अथवा सदोष भी अनुमान प्रमाण है—यह अभिप्राय है । इनमें प्रथमपक्ष का स्वीकार आप नहीं कर सकते । कारण कि, शङ्कितोपाधि को दोष आप मानते हैं । यदि द्वितीय मानें तो जैसे धूम से वह्नि की अनुमिति प्रमिति है वैसे ही वह्नि से वह्नि के कारण तृणादि की अनुमिति भी प्रमिति हो जायगी । जब सामग्री समान है अर्थात् पक्षधर्म्मता व्यभिचारशङ्का आदि दोनों स्थलों में एक से हैं, तो धूम से वह्नि की अनुमिति प्रमिति है और वह्नि से वह्नि के कारण विशेष की अनुमिति अप्रमिति है यह कथन भी नहीं बनता ।

समर्थन—व्याघात के भय से "यदि वह्निविरहिण्यपि धूमः स्यात्" यह शङ्का (सन्देह) ही नहीं हो सकती है ।

खण्डन—यदि साधारणधर्म्म दर्शन-विशेषादर्शन आदि शङ्का के कारण होने पर भी शङ्का न हो तो पर के ज्ञान के लिये वचनादि रूप (ज्ञान) सामग्री के उत्पादन में आपकी प्रवृत्ति भी व्याघात के भय से नहीं होनी चाहिये ॥ ९७ ॥

समर्थन—व्याघात ही विशेष है, अतः उस व्याघात विशेष के दर्शन होने से शङ्का की सामग्री ही मेरे मत में नहीं है, फिर व्याघात का साम्य कैसे होगा ।

खण्डन—वह व्याघात आहार्य्य (बाधकालिक इच्छाजन्य) अर्थात् भ्रमरूप व्याप्य के आरोपरूप कारण से जन्य हो तो इष्ट है नहीं, कारण कि यदि पार्थिवत्व, लोहलेख्यत्व का व्यभिचारी होता, तो प्रमेय ही नहीं होता-इस आभासजन्य व्याघात से पार्थिवत्व की लोहलेख्यत्व में भी व्याप्ति गृहीत हो जायगी । अनाहार्य्य प्रमाणरूप व्याप्य के आरोपरूप कारण से जन्य व्याघात विशेष है—उसका निरास तर्क के खण्डन के समय चतुर्थ परिच्छेद में करेंगे ।

किञ्च आप जिस व्याघातरूप विशेष के दर्शन को शङ्का का विरोधी कहते हैं वह व्याघातदर्शन किसी प्रमाण से होता है या तर्क से ? यदि प्रमाण से कहें तो शङ्का का अस्तित्व भी उसी प्रमाण से सिद्ध हुआ, कारण कि शङ्का होने पर ही व्याघात होगा । यदि बिना शङ्का व्याघात हो तो जैसे शङ्का करने पर मेरे पक्ष में आप व्याघात देते हैं वैसे ही बिना शङ्का आपके पक्ष में हम भी व्याघात दे सकेंगे ।

समर्थन—शङ्का में भी वह व्याघात ग्राहक प्रमाण रहे, इससे हानि क्या हुई । प्रथम शङ्का के अवलम्बन से जात व्याघातरूप विशेष के दर्शन से ही अन्य शङ्का के न होने से ही व्याप्तिग्रह हो जायगा ।

व्याघातस्यैव विशेषत्वात् तद्दर्शनेन शङ्कासामग्र्येव नास्ति मत्पक्षे कुतो व्याघातसाम्यमिति चेन्न। तद्धि न तावत् आहारादिकारणाज्जायमानमेष्टव्यं कूटविषयस्य तस्यातिप्रसञ्जकत्वात्। कूटभिन्नः प्रसञ्जकः प्रमितस्यैव स्यादिति चेन्न। तस्य तर्कावसरे निरस्यत्वात्। तस्माद्यदैतद्व्याघातरूपस्य विशेषस्य दर्शनं शङ्काप्रतिपक्षभूतमुच्यते, तत् किं प्रमाणात् कुतश्चिदुपजायमानं वक्तव्यं तर्काद्वा, यदि प्रथमः, शङ्कास्तित्वमपि तेनैव प्रमाणेनोपनेयं शङ्कायां सत्यां व्याघातात्। यदि च शङ्कां विनापि व्याघातः, तदा शङ्कमानाशङ्कमानयोर्व्याघातस्य साम्यं सिद्धमेव। भवतु शङ्कायामपि तत्प्रमाणं, किमेतावता प्रथमोपजातशङ्कामवलम्ब्य व्यवस्थितस्य व्याघातरूपस्य विशेषस्य दर्शनात् शङ्कान्तरं नोत्पद्यत इति चेन्न। व्याघातसत्ताकाले तदवलम्ब्यया शङ्कयैव शङ्क्यमानव्यभिचारता, तस्याः शङ्काया व्युपरमे च तदवलम्बिनो व्याघातरूपस्य विशेषस्याभावात् कः शङ्कान्तरोत्पत्तेर्वारयितेति वक्तव्यम् ॥९८॥

मा नामास्तु तदा व्याघातात्मा विशेषस्तदवगमस्तदाहितो वा संस्कारस्तावदस्ति, विशेषावगमतत्संस्कारौ च शङ्काविरोधिनौ, नतु स्वरूपेण क्वचिदपि विशेषस्यावस्थानं तथेत्ति चेन्न। अयावदाश्रयभाविनो विशेषस्य पूर्वस्थितस्य यद्दर्शनं तदाहितो वा संस्कारः तस्य कालान्तरेपि तत्प्रतिधर्मसंशयविरोधित्वेऽवयविपाकपक्षे कुम्भस्य परमाणुपाकपक्षे परम्परया तदारम्भकस्य परमाणोः पूर्वं श्यामतया ज्ञातस्य कालान्तरे सम्भावितपाकस्य पाकजन्यरूपविशेषवत्तायां संशयो न स्यात्। यदि च शङ्कायां व्याघातस्तदा शङ्काश्रयस्य विशेषरूपस्य व्याघातस्य दर्शनाच्छङ्कायां शङ्कान्तरं मा भूत्। यदि तु व्यभिचाराश्रयस्तदा व्यभिचारः स्यादेव, व्याघाताश्रयस्य व्यभिचारस्यापि प्रमित्यापत्तेः ॥९९॥

खण्डन—व्याघात के सत्ताकाल में उसके अवलम्बभूत शङ्का से ही व्यभिचार की शङ्का है और उस शङ्का के उपरम होने पर उसके अवलम्ब से जात व्याघात के अभाव होने से अन्य शङ्का की निवृत्ति कौन करेगा ॥ ९८ ॥

समर्थन—उस काल में व्याघातरूप विशेष न रहे हानि क्या है। व्याघात का ज्ञान वा ज्ञान से आहित-(कृत) संस्कार ही शङ्का का विरोधी है। स्वरूप से विशेष कहीं भी नहीं रहता है।

खण्डन—यदि यावत् आश्रय काल में न होनेवाले पूर्वस्थित विशेष के दर्शन को वा विशेषदर्शन से जन्य संस्कार को कालान्तर में जात उस विशेष के विरोधी धर्म्मविषयक संशय का विरोधी मानें तो पूर्वकाल में श्यामत्वरूप से ज्ञात अवयविपाकमत में कुम्भ में तथा परमाणुपाकमत में परम्परा से घटारम्भक परमाणु में अन्य काल में पाक से सम्भावित रक्तत्वरूप का सन्देह न होगा। यदि शङ्का में व्याघात है तो शङ्काश्रय व्याघातरूप विशेष के दर्शन से शङ्का में अन्यशङ्का न हो, परन्तु प्रथम शङ्का होने से व्याप्तिग्रह नहीं होगा और यदि व्यभिचार में व्याघात दें तो व्याघात को विषयकरनेवाली प्रमा के विषय होने से व्यभिचार अवश्य होगा ॥ ९९ ॥

अनादिसिद्धव्याप्तिकास्ते तर्का इति चेन्न, तद्बुद्धेः प्रमितत्वासिद्धेः । शरीरे स्वात्मप्रत्ययस्य तादृशस्याप्यप्रमात्वोपगमात् । अनादित्वासिद्धेश्चोभयत्राविशेषात् ।

नापि यद्यत्र व्यभिचारः शङ्क्येत, तदा व्याघातः स्यादित्येवंरूपात्तर्काद्व्याघातावगमः, व्याघातप्रतिपादकस्य तर्कस्य मूलशैथिल्ये तर्काभासत्वापातात् । तादृशस्यापि व्याघातोपनायकत्वे व्याघातापत्तेश्च साम्यम् । शक्यत एव तर्काभासाद्भवतोऽपि व्याघात उपनेतुम् ।

अथ तर्कस्य व्याप्तिर्मूलभूताऽभ्युपगम्यते । तत्रापि व्यभिचारशङ्कायां पुनरनवस्थैव । तत्रापि व्याघातापादने पुनरित्थमनवस्थैव ।

तस्मादस्माभिरप्यस्मिन्नर्थे न खलु दुष्पठा ।
त्वद्गाथैवान्यथाकारमक्षराणि कियन्त्यपि ॥४४॥
व्याघातो यदि शङ्काऽस्ति नचेच्छङ्का ततस्तराम् ।
व्याघातावधिराशङ्का तर्कः शङ्कावधिः कुतः ॥४५॥१००॥

अव्यभिचारश्चैकपरित्यागव्यवच्छेदेनापरान्वयः, समकालदृष्टे नष्टेऽदृष्टः शङ्क्यत इत्याहुः ।

समर्थन—अनादिसिद्ध व्याप्तिवाले वे तर्क हैं, जिनसे व्याप्तिग्रह होता है ।

खण्डन—अनादिसिद्ध होने से तर्क का मूल व्याप्ति, प्रमित नहीं हो सकती । अन्यथा अनादिसिद्ध होने से शरीर में आत्मबुद्धि भी प्रमित हो जायगी . कारण कि अनादिसिद्धत्व उभयत्र तुल्य है ।

समर्थन—यदि "अत्र (वह्निधूमस्थल में) व्यभिचारः स्यात्तदा व्याघातः स्यात्" इस तर्क से व्याघात का अवगम होगा ।

खण्डन—व्याघात के प्रतिपादक तर्क के मूल प्रमाण न होने से यह तर्क आभास है
और यदि तर्काभास से भी व्याघात का प्रतिपादन करें तो आपके प्रति भी "तर्कः आभास
उपपादकश्च" ऐसा विरुद्ध संघटनरूप व्याघात हम भी दे ही सकते हैं । यदि तर्क का मूल
व्याप्ति को मानें तो तर्क के मूल व्याप्ति में भी व्यभिचार की शङ्का होने पर अन्य तर्क का
आश्रयण करना होगा, एवं उस तर्क के मूल व्याप्ति में व्यभिचार की शङ्का होने पर अन्य
तर्क के आश्रयण से अनवस्था प्रसङ्ग होगा । यदि कहें कि अनवस्था होने पर कहीं भी अनु-
मान न होने से परप्रतिपत्त्यर्थ वचन में प्रवृत्तिरूप व्याघात होगा, अतः अनवस्था नहीं, तो
जिस तर्क से अनवस्था में व्याघात का आपादन आप करते हैं उस, तर्क के मूल व्याप्ति में
भी व्यभिचार की शङ्का होने से पुनः अनवस्था दोष होगा । तस्मात् इस विषय में हम भी
कुछ ही अक्षरों को बदल कर तुम्हारी ही गाथा को पढ़ सकते हैं कि—यदि व्याघात प्रामाणिक
है तो शङ्का अवश्य है । कारण कि शङ्का होने पर ही व्याघात होता है और यदि व्याघात
नहीं है तो प्रतिबन्धक के न होने से अवश्यमेव शङ्का है । शङ्का की अवधि (अवसान) व्या-
घात कैसे हो सकता है, तथा तर्क, शङ्का की अवधि कैसे होगा । कारण कि तर्क के मूल व्याप्ति
में भी शङ्का तदवस्थ ही है ॥ १०० ॥

स्वाभाविकः सम्बन्धो व्याप्तिरित्यपरः। स प्रष्टव्यः कस्य स्वाभाविकः किं सम्बन्धिनोरुतान्यस्य। न चरमः वैपरीत्यापत्तेः।

आद्ये कः स्वाभाविकशब्दार्थ इति प्रष्टव्यं, किं सम्बन्धिस्वभावाश्रितः। अथ सम्बन्धिस्वभावजन्यः। अथ सम्बन्धित्वविवक्षितस्वभावानतिरिक्तः, अथ सम्बन्धिस्वभावव्याप्यः। अथवा सम्बन्धिस्वभावादन्येन न प्रयुक्तः। उतान्य एव कश्चिद्विवक्षितः।

आद्ये पार्थिवत्वलोहलेख्यत्वयोरपि व्याप्तत्वप्रसङ्गः। न द्वितीयः अतिव्याप्तेरव्याप्तेश्च। अतएव न तृतीयः ॥१०१॥

समर्थन—व्यभिचार की शङ्का में अव्यभिचार भी एक कोटि है कारण कि शङ्का (सन्देह) उभयकोटिक होती है। अतः किसी अधिकरण में अव्यभिचार के निश्चय होने से अनुमिति हो जायगी?

खण्डन—एक (साध्य) के अभाव के अनधिकरण में हेतु का अन्वय (वृत्तित्व) रूप अव्यभिचार, समकाल में जात दृष्ट तथा नष्ट दो पदार्थों में है, वही शङ्का में अपर कोटि होगी। यदि कहें कि उसी स्थल में अनुमिति हो जायगी तो यह युक्त नहीं, कारण कि ऐसा स्थल कहीं दृष्ट नहीं है।

अन्य आचार्य्य कहते हैं कि स्वाभाविक सम्बन्ध व्याप्ति है। उनसे पूछना चाहिये कि किसका स्वाभाविक सम्बन्ध व्याप्ति है? सम्बन्धियों का अथवा अन्य का? यदि अन्य का कहें तो जैसे असम्बन्धियों का सम्बन्ध व्याप्ति है वैसे ही सम्बन्धियों का असम्बन्ध भी व्याप्ति हो जायगा। यदि सम्बन्धियों का स्वाभाविक सम्बन्ध व्याप्ति है तो स्वाभाविक शब्द का अर्थ क्या है। जैसे वह्नि के स्वभाव (स्वरूप) के आश्रित औष्ण्य वह्नि का स्वाभाविक है वैसे ही सम्बन्धो के स्वभाव (स्वरूप) का आश्रित सम्बन्ध व्याप्ति है। वा जैसे वसन्त से जन्य होने से वृक्षप्रसूति वसन्त का स्वाभाविक है, वैसे ही सम्बन्धो स्वभाव (स्वरूप) जन्य सम्बन्ध व्याप्ति है। वा सम्बन्धित्वरूप से विवक्षित सम्बन्धी के स्वभाव से अनतिरिक्त अर्थात् स्वभावरूप सम्बन्ध ही व्याप्ति है। वा सम्बन्धी के स्वभाव से व्याप्य सम्बन्ध व्याप्ति है। वा सम्बन्धी के स्वभाव (स्वरूप) से अन्य से प्रयुक्त (जन्य) न हो ऐसा जो सम्बन्ध वह व्याप्ति है—अथवा और ही कुछ वस्तु व्याप्ति है। प्रथम पक्ष में पार्थिवत्व में लोहलेख्यत्व का सम्बन्ध व्याप्ति हो जायगा। द्वितीयपक्ष में जन्य होने से धूम का एकाश्रय में संयोगरूप सम्बन्ध वह्नि में व्याप्ति हो जायगा तथा अजन्य होने से रूपरस का एकाश्रय समवायरूप सम्बन्ध व्याप्ति न कहावेगा। तृतीय पक्ष में वह्नि का धूम में एकाश्रय संयोगरूप सम्बन्ध व्याप्ति न होगा, कारण कि संयोग सम्बन्धी का स्वरूप नहीं है, किन्तु अतिरिक्त है।

अन्य आचार्य्य कहते हैं कि उपाधिरहित सम्बन्ध व्याप्ति है। उनसे पूछना चाहिये कि वह उपाधि क्या वस्तु है, जिससे शून्य को व्याप्ति कहते हैं; तथा लोहलेख्यत्व का पार्थिवत्व में एकार्थ समवायरूप सम्बन्ध व्याप्ति हो जायगा, कारण कि समवाय सम्बन्धी का स्वरूप है। (१०१)

चतुर्थकल्प भी युक्त नहीं है, कारण कि यावत् व्याप्ति को निरुक्ति न हो तावत् सम्बन्धी-स्वभाव-व्याप्य-सम्बन्धरूप निरुक्त व्याप्ति की निरुक्ति नहीं हो सकती है अर्थात् व्याप्ति के लक्षण में व्याप्ति के प्रवेश होने से आत्माश्रय दोष हो जायगा। किञ्च यदि सम्बन्ध का व्याप्य मानेंगे तो व्यापक जो सम्बन्धी वह अधिक देश वा काल में वृत्तित्व से सम्भावित है, अतः एक सम्बन्धो के दर्शन से अन्य सम्बन्धी की अनुमिति नहीं होगी।

नापि चतुर्थः, व्याप्त्यनिरुक्त्या व्याप्यत्वानिरुक्तेः। सम्बन्धस्य व्याप्यत्वे च सम्बन्धिनोर्व्यापकयोः सम्भावितसम्बन्धाधिकदेशकालतया एकसम्बन्धिदर्शनेऽपरानुमानाय नियामकत्वायोगात्। नापि पञ्चमः, न प्रयुक्त इति यदि न जनितस्तदा सम्बन्धस्याकृतकत्वपक्षेऽन्येनेति विशेषणवैयर्थ्यमकृतस्य सम्बन्धिस्वभावेनाऽप्यजनितत्वात्। सम्बन्धस्य कृतकत्वपक्षे स्वरूपासिद्धिरेव स्यात्। सामग्र्याः सर्वसम्भवादन्ततः कालदेशादृष्टादिभिरपि तज्जन्यत्वस्यावश्यवक्तव्यत्वात्। नापि षष्ठः पक्षः, तस्य निर्वक्तुमशक्यत्वात्। एवमेव विकल्प्यायं चरमविकल्पः सर्व्वत्रोपन्यस्य दूष्यो न्यूनत्वशङ्काभयादिति॥१०२॥

अनौपाधिकः सम्बन्धो व्याप्तिरित्यपरः। स प्रष्टव्यः, कोऽयमुपाधिर्नाम यच्छून्यत्वमनौपाधिकत्वम्। उपाधिः साध्यव्यापकत्वे सति साधनाव्यापकः। अयञ्च—

"एकसाध्याविनाभावे मिथः सम्बन्धशून्ययोः।
साध्याभावाविनाभावी स उपाधिर्यदत्ययः"—

इत्यस्य व्यतिरेकमुखस्य यदत्ययः, स उपाधिरिति योज्यमानस्य पर्य्यवसितोऽर्थः। तद्धर्म्मभूता हि व्याप्तिर्जपाकुसुमरक्ततेव स्फटिके साधनाभिमते चकास्तीत्युपाधिरसावुच्यते। तदिदमाहुः—

"व्याप्तेश्च दृश्यमानायाः कश्चिद्धर्मः प्रयोजकः।
अस्मिन्सत्यमुना भाव्यमिति यत्सा निरूप्यते॥
अन्ये परप्रयुक्तानां व्याप्तीनामुपजीवकाः।
तैर्दृष्टैरपि नैवेष्टा व्यापकांशावधारणा"॥

स चोपाधिर्निश्चित इवाशङ्कितश्च यत्रेदमुच्यते

"यावच्चाव्यतिरेकित्वं शतांशेनापि शङ्क्यते।

पञ्चम पक्ष भी युक्त नहीं है। कारण कि यदि "अन्य से नहीं प्रयुक्त है" इसका अन्य से जनित नहीं है—यह अर्थ करें तो सम्बन्ध अकृतक (नित्य) है इस पक्ष में "अन्य से" यह विशेषण व्यर्थ है, कारण कि जो अकृतक है वह सम्बन्धी के स्वभाव से भी अजन्य है तथा सम्बन्ध कृतक है इस पक्ष में "सम्बन्धी के स्वभाव से नहीं प्रयुक्त हो" यह स्वरूप ही असिद्ध है, कारण कि कार्य्यमात्र सामग्री से जन्य होता है, अतः देशकाल अदृष्ट आदि से वह व्याप्तिरूप सम्बन्ध प्रयुक्त है यह अवश्य मानना होगा। षष्ठ पक्ष भी युक्त नहीं है, कारण कि उसका निर्वचन नहीं हो सकता। इस रीति से विकल्प कर इस चरम विकल्प का सर्वत्र खण्डन करना चाहिये। अन्यथा न्यूनता हो जायगी, अर्थात् यदि वादी विकल्पित पक्षों से भिन्न पक्ष का आश्रयण करें तो विकल्प में न्यूनता हो जायगी और यदि उक्त से अन्यत्व रूप से भी विकल्प कर दें तो वादी से अवलम्बित पक्ष का उसमें अन्तर्भाव होने से न्यूनता नहीं होगी॥ २॥

समर्थन—जो साध्य का व्यापक तथा साधन का अव्यापक हो वह उपाधि है—यह लक्षण उदयनाचार्य्य के व्यतिरेक मुख से कथित लक्षण वाक्य का फलितार्थ है। आचार्य्य के लक्षण वाक्य का अक्षरार्थ तो यह है कि "साधन और उपाधित्व से अभिमत-इन दोनों

विपक्षस्य कुतस्तावद्धेतोर्गमनिकाबल"मिति चेत् ॥३॥

साध्यव्यापके पक्षेतरत्वेऽपि प्रसङ्गात्। तद्व्यतिरिक्त इत्यपीति चेन्न। बाधोन्नीतस्य तस्याव्यापनात्। अन्यथा निरुपाधिसम्बन्धित्वे बाधासिद्धेः। यदाह बाधेन वोपाधिरुन्नीयतां, अन्येन वेति न कश्चिद्विशेषः। एतदर्थमपि विशेषणीयमिति चेन्न। तथापि साधनाव्यापकत्वे सतीति तद्व्याप्त्यनवधारणे न शक्यावधारणम्। एवं साध्यव्यापक इत्यपि ॥४॥

के मध्य में जिसका अभाव साध्याभाव का व्याप्य हो वह उपाधि है। वह्नि से धूम के अनुमितिस्थल में आर्द्रेन्धन को उपाधि संज्ञा है। स्फटिक में जपाकुसुम के रक्तत्व के भान के निमित्त जपाकुसुम को जैसे उपाधि कहते हैं, वैसे ही आर्द्रेन्धन संयोगनिष्ठ धूम की व्याप्ति का वह्नि में भान के निमित्त आर्द्रेन्धन संयोग को भी कहते हैं। यह कहा भी है कि अन्य (सोपाधिक) हेतु उपाधिनिष्ठ व्याप्ति का अवलम्बन करते हैं, वे सोपाधिक हेतु पक्ष में देखे भी जायं तो भी व्यापक को सिद्धि नहीं होती है। वे उपाधि निश्चित के तुल्य आशङ्कित भी होते हैं। यह भी कहा है कि जब तक विपक्ष में हेतु के शतांश से भी अर्थात् उपाधि की शंका से भी शङ्का हो तब तक हेतु में साध्यगमन की सामर्थ्य कैसे हो सकती है ॥ ३ ॥

खण्डन—साध्य का व्यापक तथा साधन का अव्यापक पक्षेतरत्व भी उपाधि हो जायगा। पक्षेतरत्व उपाधि ही है—यह आप नहीं कह सकते हैं, कारण कि पक्षेतरत्वरूप उपाधि का सर्वत्र सम्भव होने से अनुमानमात्र का उच्छेद हो जायगा।

समर्थन—उपाधि के लक्षण में पक्षेतरत्व से भिन्न हो—ऐसा निवेश करने से पक्षेतरत्व उपाधि न कहावेगा।

खण्डन—ऐसा निवेश करने पर "वह्निः अनुष्णः कृतकत्वात्" इस अनुमान में वह्नीतरत्व उपाधि न कहावेगा। यहाँ बाध ही दोष है उपाधि दोष नहीं है—यह नहीं कह सकते हैं, कारण कि यदि व्यभिचार न हो तो हेतुमत् पक्ष में बाध ही अप्रमाणित सिद्ध होता है। यह भी कहा है कि बाध से अथवा व्यभिचार से उपाधि की अनुमिति होती है, इसमें कोई विशेष नहीं है।

समर्थन—उपाधिलक्षण में बाधोन्नीत पक्षेतरत्व से भिन्न जो पक्षेतरत्व उससे भिन्नत्व का निवेश होने से कोई दोष नहीं है।

खण्डन—तब भी जब तक साधन में उपाधि की व्याप्ति का ज्ञान न हो, तब तक साधन के अव्यापकत्व का ज्ञान न होने से अन्योन्याश्रयादिदोष हो जायेंगे—इसी प्रकार से साध्य में उपाधि की व्याप्ति की अज्ञानदशा में साध्य व्यापकत्व का ज्ञान भी नहीं हो सकता है ॥४॥

समर्थन—साध्य में जिसका व्यभिचार अदृष्ट हो वह साध्यव्यापक है?

खण्डन—यह कथन भी युक्त नहीं, कारण कि वस्तुतः जिससे साध्य व्यभिचारी है वह भी आपाततः अव्यभिचारिसाध्यस्वरूप से ज्ञात हो सकता है, अतः वह भी उपाधि हो जायगा। जैसे "क्षित्यादिकं कर्तृजन्यं कार्यत्वात्" यहाँ रूपित्व उपाधि हो जायगा। यदि कहें कि अन्य काल में भी अदृष्ट व्यभिचार साध्य जिससे हो वह साध्यव्यापक है तो वह्नि से धूम के साधनस्थल में आर्द्रेन्धन संयोग भी उपाधि न होगा, कारण कि आर्द्रेन्धन

अथ मन्यसेऽदृष्टव्यभिचारसाध्यत्वं साध्यव्यापकत्वम् । न, वस्तुगत्या व्यभिचारिसाध्यस्याप्यापाततोऽदृष्टव्यभिचारसाध्यत्वसम्भवात् , तस्याप्युपाधित्वापत्तेः । न द्रक्ष्यत इति च निरूपयितुमशक्यम् । व्याप्तिग्रहकाले च साध्यत्वाभावेन तद्व्यभिचारः कथमवधार्य्यः । साध्यं व्यापकमपेक्षितमिति चेन्न । व्याप्त्यनवगमे व्यापकार्थानवगमात् । सम्भावितव्यापकभावो व्यापकोऽपेक्षित इति चेन्न । व्यापकस्यानिरुक्तौ किंरूपतया सम्भावनापि स्यात् । अथ साध्यव्यापक इत्येव भद्रं, तदानीं साध्यत्वाभावेऽपि साधयितुमर्हत्त्वस्य विवक्षितत्वात् । न, कथं ह्यवगन्तव्यमिदमेव साधयितुमर्हमिदं नेति । व्यापकत्वादिति वक्तुमशक्यत्वात् ॥५॥

न च साधनाव्यापकत्वं सर्व्वत्र निश्चेतुं शक्यम्—स श्यामो मैत्रतनयत्वादित्यत्र शाकाद्याहारपरिणतिपरम्पराया मैत्रतनयेऽभावस्य दुरधिगमत्वात् ।

संयोग में धूमरूप साध्य का व्यभिचार नहीं देखा जायगा इसमें कुछ प्रमाण नहीं है । किञ्च
व्याप्ति के ग्रहकाल में साध्यत्व (सिद्धिकर्म्मत्व) के अभाव होने से साध्य का व्यभिचार
कैसे जाना जायगा । साध्य के व्यापकत्व का ग्रहण है—यह भी कह नहीं सकते, कारण
कि जबतक व्याप्ति का ज्ञान न हो तबतक व्यापकत्व का ज्ञान अशक्य है । जिसके व्याप-
कत्व की सम्भावना हो वह व्यापक है यह कथन भी युक्त नहीं, कारण कि यावत् व्याप-
कत्व की निरुक्ति न हो तावत् किस रूप से सम्भावना होगी ।

समर्थन—साध्यव्यापक—यही युक्त है, कारण कि उस काल में साध्यत्व के अभाव
होने पर भी साधन का अर्ह है ही ।

खण्डन—यह कथन भी युक्त नहीं है, कारण कि व्याप्ति के अज्ञान काल में यह कैसे
जाना जायगा कि यह साधन का अर्ह है और यह साधन का अर्ह नहीं है ॥ ५ ॥
व्यापकत्व से साध्य का निश्चय नहीं हो सकता है, क्योंकि यावत् व्याप्ति का लक्षण
न हो तावत् यह व्याप्य है यह व्यापक है यह निश्चय कैसे होगा ।

साधनाव्यापकत्व का भी निश्चय सर्वत्र नहीं हो सकता है, कारण कि "स श्यामः
मैत्रतनयत्वात्" इसस्थल में शाकाद्याहारपरिणतिपरम्परारूप उपाधि के अभाव का ज्ञान
मैत्रतनय में हो नहीं सकता है ।

समर्थन—जिस उपाधि के साध्यव्यापकत्व तथा साधनाऽव्यापकत्व में प्रमाण है वह
निश्चित उपाधि है और जिस उपाधि में उक्त उभयरूप में प्रमाण नहीं है, वह शङ्कित उपाधि
है (अर्थात् गौरमैत्रतनय में शाकाद्याहार
परिणतिपरम्परा नहीं है) इसमें कोई नियामक नहीं है अतः यह शङ्कित उपाधि ही है ।
और मैत्रतनयत्व का शाकाद्याहारपरिणतिपरम्परा

खण्डन—"मैत्रतनयः शाकाद्याहारपरिणतिपरम्परावान् मैत्रतनयत्वात्" इस प्रकार से
मैत्रतनयत्वरूप हेतु से ही मैत्रतनय में शाकाद्याहारपरिणतिपरम्परारूप उपाधि की अनु-
मिति होने से साधनाव्यापकत्व की शङ्का का उच्छेद हो सकता है ।

समर्थन—मैत्रतनयत्व से शाकाद्याहारपरिणतिपरम्परा के साधन में शाकाद्याहार
सामग्रीसत्त्व उपाधि है, अतः उक्त अनुमिति न होने से "स श्यामः मैत्रतनयत्वात्" इस
स्थल में शाकपाकजत्व शङ्कित उपाधि हो सकता है ।

यत्रोक्तलक्षणस्य निश्चायकं प्रमाणमस्ति तत्र निश्चितोपाधित्वमन्यत्र शङ्कितोपाधित्वम्। मैत्रतनयत्वव्याप्यशाकाद्याहारपरिणतिपरम्परया स्थातव्यमित्यत्र नियामकाभावादिति चेन्न। मैत्रतनयत्वेनैव हेतुना तस्यापि प्रसाधने तच्छङ्काया अपि छेत्तुमशक्यत्वात्। तत्रापि तत्तत्सामग्रीत्युपाधिपरम्पराभिधाने च तस्या अपि मैत्रतनयत्वेनैव प्रसाधनस्य कर्त्तुं शक्यत्वात्॥ ६॥

अनवस्थैवं स्यादिति चेत्। न, उपाध्युपन्यास एव कुतोऽनवस्था न स्यात्। साध्यसामग्र्या उपाधित्वे धूमानुमानसाधारण्यात्। एवं च साध्ये सामग्र्युपाधित्वव्यवच्छेदार्थमपि लक्षणं विशेषणीयम्। श्यामत्वादौ साध्ये शाकाद्याहारपरिणतिपारम्पर्यादेस्तस्मिन्साध्ये श्यामत्वादेरुपाधित्वसम्भवेन कथमुपाधिरपि साधयितुं शक्यत इति चेत्। मैवम्, प्रत्येकं द्वयोरपि मैत्रतनयत्वादिना साधने साधनाव्यापकत्वस्य शङ्कितुमशक्यत्वात्। अन्यथा सकर्तृकत्वे साध्येऽदृष्टजत्वं अदृष्टजत्वे च सकर्तृकत्वमुपाधिरि-

---

खण्डन—शाकाद्याहारसामग्री की भी मैत्रतनयत्व से ही अनुमिति होने से, शाकाद्याहार सामग्री को साधन के अव्यापक न होने से उपाधि नहीं है। यदि शाकाद्याहारसामग्री की अनुमिति में भी शाकाद्याहारसामग्री की सामग्री को उपाधि कहें तो मैत्रतनयत्व से शाकाद्याहारसामग्री की सामग्री के अनुमान होने से वह भी साधनाव्यापक न होने से उपाधि न कहावेगा, एवं तत्सामग्री के उपाधित्व के उपन्यास में भी मैत्रतनयत्व से तत्सामग्री के अनुमान से साधनाव्यापकत्व जानना चाहिये॥ ६॥

यदि कहें कि तत्सामग्री के साधनव्यापकत्व के अनुमान में साधन की अनवस्था है तो उपाधि के साधनव्यापकत्व के साधन में उपाधि एवं उस उपाधि के साधनव्यापकत्व के साधन में उपाधि—इस रीति से उपाधि के उपन्यास में भी अनवस्था हो जायगी।

किञ्च यदि साध्यसामग्री को भी उपाधि मानें तो "पर्वतो वह्निमान् धूमात्" यहां भी वह्निसामग्री के उपाधि होने से अनुमितिमात्र के उच्छेद के भय से उपाधि के लक्षण में साध्यसामग्री भिन्न का निवेश हो सकता है, तब मैत्रतनयत्व से शाकपाकजत्व के अनुमान में शाकपाकसामग्री के उपाधि न होने से शाकपाकजत्व को साधन के व्यापक होने से वह उपाधि नहीं हो सकता है।

समर्थन—मैत्रतनयत्व से श्यामत्व के साधन में शाकपाकजत्व उपाधि है तथा शाकपाकजत्व के साधन में श्यामत्व उपाधि है, अतः उपाधि के अनुमान न होने से साधनाऽव्यापकत्व, उपाधि में युक्त ही है।

खण्डन—दोनों को एक काल में मैत्रतनयत्व से साधन होने से शाकपाकजत्व में साधन व्यापकत्व ही है, अतः साधनाऽव्यापकत्व की शङ्का नहीं है। ऐसे स्थल में यदि एक साध्य की सिद्धि में अन्य उपाधि दे सकें, तो क्षिति में कार्यत्व से सकर्तृकत्व के साधन में अदृष्टजत्व तथा अदृष्टजत्व-साधन में सकर्तृकत्व को उपाधि होने से दोनों की असिद्धि हो जायगी, एवं बुद्धिमत्पूर्वकत्व के साधन में प्रयत्नपूर्वकत्व तथा प्रयत्नपूर्वकत्व के साधन में बुद्धिमत्पूर्वकत्व के उपाधि होने से दोनों की असिद्धि हो जायगी, एवं वह्नित्वरूप से वह्नि की अनुमिति में इन्धनज तेज को तथा इन्धनज तेजस्त्वरूप से वह्नि के साधन में वह्नित्वरूप

त्युभयासिद्धिः स्यात्, एवं बुद्धिमत्पूर्वकत्त्वे प्रयत्नवत्पूर्वकत्त्वं प्रयत्नवत्पूर्वकत्त्वे बुद्धिमत्पूर्वकत्वमेवं वह्नित्त्वजात्याक्रान्तवत्त्वेऽपीन्धनत्वजात्याक्रान्तत्त्वं तस्मिन्वह्नित्त्वजात्याक्रान्तवत्वमुपाधिः स्यादित्यत्राऽपि विश्वमनुमानं व्याकुलं स्यात् ॥ ७ ॥

अत एव साध्यसाधनसम्बन्धं प्रति व्यापकत्त्वं साध्यव्यापकत्त्वमिष्टमित्यपि प्रत्युक्तम् ।

यत्राप्युपाधिर्निश्चीयते तत्राप्यतीन्द्रियोपाधिविषये तदभावस्य साधनाव्याप्तचर्थमनुमेयतायां सोपाधीक्रियमाणेन साधनेनैव सत्प्रतिपक्षस्य कर्त्तुं शक्यत्वात् । तथा सति तत्र शङ्कितोपाधित्वमेव निर्व्यूढं स्थास्यतीति चेत् एवं ब्रुवाणो नियतमजैपीः, परं मन्द, मन्दाक्षं न प्रतिपक्षम् । तथाहि—स्वीकृतनिश्चितोपाधिभावे शङ्कितोपाधित्वमापतदनु-

---

से वह्नि को उपाधि होने से किसी भी रूप से वह्नि का अनुमान न होने से सम्पूर्ण अनुमान उच्छिन्न हो जायँगे ॥ ७ ॥

साध्य तथा साधन के सम्बन्ध का व्यापक तथा साधन का अव्यापक उपाधि है—यह लक्षण भी युक्त नहीं है; कारण कि व्याप्ति, साध्य, साधन के निर्वचन के विना यह निरुक्ति हो नहीं सकती है और व्याप्ति के घटक उपाधि के निर्वचनकाल में इनका निर्वचन हैं नहीं।

किञ्च जहाँ उपाधि निश्चित है वहाँ भी अतीन्द्रिय (शाकपाकजत्व) उपाधि के विषय में साधनाव्यापकत्व की सम्पत्ति के अर्थ पक्ष (मैत्रतनय) में शाकपाकजत्वाभाव की गौरत्व से अनुमिति होती है, अतः गौरत्व से शाकपाकजत्वाभाव की अनुमिति में जिस हेतु को उपाधि से युक्त बनाते हैं, उसी हेतु से पक्ष में उपाधि का अनुमान कर सत्प्रतिपक्ष दे सकते हैं।

समर्थन—यदि सत्प्रतिपक्ष होने से साधनाऽव्यापकत्व की सिद्धि न हुई तो वहाँ शङ्कित उपाधि ही रहे, हानि क्या है ?

खण्डन—ऐसा कथन करने से तूने अवश्य विजयलाभ किया, परन्तु हे मन्द ! मन्दाक्ष (लज्जा) के ऊपर, शत्रु के ऊपर, नहीं। निश्चितरूप से स्वीकार कर पीछे वादी के खण्डन करने पर उपाधि में शङ्कितत्वरूप से कथन को निर्लज्ज से अन्य कौन पुरुष अनुकूल मानेगा। किञ्च कहीं भी निश्चय न हो तो उपाधि का सन्देह भी नहीं हो सकता, कारण कि सामान्यदर्शन से कोटिद्वय के स्मरण होने पर सन्देह होता है और अनुभूत का स्मरण होता है, अतः उपाधि के निश्चय के विना सन्देह कैसे होगा।

समर्थन—जहाँ वह्नि से धूम के साधनस्थल में साधन वह्नि के अधिकरण अयोगोलक में आर्द्रेन्धन संयोग के न होने से आर्द्रेन्धन संयोग में साध्य धूम का व्यापकत्व तथा साधन वह्नि का अव्यापकत्व प्रत्यक्ष है, वहाँ निश्चित उपाधि है।

खण्डन—यद्यपि अयोगोलक में आर्द्रेन्धन संयोग का ऐन्द्रियक (चाक्षुष) बाध है; तथापि आर्द्रेन्धन जातीय अतीन्द्रिय आर्द्रेन्धनसंयोग की अनुमिति जिस हेतु को आप सोपाधिक बनाते हैं, उस वह्नि हेतु से ही हो सकती है। जिसका एकस्थल में प्रत्यक्ष होता हो उसका अन्यस्थल में प्रत्यक्षबाध होने पर भी हेतु के बल से अतीन्द्रियत्व सिद्ध हो सकता है। जैसे पाक से जाठर अग्नि।

कूलं मन्यते कोऽन्यो जितलज्जात् । न च क्वचिन्निश्चितोपाध्यनभ्युपगमे तच्छङ्का शक्या । यत्र प्रत्यक्षेणोपाधिनिश्चयस्तदेव तद्दर्शनस्थानं भविष्यतीति चेन्न। ऐन्द्रियकबाधे तज्जातीयस्यातीन्द्रियस्याप्रयोजकीक्रियमाणेन हेतुनैव साधयितुं शक्यत्वात् । नच यदेकत्रैकजातीयमैन्द्रियकं तदन्यत्रैन्द्रियकबाधे हेतुबलादतीन्द्रियं न प्रसाध्येत पाकदर्शनात् जठरानलादि । साधनाव्यापकत्वे सति साध्यव्यापक इति च न शाकाद्याहारपरिणतिपरम्परासाध्यं व्याप्नोतीत्यव्यापकतादोषः। न हि शाकादित्वं नाम किञ्चिदेकमस्ति, यत्साध्यं व्याप्नुयात् ॥ ८ ॥

किञ्च साध्य में व्यापक होकर जो साधन के अव्यापक हो वह उपाधि है इस उपाधि के लक्षण में शाकाद्याहारपरिणतिपरम्परारूप उपाधि श्यामत्वरूप साध्य का व्यापक नहीं है, अतः लक्षण में अव्याप्ति दोष है। (और) शाकादि एक अनुगत भी नहीं है जो साध्य का व्यापक हो ॥ ८ ॥—किसी प्रकार शाकादि को अनुगत मान भी लें तो भी श्यामत्व का व्यापक नहीं हैं, कारण कि इन्द्रनीलशिला का श्यामत्व आहारजन्य नहीं है।

समर्थन—यहाँ यद्यपि साध्यत्व श्यामत्वरूप से है, तथापि साध्यत्व का पर्य्यवसान पुरुषश्यामत्व में ही है और पुरुषश्यामत्व का व्यापक शाकपाकजत्व है ही।

खण्डन—व्याप्ति में उपाधि होती है, अतः जिसकी जिसरूपसे जिसमें व्याप्ति हो, उपाधि में उसीरूप से साध्य के व्यापकत्व तथा साधन का अव्यापकत्व होना चाहिये। प्रकृत में श्यामत्वरूप से व्याप्ति है—अतः उसीरूप से साध्य का व्यापकत्व होना चाहिये, वह है नहीं। हेतु, मैत्रतनयत्वरूप पक्ष का धर्म्म है इसीसे पक्ष मैत्रतनयरूप पुरुष में साध्य की सिद्धि होने से साध्यत्व का, पुरुषश्यामत्व में पर्यवसान है, व्याप्ति के बल से नहीं है।

अन्यथा (यदि पुरुषश्यामत्वरूप से व्याप्ति मानें तो) "मैत्रतनयः पुरुषश्यामः मित्रातनयत्वात्" इत्यादि पञ्चावयव होने से साध्यदल में पुरुषीयत्व के निवेश का [व्यवच्छेद्य न होने से] वैयर्थ्य हो जायगा।

समर्थन—कज्जललेप से जात श्यामत्व की व्यावृत्ति के अर्थ पुरुषीयत्व का निवेश है।

खण्डन—यदि ऐसा हो तो संयुक्तपुरुषनिष्ठ श्यामत्व की परम्परासम्बन्ध से व्यावृत्ति के अर्थ भी विशेषण देना चाहिये।

समर्थन—साध्यसाधनसम्बन्ध का व्यभिचार जिसमें दृष्ट न हो वह साध्यव्यापक है, शाकपाकजत्व—श्यामत्व और मैत्रतनयत्व के सम्बन्ध का व्यापक है, अतः दोष नहीं।

खण्डन—ऐसा मानने पर "चक्षुः तैजसम् साक्षात्कृतिकरणत्वात्, इस सत् अनुमिति में उद्भूतरूपवत्व उपाधि हो जायगा, कारण कि तैजसत्व साक्षात्कृतिकरणत्व इन दोनों के सम्बन्ध का व्यापक उद्भूतरूपवत्व है।

किञ्च साध्यसाधनसम्बन्ध का व्यापक—इसमें सम्बन्ध द्वारा जो साधन का निवेश है, उससे केवल साध्यव्यापक का व्यवच्छेद होता है या नहीं, यदि होता है तो "अध्वरे पश्वालम्भः अधर्मसाधनं हिंसावत्" इस स्थल में निषिद्धत्व केवल अधर्म साधनत्वरूप साध्य का व्यापक होने से उपाधि न होगा और यदि केवल साध्यव्यापक का व्यवच्छेद नहीं होता है तो विशेषण व्यर्थ हो जायगा; कारण कि केवल प्रयोजन होने से विशेषण सफल नहीं होता है; किन्तु

अस्तु वा कथमपि, तथापि श्यामत्वं न व्याप्नोति, इन्द्रनीलशिलादिश्यामलस्या-हाराजन्यत्वात् । शरीरश्यामत्वं, साध्यं तच्च व्याप्नोत्येवेदमिति चेन्न । व्याप्तावुपाधेरभि-धेयत्वात् । नच पुरुषश्यामत्वेन व्याप्तिः । हेतुपक्षधर्मतयैव हि साध्यं पक्षधर्मः सिद्ध्यति न व्याप्त्या, अन्यथा पुरुषपदस्य व्यवच्छेदकस्याविशेषणत्वापातात् । परम्परासम्बन्धि-कज्जलादिलेपश्यामलव्यवच्छेदकत्वे च संयुक्तश्यामपुरुषसमवेतश्यामलस्य परम्परासम्ब-न्धिनः कथं व्यवच्छेदः स्यात् । नच साध्यसाधनसम्बन्धादृष्टव्यभिचारत्वं साध्यव्याप-कत्वं मा रूपसाक्षात्कृतिकरणादेस्तैजसादित्वे साध्ये भूदुद्भूतरूपवत्वादेरुपाधित्वम् । साधनेनापि च विशेषणतया निवेश्येन यदि केवलसाध्यव्यापकं व्यवच्छेद्यं, तदा तस्य व्यभिचारशङ्काधानक्षमस्याप्युपाधित्वं न स्यात् । अथ न किञ्चिद्व्यवच्छेद्यं तदा विशेष-णत्वासिद्धिरेव । न हि प्रयोजनमात्राद्विशेषणमर्थवद्भवति, किन्तु किञ्चिद्व्यवच्छेदादिति । अन्यथा शरीरजन्यत्वमिवाकर्तृकत्वे व्यक्तमसिद्धौ पर्य्यवस्येदिति ॥ ६ ॥

किञ्च आभासे व्यतिरेकिणि पक्षधर्म्महेतौ जीवच्छरीरं पृथिव्याद्यष्टद्रव्यातिरि-क्तानेकद्रव्यवत्, प्राणादिमत्वादित्यादौ कथमिदमुपाधिलक्षणं व्यवस्थाप्यं, न ह्याभासे

किसीका व्यवच्छेद होने से सफल होता है । अन्यथा जैसे "क्षित्यङ्कुरादिकम् कर्तृजन्यं शरीरा-
जन्यत्वात्" इस स्थल में शरीरविशेषण के व्यवच्छेदकत्व न होने से व्याप्यत्वासिद्धि होती है,
वैसे ही "मैत्रतनयत्वम्, श्यामत्वव्यभिचारि, मैत्रतनयत्वावच्छिन्नश्यामत्वव्यापकशाकपाक-
जत्वव्यभिचारित्वात्" इस उपाधिव्यभिचार से साध्यव्यभिचार के अनुमितिस्थल में भी हेतुदल
में मैत्रतनयत्वरूप विशेषण के व्यवच्छेदकत्व न होने से व्याप्यत्वासिद्धि हो जायगी ॥ ६ ॥

किञ्च केवलव्यतिरेकीआभास में जहाँ पक्ष में हेतु है, अर्थात् "जीवच्छरीरं पृथिव्याद्यष्टद्रव्यातिरिक्तानेकद्रव्यवत् प्राणादिमत्वात्" इस स्थल में इस लक्षण की व्यवस्था कैसे होगी । केवल व्यतिरेकीआभास में जो साध्य है वह उपाधि (भोगायतनत्व) से व्याप्त नहीं है, कारण कि ऐसा मानने पर, पर के अभिमत साध्य की कहीं सिद्धि हो जायगी ।

समर्थन—व्यतिरेकीआभास में व्यतिरेक व्याप्ति में ही उपाधि होती है, अतः उपाधि के व्याप्त होने से साध्य की कहीं सिद्धि नहीं हो सकती है ।

खण्डन—व्यतिरेकव्याप्ति भी "यत्र यत्र पृथिव्याद्यष्टद्रव्यातिरिक्तानेकद्रव्यवत्वं नास्ति, तत्र तत्र प्राणादिमत्वं नास्ति" यही है । उसमें जो पृथिव्याद्यष्टद्रव्यातिरिक्तानेकद्रव्यवत्वरूप साध्य का भाव व्याप्य है, उसका व्याप्य अभोगायतनत्वरूप उपाधि है—ऐसा अवश्य मानना होगा, अन्यथा यदि उपाधि को साध्याभाव का व्याप्य न मानें तो अभोगायतनत्वरूप उपाधि के अन्वय में साध्य का अन्वय हो जायगा, अतः फिर भी पराभिमत साध्य की कहीं सिद्धि हो जायगी । उपाधि (अभोगायतनत्व) में जो व्यतिरेकव्याप्ति (यत्र २ साध्याभावो नास्ति तत्र उपाधिर्नास्ति) है, उसके अवश्यम्भाव होने से उपाधि (अभोगायतनत्व) का जो व्यापक (अष्टद्रव्यातिरिक्तानेकद्रव्यवत्वाभाव) उसके व्यतिरेक (अभाव) अष्टद्रव्यातिरिक्तानेकद्रव्यवत्व को उपाधि (अभोगायतनत्व) के व्यतिरेक (अभाव) भोगायतनत्व का व्याप्य अवश्य मानना होगा, अतः पर के अभिमत साध्य की कहीं सिद्धि हो जायगी । असमव्याप्तिक व्याप्यव्यापकस्थल में अर्थात् (जीवच्छरीरं, अष्टद्रव्यातिरिक्तानेकद्रव्यवत

व्यतिरेक्यनुमानात्मनि यत्साध्यं तदुपाधिना व्याप्तमिष्यते तस्य पराभिमतस्य क्वचित् सिद्ध्यापत्तेः। व्यतिरेकयोर्व्याप्तावुपाधिश्चेत् तर्हि व्यतिरेके यद्व्याप्यं तस्य व्याप्य उपाधिरवश्यं मन्तव्योऽन्यथोपाधेरन्वये साध्यान्वयापत्तिरित्युपाधिव्यतिरेकव्याप्त्यवश्यम्भावस्याभ्युपगम्यतया उपाधेर्यद्व्यापकं तद्व्यतिरेक उपाधेर्व्यतिरेकस्य व्याप्यतया मन्तव्य इति परसाध्यापत्तिः। असमव्याप्तिकयोरन्वयव्याप्तिसाध्यसाधनभाववैपरीत्येन व्यतिरेकव्याप्तेरिति। नच दोषान्तरमेव तर्हि वाच्यमिति वाच्यम्। हेतोः पक्षधर्म्मत्वस्थितौ व्याप्तिक्षत्यर्थं त्वयोपाध्युपगमध्रौव्यात् ॥ १० ॥

भवतु वा या काचिद्व्याप्तिर्नाम तत्सत्त्व एवानुमितिभावात् तस्याश्चानुमितेश्च व्याप्तिरेष्टव्या, ततश्चाऽऽत्माश्रयः। तद्भेदे चाऽनुगमाविनिगमौ स्यातामिति।

व्याप्तिपक्षधर्म्मते अनुमितिं भावयत इति वदन्ति। कश्चायं पक्षो नाम यद्धर्म्मत्वं पक्षधर्म्मत्वम्। सिषाधयिषितधर्मा धर्मीति चेन्न। सिषाधयिषा हि प्रतिपिपादयिषा वा स्यात् प्रतिपित्सा वा। आद्ये स्वार्थानुमित्यनुदयप्रसङ्गः। द्वितीये चासुरभिगन्धानुमेयकुत्सितरसविषयस्वार्थानुमित्यनुदयप्रसङ्गः।

प्राणादिमत्वात् इत्यादि स्थल में) अन्वयव्याप्ति में जो साध्यसाधनभाव है, उसके विपरीत साध्यसाधनभाव व्यतिरेकव्याप्ति में होता है। व्यतिरेकी आभास में उपाधि दोष नहीं है, किन्तु अन्य ही दोष है, यह नहीं कह सकते हैं, कारण कि हेतु के पक्ष में होने पर व्याप्ति की क्षति के अर्थ उपाधि अवश्य माननी पड़ेगी। चाहे व्याप्ति कुछ भी हो, परन्तु व्याप्ति होने पर ही अनुमिति होती है, अतः अनुमिति के व्याप्तिजन्य होने से तथा जन्यत्व के व्याप्तिघटित होने से व्याप्ति की व्याप्ति, अनुमिति में अवश्य माननी होगी, तब तो यदि वही व्याप्ति मानें तो आत्माश्रय है और यदि भेद मानें तो उस व्याप्ति की भी अनुमिति में अन्य व्याप्ति होने से अनवस्था तथा अनेक व्याप्ति होने से अननुगम तथा अनेक व्याप्ति होने से कौनसी व्याप्ति अनुमिति का अङ्ग है इसमें विनिगमक का अभाव हो जायगा ॥ १० ॥

किञ्च आचार्य्यलोग कहते हैं कि व्याप्ति और पक्षधर्मता, अनुमिति के कारण हैं। उनमें पक्षधर्म्मता क्या वस्तु है? यदि पक्ष में आश्रितत्व (वृत्तित्व) को पक्षधर्म्मता कहें तो नैयायिक आदि के मत में प्रमेयत्व हेतु न कहावेगा, कारण कि नैयायिक विषयविषयिभावरूप प्रमेयत्व को ज्ञेय और ज्ञान के स्वरूप से अतिरिक्त नहीं मानते हैं और ज्ञेय, ज्ञान, पक्ष जो प्रमेय तदाश्रित नहीं हैं, किन्तु आत्मादि आश्रित हैं। किञ्च पक्ष ही क्या वस्तु है जिसका धर्म्म पक्षधर्म्मता है।

निर्वचन—जिस धर्मी में साध्यरूप धर्म्म की सिषाधयिषा हो वह पक्ष है।

खण्डन—सिषाधयिषा, कथन की इच्छा है या ज्ञान की इच्छा है। यदि प्रथमपक्ष मानें तो स्वार्थानुमिति का उदय नहीं होगा; कारण कि स्वार्थानुमिति में पञ्चावयवरूप प्रतिपादन की इच्छारूप पक्षता नहीं रहती है और अनुमितिमात्र में पक्षधर्म्मता कारण है। द्वितीयपक्ष में "सटित (सड़ा) मांसम्, कुत्सितरसवत्, असुरभिगन्धवत्वात्" यह स्वार्थानुमान नहीं कहावेगा, कारण कि यहां प्रतिपित्सारूप पक्षता नहीं है।

निर्वचन—जिस धर्मी में धर्म्म ज्ञात न हो वह पक्ष है।

न चानवधारितधर्मा धर्मी पक्षः । हेतुमत्तयाऽप्यनवधारणेऽनुमानोदयनिदानभावासम्भवात्, अवधारणे चानवधारितधर्मत्वानुपपत्तेः ॥ ११ ॥

समर्थन—प्रतियोगी और प्रतियोगीव्याप्त के अभाव से युक्त प्रतियोगी प्रमाजनक साकल्य उक्त स्थल में नहीं है, किन्तु प्रतियोगी का सन्निकर्ष ही है, अतः अभाव की प्रमा नहीं होती है ।

खण्डन—प्रतियोगीव्याप्त के अभाव को प्रतियोगी के अभाव से अन्यथासिद्ध होने से उसके अभाव का प्रमा के हेतुत्व में प्रमाण नहीं है, अर्थात् जब अभाव की प्रमा में प्रति-

लोकस्याध्यक्षणे नालोकान्तरवत्ताऽवयवेनावयविना वा, आलोकेनान्यथासिद्धसन्निधि-रहेतुरित्यालोकाभावग्रहे सा नापेक्ष्यते ॥ ३८ ॥

अर्थात्तद्योगस्तु नार्थव्याप्तोंऽशतयैक्यात् । तद्विरहसहितः स तथेति चेन्न, इन्द्रियसन्निकर्षस्य हि प्रतियोग्यनुपलम्भे तावद्धेतुताऽङ्गीक्रियते तत्र । किं सन्निकर्षव्यतिरेके कार्य्यानुदयोदाहरणमेष्टव्यं न वा, न यदि, तदा सन्निकर्षस्य हेतुतैव कुतो मन्तव्याऽन्यथैव कार्य्योत्पत्त्युपपत्तेः । एष्टव्यश्चेत्तर्हि तत्रैवोदाहरणे व्यवधायकेनेन्द्रियसन्निकर्षशून्ये परमार्थतश्चाभाववत्युक्तकारणसम्पत्तेरभावप्रमा स्यात् । तत्र व्यवधायकाभावः प्रतियोग्युपलम्भको नास्तीति चेन्न । सन्निकर्षस्य प्रमाव्यतिरेकप्रयोजकत्वावधारणोदाहरणमेव तर्हि तन्न स्यात् । व्यवधायकस्य सन्निकर्षविरोधिनैव प्रमाविरोधित्वमिति चेत्तर्हि व्यवधायकाभावः सन्निकर्षोत्पत्तौ कारणं, न त्वभावप्रमाविशेषोत्पत्ताविति स्थिते स प्रसङ्गस्तदवस्थ एव । नच सन्निकर्षाभावादेव तदानीमुक्तकारणासम्पत्तिः प्रतियोगिसन्निक-

---

योगी-व्याप्त का अभाव कारण ही नहीं है, तब प्रतियोगीव्याप्त के होने पर भी अभाव-प्रमा होनी चाहिये, अन्यथासिद्ध हेतु नहीं होते हैं ? इसीसे अवयवी अथवा अवयवरूप आलोक के प्रत्यक्ष में अवयव अथवा अवयवीरूप अन्य आलोक (अन्यथासिद्ध होने से) कारण नहीं होता है, आलोक के प्रत्यक्ष में अकारण होने से ही आलोक के अभाव (तमः) के प्रत्यक्ष में भी आलोक की अपेक्षा नहीं होती है ॥३८॥

किञ्च योग्यता के लक्षण में तदविनाभूत शब्द से प्रतियोगी के सन्निकर्ष का ग्रहण अभिप्रेत है, परंतु प्रतियोगी से व्याप्त प्रतियोगी का सन्निकर्ष होता नहीं है, कारण कि प्रतियोगी का सन्निकर्ष "प्रतियोगी" से घटित है, अतः अंशतः एक है और स्व से व्याप्त, स्व होता नहीं है ।

समर्थन—प्रतियोगी के अभाव से सहित प्रतियोगी की प्रमा के जनक साकल्य अभावप्रमा का हेतु है और प्रतियोगी के प्रत्यक्षस्थल में प्रतियोगी का अभाव नहीं है, अतः अभाव की प्रमा नहीं होती है ।

खण्डन—इन्द्रिय के सन्निकर्ष को प्रतियोगी के उपलम्भ में हेतु मानते हैं, अतः सन्निकर्ष के अभाव में प्रतियोगी का अप्रत्यक्ष इष्ट है । अन्यथा सन्निकर्ष की हेतुता सिद्ध कैसे होगी, कारण कि सन्निकर्ष के विना भी कार्य्य की उत्पत्ति हो गई । यदि उक्तस्थल में अप्रत्यक्ष इष्ट है तो उसी उदाहरण में व्यवधायक के होने से इन्द्रिय सन्निकर्ष नहीं है और वस्तुतः अभाव है और उक्त योग्यता भी है, अतः अभाव की प्रमा होनी चाहिये ।

समर्थन—वहाँ व्यवधायक का अभावरूप प्रतियोगी के उपलम्भ का कारण नहीं है, अतः उक्त योग्यता के न होने से अभाव की प्रमा नहीं होती है ।

खण्डन—यदि व्यवधायक के अभाव को कारण मानें, तो सन्निकर्ष के अभाव से प्रतियोगी की प्रमा का अभाव उक्तस्थल में नहीं हुआ, अतः सन्निकर्ष की हेतुता सिद्ध नहीं होगी, यदि कहें कि व्यवधायक, सन्निकर्ष के विरोधी होने से प्रमा का विरोधी है ? तो व्यवधायक का अभाव सन्निकर्ष की उत्पत्ति में कारण है, प्रतियोगी की प्रमा में नहीं, अतः उक्तस्थल में अभाव की प्रमा क्यों नहीं होती है, यह प्रसङ्ग वैसा ही रहा ।

र्पस्याभावप्रमोत्पादकत्वे नित्यं तदनुत्पत्त्यापत्तेः। अतएव नाव्यवधानमधिकं कारणमेष्टव्यं, इन्द्रियसन्निकर्षे एव तदुपपत्तेः। नचाश्रयसाक्षात्कारोपि प्राङ्नास्तिताग्रहादौ व्यभिचारात् ॥ ३९ ॥

ननु व्यवधायकसद्भावेऽपि यत्र परमार्थतोऽस्त्यभावस्तत्रोक्तकारणादभावावधारणमस्त्येव को विरोधः। स न तावद्भावयोगिन्यपि तावता तद्विरहप्रमा प्रसज्येत। तर्हि प्रतियोग्यभावसहितोऽनुपलम्भ एवाभावप्रमाणमस्तु, जहीहि योग्यताविशेषणनिवेशव्यसनम्। योग्यताविशेषणाप्रक्षेपेऽनुपलम्भमात्रतो वस्तुगत्या प्रतियोग्यभाववत्यपि नाभावनिश्चयः, कदाचित्तु संशयो जायते, तत्कथं तथाङ्गीक्रियत इति चेत् तर्हि व्यवधानेऽप्येवमेवेति योग्यताविशेषणप्रक्षेपेऽपि तुल्यम् ॥ ४० ॥

समर्थन—प्रतियोगी का सन्निकर्ष, प्रतियोगी का व्याप्त नहीं है, कारण कि अंशतः एक है और स्व से स्व, व्याप्त होता नहीं है ? अतः तत् तत् अविनाभूत से अन्य प्रतियोगी के प्रमापक साकल्य के मध्य में प्रतियोगी का सन्निकर्ष भी प्राप्त हुआ और उक्तस्थल में वह है नहीं, अतः अभाव की प्रमा नहीं होती है।

खण्डन—प्रतियोगी का सन्निकर्ष, अभाव की प्रमा का कारण नहीं है, कारण कि यदि प्रतियोगी के सन्निकर्ष को अभाव की प्रमा का कारण मानें तो प्रतियोगी के सन्निकर्षस्थल में सर्वत्र अभाव का ही ग्रहण होने लगेगा—और व्यवधायक के अभाव के तुल्य व्यवधान का अभाव भी प्रतियोगी के प्रत्यक्ष में अधिक कारण नहीं है ? कारण कि सन्निकर्ष की उत्पत्ति में ही उसका सार्थक्य है।

समर्थन—अभाव के प्रत्यक्ष में आश्रय का साक्षात्कार भी कारण है और उक्त स्थल में वह नहीं है, अतः अभाव की प्रमा नहीं होती है।

खण्डन—यदि अभाव की प्रमा में आश्रय के साक्षात्कार को कारण मानें, तो गृह से बाहरस्थित पुरुष का गृहनिष्ठ चैत्राभाव का प्रत्यक्ष नहीं होगी, कारण कि आश्रय का साक्षात्कार नहीं है ॥ ३९ ॥

समर्थन—व्यवधायक के होने पर वस्तुतः जहाँ अभाव है, वहाँ उक्त कारण से अभाव का ज्ञान होता ही है, विरोध ही क्या है इससे जहाँ भाव है वहाँ अभाव की प्रमा नहीं होगी।

खण्डन—तब प्रतियोगी के अभाव से विशिष्ट अनुपलम्भ को ही अभाव की प्रमा का कारण मानिये, योग्यता के निवेश के व्यसन को छोड़िये।

समर्थन—यदि योग्यता का निवेश न करें तो कदाचित् अन्धकारादि में अभावयुक्त देश में भी अनुपलब्धिमात्र से अभाव का निश्चय नहीं होता है, किन्तु सन्देह ही होता है वह उपपन्न कैसे होगा ?

खण्डन—तब तो व्यवधायक होने पर भी अभाव का सन्देह हीं होता है, निश्चय नहीं होता है और उक्त योग्यता के निवेश करने पर अभाव का निश्चय हो जायगा। वह अनुभव से विरुद्ध है, अतः उक्त योग्यता का निवेश निर्दोष नहीं है ॥४०॥

किञ्च मेय का वास्तविक सत्व, प्रमाण कोटि में निवेश के अर्ह नहीं है, कारण कि मेयरूप वस्तु के सत्व के निर्धारण के अर्थ ही विचारक लोग प्रमाण अप्रमाण का विवेचन,

अपि च मेयस्य वास्तवसत्त्वं प्रमाणकोटावनिवेशार्हमेव मेयवस्तुसत्त्वनिर्द्धारणार्थमेव हि प्रमाणाप्रमाणविवेचनं विचारकाणाम्। अन्यथाऽनुमाने व्याप्तावुपाधिनिरासायायासो व्यर्थः स्यात्, व्याप्तपक्षधर्मताज्ञानमात्रस्यैव कारणत्वाङ्गीकारेण सौस्थ्यात्। प्राङ्नास्तिताप्रमितौ च यद्यभावप्रमाणतां मन्यसे, तर्हि सा न स्यात्। तत्रेदानीं जायमानाभावप्रमोत्पत्तावभाववास्तवसत्ताविरहस्यापीदानीं क्वचित्सम्भवात्। फलविषयकालिकाभावोपलक्षिताश्रयादेः कारणकोटिनिवेशने विशेषाभावात्। तदुपलक्षितत्वस्यैव विशेषणस्य विशेषत्वेऽतिप्रसङ्गात्। तथापि सामान्यतो विशेषाभावोऽसिद्ध इति चेन्न, तस्य सत्त्वे निर्व्वचनापातात् ॥४१॥

लक्षण से करते हैं, अन्यथा (यदि मेय के स्वरूप का प्रमाणदल में निवेश कर सकें तो) अनुमानस्थल में व्याप्ति में उपाधि के निरास के अर्थ प्रयास व्यर्थ हो जायगा, कारण कि मेय से विशिष्ट व्याप्तिपक्षधर्म्मता के ज्ञानमात्र की कारणता के स्वीकार से ही निर्वाह हो जायगा।

किञ्च यदि प्रतियोगी के अभाव से विशिष्ट प्रतियोगी के प्रमापक साकल्यरूप योग्यता से विशिष्ट अनुपलब्धि को प्रमाण मानें, तो जहां सम्प्रति भाव है; परन्तु पहले अभाव था, वहां अतीत अभाव का "प्रागत्र घटो नासीत्" ऐसी प्रमा नहीं होगी, कारण कि सम्प्रति अभावघटित उक्त प्रमाण नहीं है। यदि फल (प्रमा) विषय जो अतीतकाल, तात्कालिक अभाव से उपलक्षित अधिकरण से विशिष्ट प्रतियोगी के प्रमापक साकल्य को योग्यता कहें तो उक्त स्थल में यद्यपि आपाततः दोष की प्रतीति नहीं होती है, तथापि उक्त निवेश में कोई विशेष नहीं है। फलविषयकालिकाभावोपलक्षितत्व के अतिप्रसङ्ग होने से विशेष कह नहीं सकते हैं और यदि अभाव से उपलक्षित आश्रय को अभाव के प्रत्यक्ष में कारण मानें तो सर्वत्र प्रतियोगी से युक्त अधिकरण में अभाव की प्रमा हो जायगी, कारण कि यदा कदाचित् विद्यमान अभाव से उपलक्षित प्रतियोगी से युक्त अधिकरणमात्र है ही।

समर्थन—यद्यपि विशेष का निर्वचन नहीं हो सकता, तथापि प्राङ्नास्तितास्थल में अभाव की प्रमा होती है और अन्यत्र प्रतियोगी से युक्त अधिकरण में अभाव की प्रमा नहीं होती है, अतः फल के अनुरोध से विशेष की कल्पना करेंगे कि कोई विशेष है।

खण्डन—यदि उक्त स्थल में विशेष है तो अवश्य उसका निर्वचन करना चाहिये अन्यथा सामान्य से ही सर्वत्र उत्तर होगा, विशेष से उत्तर का सर्वत्र अभाव हो जायगा ॥ ४१ ॥

इति अनुपलब्धिखण्डन

अथ असिद्धलक्षणखण्डनानुवाद

असिद्ध भी क्या वस्तु है ? अर्थात् लक्षण न होने से अनिर्वचनीय है।

निर्वचन—व्याप्ति और पक्षधर्मता से जो अप्रमित हो वह असिद्ध है।

कश्चाऽयमसिद्धो नाम ? तथाहि-व्याप्तिपक्षधर्मलाभ्यामप्रमितोऽसिद्ध इत्यलक्षणं, हेत्वाभासान्तराणामपि ह्यसिद्धप्रवेश एवं सति स्यात् । व्याप्तिं पक्षधर्मतां तत्प्रमितिं वा न विरुन्धतां हेतुदोषत्वासम्भवात्

ननु नेदमीदृशं तथाहि—केचिद्दोषा व्याप्तिपक्षधर्मतातत्प्रमितिविरहात्मानः, केचित्तु व्याप्त्यादिभङ्गे लिङ्गभूताः, प्रतिबन्धकतयाऽनुमित्युत्पत्तिं निरुन्धनाश्च केचिद्दोषभूयं भजन्ते। तत्र प्रथमे तावदसिद्धमध्यमध्यासते, तद्यथा—व्याप्यत्वासिद्धः सोपाधिरूपः अनौपाधिकसम्बन्धिता हि व्याप्तिः सहोपाधिता चानुपाधिताविरहरूपैव एवमधिकरणासिद्धिरप्यसिद्धावेवान्तर्भविष्णुः पक्षपदोपात्तस्याश्रयस्य व्यतिरेकरूपा हि सा ॥४२॥

सिद्धसाधनमपि तथैव । सिषाधयिषितधर्मविशिष्टो हि पक्ष उच्यते, यच्च सिद्धं न तत्र सिषाधयिषाऽस्ति ततो, विशेषणाभावायत्तो विशिष्टपक्षरूपस्य तत्राभावः । नच वाच्यं यथा सव्यभिचारत्वान्नष्टव्याप्तिकमिति पृथगेव सव्यभिचारस्य दोषत्वं तथासिद्धत्वात्तत्र सिषाधयिषा नास्तीति सिद्धत्वस्यापि पृथगेव दोषत्वं प्राप्नोति लिङ्गद्वारेणासिद्धिपर्य्यवसायित्वात्, अन्यथा व्याप्त्यादिविरहपर्य्यवसायितमात्रेण सव्यभिचारत्वादीनामप्यसिद्धावेवान्तर्भावः स्यादिति । यतः सिषाधयिषाभावो न प्रतिपत्त्रा सिद्धत्वा-

---

खण्डन—ऐसा मानने पर अन्य विरुद्ध आदि हेत्वाभासों का भी असिद्ध में ही प्रवेश हो जायगा, कारण कि व्याप्ति तथा पक्षधर्मता और इनकी प्रमिति के जो विरोधी नहीं हैं, वे हेतु दोष ही नहीं हैं, और विरुद्धादि हेतु दोष हैं, अतः व्याप्ति तथा पक्षधर्मता और तत्प्रमिति के अवश्य विरोधी हैं और विरोधी होने से व्याप्तिपक्षधर्म्मता से अप्रमित हैं

समर्थन—यह वस्तु ऐसी नहीं है । देखिये—कोई दोष व्याप्तिपक्षधर्मतातत्प्रमिति के अभाव रूप हैं और कोई दोष व्याप्ति आदि के अभाव में अनुमापक हेतु हैं तथा कोई प्रतिबन्धक होने से अनुमिति के निरोध करने से दोष हैं। उनमें प्रथम दोष असिद्ध के मध्य में स्थित है, कारण कि व्याप्यत्वासिद्ध सोपाधिरूप है, और अनौपाधिक सम्बन्ध ही व्याप्ति है और अनुपाधित्व-विरहरूप सोपाधित्व है, इसी प्रकार अधिकरणासिद्धि भी असिद्ध के मध्य में ही अन्तर्भूत होने योग्य है, कारण कि पक्षपद से उपात्त आश्रय का व्यतिरेकरूप अधिकरणासिद्धि है ॥ ४२ ॥

तथा सिद्धसाधन भी असिद्ध के मध्य में अन्तर्भूत है, कारण कि सिषाधयिषित धर्मविशिष्ट ही पक्ष है और जो सिद्ध है उसमें सिषाधयिषा होती नहीं, तस्मात् विशेषण (सिषाधयिषा) के अभाव से प्रयुक्त विशिष्टरूप पक्ष का वहां भी अभाव है ही ।

प्रश्न—जैसे—यह हेतु, नष्टव्याप्तिक है, सव्यभिचार होने से, ऐसी अनुमिति होती है, अतः असिद्ध से पृथक् ही सव्यभिचारत्व दोष होता है, ऐसे ही साध्य के सिद्ध होने से सिषाधयिषा नहीं होती है; अतः सिद्धत्व भी असिद्धि से पृथक् ही दोष होना चाहिये, कारण कि सिद्धत्व का पर्यवसान हेतुरूपता द्वारा असिद्धि में है, अन्यथा (यदि सिद्धसाधन को पृथक् दोष न मानें तो) व्याप्त्यादि के विरह में पर्यवसान होने से सव्यभिचार आदि का भी असिद्ध में ही अन्तर्भाव क्यों न हो ।

ल्लिङ्गाद्गम्यते । किं नाम ? इच्छाभावस्य तस्य यथादर्शनं प्रत्यक्षादेरेवाधिगम, इच्छैव तु तत्र यन्नास्ति तत्र सिद्धत्वं प्रयोजकमित्येतावन्मात्रेण सिद्धत्वमुपन्यस्यते सिद्धसाधने न त्विच्छाभावमनुमातुं लिङ्गतयेति । एवं स्वरूपासिद्धिरपि पक्षधर्मताविरहरूपैव ॥४३॥

ये तु व्याप्तिपक्षधर्म्मताविरहलिङ्गभूतास्तेऽसिद्धतः पृथगेव हेत्वाभासाः। तद्यथा—विरुद्धः साध्यविपरीतव्याप्तः तत्र साध्यव्यतिरेकव्याप्तता हेतोर्न साध्यव्याप्तताभावः । किन्नाम ? साध्यव्यतिरेकेण सहानौपाधिकः सम्बन्धोऽन्य एवासौ, इत्थमेव पक्षधर्मता-विरहात्माऽपि नायम् । किन्नाम ? ततःसाध्यव्यतिरेकेण सह निरुपाधिसम्बन्धत्वात् तत्र साध्यव्याप्तिरस्य नास्तीत्यनुमीयते । तथासति च साध्यव्याप्तिव्यतिरेकलिङ्गं सद्विरुद्धः पृथगेव हेत्वाभासो भवति ॥४४॥

एवमनैकान्तिकोऽपि न व्याप्तिव्यतिरेकरूपः, किन्तु तल्लिङ्गमेव। तथाहि—हेतोर-न्वयस्य व्यतिरेकस्य वा व्यभिचारो न साध्यसाधनव्याप्तिविरहात्मा, किं नाम ? व्यभि-चारो हेतोः साध्यव्याप्तिविरहं विना न सम्भवतीति लिङ्गभावेन व्याप्तिभङ्गं बोधयति, यदि हि निरुपाधिः साध्येन सम्बन्धोऽस्य भवेत्, कथं व्यभिचरितुं शक्नुयात्तस्माद्व्या-प्तिविरहलिङ्गं व्यभिचारः, नतु व्याप्तिविरहः । पक्षधर्मताविरहरूपता त्वनैकान्तिकस्या-सम्भावितैव ॥४५॥

उत्तर—सिषाधयिषाऽभाव का ज्ञान सिद्धत्वरूप हेतु से नहीं होता है, किन्तु इच्छाऽभावरूप सिषाधयिषाऽभाव का ज्ञान न्यायमत में प्रत्यक्ष से और मीमांसा मत में अनुपलब्धि से ही होता है, जहां जो इच्छा नहीं होती है उसमें सिद्धत्व प्रयोजक है, इससे ही सिद्धत्व का सिद्धसाधन में कथन है इच्छाभाव के अनुमान से नहीं ।

इसी प्रकार "शब्दोऽनित्यः चाक्षुषत्वात्" यहां स्वरूपासिद्धि भी पक्षवृत्तित्वरूप पक्षधर्मता का अभावरूप ही है ॥४३॥

जो दोष व्याप्ति, पक्ष-धर्मता के अभाव के हेतु हैं, वे असिद्ध से पृथक् ही हेत्वा-भास हैं । देखिये—साध्याभाव से व्याप्त विरुद्ध है और हेतु में साध्याभावव्याप्तता साध्य-व्याप्तत्वाभाव नहीं है ; किन्तु साध्याभाव के साथ अनौपाधिक सम्बन्धरूप है । इसी प्रकार विरुद्ध पक्षधर्मता का विरहरूप भी नहीं है; किन्तु साध्याभाव के साथ निरुपाधिक सम्बन्ध होने से "साध्य की व्याप्ति इस हेतु में नहीं है" ऐसी अनुमिति होती है। अतः विरुद्ध साध्य की व्याप्ति के अभाव में हेतु होने से पृथक् ही हेत्वाभास है ।।४४॥

इसी प्रकार अनैकान्तिक भी व्याप्ति का अभावरूप नहीं है, किन्तु व्याप्त्यभाव का लिङ्गरूप है, देखिये—हेतु के अन्वय वा व्यतिरेक का व्यभिचार साध्यसाधनव्याप्तिविरह—रूप नहीं है, किन्तु व्यभिचार, हेतु में साध्य की व्याप्ति के विरह के विना हो नहीं सकता, अतः हेतुरूप से व्याप्ति के भङ्ग का बोधन करता है। यदि हेतु में साध्य का निरुपाधिक सम्बन्ध होता तो व्यभिचार कैसे होता इससे व्याप्तिविरह का लिङ्गव्यभिचार है, व्याप्ति-विरहरूप नहीं है। "शब्दोऽनित्यः सत्वात्" इत्यादि व्यभिचारस्थल में पक्षधर्मता है, अतः व्यभिचार पक्षधर्मता का विरहरूप नहीं है ॥४५॥

सत्प्रतिपक्ष में प्रकृतहेतु में प्रतिहेतु से व्याप्तिपक्षधर्मता का सत्य असत्वरूप विशेष

सत्प्रतिपक्षतायां चानवगम्यमानविशेषप्रतिपक्षप्रतिरुद्धतया यत्साध्यनिश्चयाजनकत्वं हेतोः स प्रतिबन्धकसद्भावे कार्याजनकत्वमितरकारणसाधारणो वस्तुस्वभावः, तस्य व्याप्तिपक्षधर्मताविरहरूपताऽसम्भावितैव ॥४६॥

बाधस्तु साधनवति पक्षे साध्याभावबोधनात्मा भवन्नपि न व्याप्तिविरहावगमरूपः। सामान्यतोऽनौपाधिकसम्बन्धरूपा हि व्याप्तिः, साधनवति च पक्षे साध्यविरहो न सोपाधिता साध्याविरोधिस्वभावत्वात्तस्याः। नाप्यसौ सामान्यतः साध्यसाधनसम्बन्धस्य विरहरूपः, बाधे सत्यपि सामान्येन साध्यसाधनयोः सम्बन्धस्य दृष्टान्तावगतस्यानपलापात्, बाधस्य किञ्चिद्विशेषविषयत्वात् सामान्याकारपरिगृहीतस्य सम्बन्धस्य विशेषान्तरमादाय पर्यवसानाऽविरोधात्। तस्माद्विशेषबाधेन सामान्यतः सम्बन्धस्य सोपाधिताऽनुमीयते निरुपाधित्वे बाधानुपपत्तेः। यथाह "बाधाद्वोपाधिरुन्नीयतेऽन्यथा वेति न कश्चिद्विशेष" इति ॥४७॥

अन्यस्तु सत्प्रतिपक्षवत् बाधस्यापि प्रतिबन्धकत्वमेव तेन बाधे सति प्रतिबद्धत्वान्निश्चयं न करोति हेतुरिति व्याप्तिपक्षधर्म्मतादोषमनालोच्य अन्यथैव बाधस्य दोषत्वमित्याह ॥४८॥

तस्माद्व्याप्तिपक्षधर्म्मताप्रमितित्वानां यत्र साक्षादेव विरहस्योद्भावनं तत्रासिद्धः। यत्र तु व्याप्त्यादिविरहलिङ्गोपन्यासःसत्प्रतिपक्षोपन्यासो वा तत्रान्यो हेत्वाभासः ॥४९॥

ज्ञात नहीं है, अतः प्रतिहेतु प्रतिबद्ध होने से हेतु में जो साध्यनिश्चय का अजनकत्व है, वह प्रतिबन्धक होने पर कार्य का अजनकत्व इतर कारण के साधारण वस्तु का स्वभाव है वह सत्प्रतिपक्ष पक्षधर्मता का विरहरूप नहीं है ।४६॥

साधनयुक्त अधिकरण में साध्याभाव का ज्ञानरूप बाध भी व्याप्ति-विरह का ज्ञान रूप नहीं है। देखिये—सामान्य से अनौपाधिकसम्बन्धरूप व्याप्ति है और साधनवाले पक्ष में साध्य का विरह उपाधि रूप नहीं है, क्योंकि उपाधि साध्य का विरोधिरूप नहीं है और साध्यविरह साध्य का विरोधिरूप है। तथा बाध सामान्य से साध्यसाधन के सम्बन्धका विरहरूप भी नहीं है कारण कि बाध होने पर भी दृष्टान्त में ज्ञात साध्यसाधनसंबन्ध का अपलाप. नहीं हो सकता। बाध पर्वतादि विशेष विषयक है और सामान्याकार से गृहीत व्याप्ति का अन्य विशेष (महानस) का आदान कर भी पर्यवसान हो सकता है, अतः विशेष विषयक बाध से सामान्य से गृहीत सम्बन्ध में सोपाधित्व का अनुमान होता है, कारण कि निरुपाधि, में बाध नहीं हो सकता यह बात कही भी है कि बाध से अथवा—अनुकूल तर्काभाव से उपाधि का अनुमान होता है ॥४७॥

अन्य अचार्य्य तो सत्प्रतिपक्ष के तुल्य बाध को भी अनुमिति का प्रतिबन्धक ही कहते हैं, तस्मात् बाध होने पर प्रतिबन्धक होने से हेतु साध्य का निश्चय नहीं कर सकता है, अतः व्याप्ति वा पक्षधर्मता के अभाव का आलोचन न कर साक्षात् ही बाधदोष है ॥४८॥

इससे जहां व्याप्ति या पक्षधर्मता अथवा तत्प्रमिति के साक्षात् अभाव का उद्भावन हो वहां तो असिद्ध है और जहां व्याप्ति आदि के विरह के लिङ्ग का उपन्यास हो अथवा सत्प्रतिपक्ष का उपन्यास हो वहां अन्य हेत्वाभास हैं ॥४९॥

ननु सोपाधित्वादयोऽपि यतोऽवगम्यन्ते तत् कुतः पृथक् दूषणं न भवत्यनैकान्तिकत्वादिवत् । मैवम् । अनैकान्तिकत्वादेर्व्याप्त्यादिविरहबोधने लिङ्गभावनियमात् पृथगुपन्यासः । सोपाधित्वादेस्तु प्रत्यक्षादपि प्रतीतेः । ननु लिङ्गभावनियमं तत्र प्रतिपादकं किञ्चिदस्ति । नच वाच्यं यत्र लिङ्गात्सोपाधितादेः प्रतीतिरतीन्द्रियप्रभृतिविषये, तत्र तल्लिङ्गं पृथगेव दूषणतयाऽभिधीयतां, न ह्यनैकान्तिकत्वादिकमपि सार्व्वत्रिकं व्याप्तिविरहलिङ्गमिति हेत्वाभासाधिक्यमापन्नमिति । अनैकान्तिकत्वादिवत्तेषां लिङ्गानामैकरूप्येण निर्देष्टुमशक्यत्वात् पृथक् पृथगेव वाऽभिधानमशक्यमपरिसङ्ख्येयत्वादिति । वक्ष्यामश्चाग्रे हेतुं तदनभिधानस्य ॥५०॥

नन्वनुचितमुच्यते व्याप्त्यादिविरहलिङ्गतयाऽनैकान्तिकत्वादीनां पृथग्दूषणत्वमिति यतो व्याप्तिपक्षधर्म्मतोपेतलिङ्गप्रमितिसाध्यानुमितिस्तद्वैकल्यान्न भवेत् । यतश्च सा न भवति तदेव तस्यां दूषणं वक्तुं युक्तमिदमनुमित्युत्पत्तिकारणमिह नास्तीति । नच व्याप्तिपक्षधर्म्मते तत्प्रमितिश्च विहायान्यत्तदुत्पत्तिकारणमस्ति व्यतिरेकोपदर्शनयोग्यं तस्मादनुमितिदोषप्रतीतिकारणत्वमनैकान्तिकत्वादीनां न तु साक्षाद्दोषत्वं दोषप्रति-

---

प्रश्न—जैसे व्याप्ति विरह का लिङ्ग अनैकान्तिक पृथक् हेत्वाभास है, वैसे ही सोपाधित्व का ज्ञान जिनसे होता है वे भी पृथक् हेत्वाभास क्यों न कहावें ।

उत्तर—व्याप्ति-विरह-बोधन में अनैकान्तिक नियम से हेतु होता है, अतः अनैकान्तिक का पृथक् उपन्यास है और हेतु में उपाधि प्रत्यक्ष से भी ज्ञात होता है, लिङ्ग भाव से नियतप्रतिपादक वहाँ कुछ नहीं है ।

प्रश्न—जिस अतीन्द्रियस्थल में लिङ्ग से सोपाधित्व की प्रतीति होती है, वहाँ लिङ्ग को पृथक् दूषण कहना चाहिये, कारण कि अनैकान्तिक भी सर्वत्र व्याप्तिविरह का लिङ्ग नहीं है, अतः हेत्वाभास अधिक हुए ।

उत्तर—अनैकान्तिक के तुल्य उन लिङ्गों का एक रूप से निर्देश नहीं हो सकता और पृथक् भी असंख्येय होने से निर्देश अशक्य है, अतः सोपाधित्व के लिङ्ग पृथक् हेत्वाभास नहीं हैं, इसका अन्य हेतु भी आगे कहेंगे ॥५०॥

प्रश्न—व्याप्ति आदि के विरह का लिङ्ग होने से अनैकान्तिक आदि पृथक् दूषण हैं। आपका यह कथन अनुचित है, कारण कि व्याप्ति-पक्षधर्मता-प्रमिति से साध्य की अनुमिति होती है, और व्याप्तिपक्षधर्मता-प्रमिति के वैकल्य में अनुमिति नहीं होती है, जिनसे अनुमिति नहीं होती है वेही अनुमिति में दोषरूप से कथन के योग्य हैं कि ये अनुमिति के कारण यहाँ नहीं हैं, व्याप्ति, पक्षधर्मता, तत्प्रमिति से अन्य अनुमिति का कारण नहीं है जिनका व्यतिरेक अनुमिति के व्यतिरेक में उपदर्शन योग्य हो। तस्मात् अनुमिति दोष की प्रतीति में कारण अनैकान्तिक आदि हैं, साक्षात् दोष नहीं हैं जो दोष के प्रतिपादक होने से दोष हैं उनका अभिधान साक्षात् दोष के उपजीवन विना अशक्य है, अतः प्रधान दोष का ही दोषरूप से अभिधान युक्त है, सव्यभिचार आदि का दोषरूप से कथनयुक्त

पादकतयापि च दोषत्वं साक्षाद्दोषत्वमनुपजीव्याशक्याभिधानमिति प्रधानदोषस्यैव दोषतयोद्भावनं युक्तं न सव्यभिचारत्वादीनामिति विभागसूत्रमनर्थकमिति ॥५१॥

सत्यमेतत्। साक्षाद्दोषत्वं प्रतिबन्धकस्य व्याप्त्यादिविरहस्य वा, विरुद्धत्वादीनान्तु तत्प्रमापकतया यद्यपि दोषपक्षनिक्षेपस्तथापि विरुद्धत्वादयो यद्दोषप्रतिपादकतयोक्तास्तदुद्भावनलाघवानुरोधात् व्याप्त्यादिविरहे तत्रोद्भाव्यमाने न हेतुर्मन्तुं शक्यते। अनैकान्तिकत्वादौ तूद्भाविते व्याप्त्यादिविरहोऽर्थाद्ध गम्यते। व्याप्त्यादिविरहव्यतिरेकेणानैकान्तिकत्वादेरनुपपन्नत्वात्। यथा तस्माद्दीर्घोऽयमित्युक्ते अस्मात् ह्रस्वः स इत्यर्थाद्गम्यते न तु तत्र प्रतिपाद्यान्तरापेक्षा तथेहापि निरग्नौ धूमोऽस्तीति प्रतिपादिते अग्निनाऽसौ न व्याप्त इत्यर्थाद्गम्यते। न हि सम्भवत्यग्निना च व्याप्तोऽनग्नौ चास्तीति। अतएवाऽऽनन्त्यादतीन्द्रियोपाध्यादिलिङ्गानां येषां पूर्वमनभिधानं समर्थितं तेषामनभिधानेऽयमपि हेतुः। तानि ह्युपाधिलिङ्गानि नार्थवशादुपाधिमनपेक्षाणि गमयन्ति येन येन तेषां व्याप्तिर्नावधारिता तं प्रति तत्प्रतिपादनमन्तरेणाप्रतिपादकत्वस्यापि सम्भवात्। अनैकान्तिकत्वाद्यवगतौ च व्याप्त्यादिविरहबोधाय न प्रतिपादनीयान्तरापेक्षा कस्यचित्सचेतसः सम्भवतीति पूर्व्वपक्षसङ्क्षेपः ॥५२॥

नहीं अतः सव्यभिचार आदि हेत्वाभासत्व का प्रतिपादक गौतम जी का विभाग सूत्र अनर्थक है॥५१॥

उत्तर—यह आपकी शङ्का युक्त ही है, साक्षाद्दोष अनुमिति के प्रतिबन्धक सत्प्रतिपक्ष और व्याप्ति आदि के विरह ही हैं, और विरुद्ध आदि की यद्यपि व्याप्ति आदि के विरह के प्रमापक होने से दोषपक्ष में गणना है, तथापि (दोष के प्रतिपादक होने पर भी) विरुद्ध आदि जो दोषरूप से कहे गये हैं वह उद्भावन में लाघव होने से हैं। देखिये—अनैकान्तिक स्थल में यदि अनैकान्तिक का उद्भावन करें तो व्याप्त्यादि का विरह अर्थाद्गम्य होता है, कारण कि व्याप्ति के विरह के बिना अनैकान्तिकत्व अनुपपन्न है, जैसे उससे यह दीर्घ है—यह कहने पर-इससे वह ह्रस्व है—यह अर्थाद्गम्य होता है अन्य प्रतिपाद्य की अपेक्षा नहीं होती है, वैसे ही अग्नि के अनधिकरण में धूम है ऐसा कहने पर अग्नि से व्याप्ति नहीं है यह अर्थाद्गम्य होता है, कारण कि यह सम्भव नहीं है कि अग्नि से व्याप्त हो और अग्नि के अधिकरण में न रहता हो, अतीन्द्रिय उपाधियों के लिङ्गों के आनन्त्य होने से हेतु दोषरूप से अभिधान नहीं है यह जो पूर्व कह आये हैं उनके अनभिधान में यह भी हेतु जानना चाहिये कि वे उपाधियों के लिंग उपाधि के अर्थवश अन्य प्रतिपाद्य की अनपेक्षा से बोधक नहीं हैं-कारण कि जिस पुरुष ने उपाधि की—उपाधि लिंग में—व्याप्ति नहीं जानी है, सम्भव है वह पुरुष व्याप्ति के प्रतिपादन के बिना उपाधि की अनुमिति न कर सके, किसी सचेता को अनैकान्तिकत्व आदि के अवगम होने पर व्याप्त्यादि-विरह-बोधन के अर्थ अन्य प्रतिपाद्य (व्याप्तिविरह की अनैकान्तिकत्व में व्याप्ति) की अपेक्षा नहीं होती है यह पूर्वपक्ष का संक्षेप है ॥ ५२ ॥

खण्डन—इस रीति से असिद्ध के लक्षण के व्यवस्थित होने पर यह दोष होता है कि (आपने) इस पूर्वपक्षमें उक्त कथन से कीदृश असिद्ध का लक्षण व्यवस्थित किया, व्याप्ति

एवमसिद्धलक्षणे व्यवस्थिते बाधोऽयमभिधीयते। एतेन कीदृशमसिद्धलक्षणं व्यवस्थापितमायुष्मता भवति। व्याप्तिपक्षधर्म्मत्वाभ्यामप्रमितोऽसिद्ध इति तावत् विरुद्धादिषु लक्षणं किन्नास्ति किं वाऽस्ति। यदि नास्ति तदा व्याप्तिपक्षधर्म्मताभ्यां प्रमिता विरुद्धादयः प्राप्नुवन्ति। अथास्ति तदा तेऽप्यसिद्धभेदाः प्राप्ताः। अथैतस्मिंल्लक्षणे सत्यपि ते नासिद्धान्तर्भूताः, तर्हि लक्षणमिदमतिव्यापकमापन्नम्। अथ यत्र व्याप्तिपक्षधर्म्मत्वाप्रमितत्वं साक्षादुद्भाव्यते तदसिद्धमित्युच्यते तर्हि लक्षणान्तरमिदमुक्तं स्यात्। नचैतदपि युक्तं यत्र व्याप्यत्वासिद्धेर्व्याप्तिविरहमात्रं प्रतिपाद्यते तत्र व्याप्तिपक्षधर्म्मताप्रमितत्वानां हानं मिलितं नोद्भाव्यत इति नासावसिद्धः स्यात्। एवं सर्वासिद्धविशेषमुदाहृत्य प्रसङ्गो विधातव्यः॥५३॥

अथ प्रत्येकमिदं लक्षणं व्याप्त्यप्रमिततया साक्षादुद्भाव्योऽसिद्धः पक्षधर्म्मताप्रमिततया चेति तर्हि अन्योन्योदाहरणाव्याप्तेरव्यापकत्वमुभयोः, अथोभयोरप्यसिद्धविशेषलक्षणत्वादन्योन्यविषयाव्यापकता न दोषायेति मन्यसे। न, सामान्यलक्षणे निर्व्वक्तुमशक्ये कथमिदं विशेषलक्षणमपि घटते। अथानुमितेरसाधारणहेतु व्यतिरेकोद्भावनं सामान्यलक्षणमस्तु। मैवम्। सत्प्रतिपक्षोद्भावनं तथेत्यतिव्याप्तेः।

पक्षधर्मता से अप्रमित असिद्ध है—यह लक्षण विरुद्धादि में है अथवा नहीं है। यदि नहीं है तो विरुद्धादि व्याप्तिपक्षधर्म्मता से प्रमित प्राप्त होते हैं और यदि यह लक्षण विरुद्धादि में है तो विरुद्धादि भी असिद्ध के भेद प्राप्त हुए और इस लक्षण के समन्वय होने पर भी यदि विरुद्धादि असिद्ध में अन्तर्भूत नहीं हैं तो यह लक्षण अतिव्याप्ति दोष से दूषित हुआ।

समर्थन—जिसमें व्याप्तिपक्षधर्मता प्रमितत्व का अभाव साक्षात् उद्भावित हो वह असिद्ध है।

खण्डन—यह लक्षणान्तर हुआ, अतः प्रतिज्ञाहानिरूप आपका निग्रह हुआ। किञ्च जिस व्याप्यत्वासिद्ध में केवल व्याप्ति का ही विरह उद्भावित होता है, वहां व्याप्तिपक्षधर्मताप्रमितत्व का अभाव उद्भावित नहीं होता है, अतः वह असिद्ध नहीं कहावेगा, एवं आश्रयासिद्धि स्वरूपासिद्धि में केवल पक्षधर्मता का विरह उद्भावित होता है। उक्त समुदाय का अभाव उद्भावित नहीं होता है, अतः उनमें भी अव्याप्ति हो जायगी॥५३॥

समर्थन—प्रत्येक यह लक्षण है अर्थात् व्याप्ति की प्रमिति के अभाव का जहाँ उद्भावन हो वह असिद्ध है तथा पक्षधर्मता की प्रमिति के अभाव का जहां उद्भावन हो वह असिद्ध है इस प्रकार से दो लक्षण हैं।

खण्डन—ऐसा करने पर प्रथमलक्षण की आश्रयासिद्धि में और द्वितीय लक्षण की व्याप्यत्वासिद्धि में अव्याप्ति हो जायगी। यदि कहें कि असिद्धविशेष के ये लक्षण हैं, अतः अव्याप्ति नहीं है, तो सामान्यलक्षण के न होने पर विशेष लक्षण का निर्वचन अयुक्त है, कारण कि सामान्य के ज्ञान विना विशेष की जिज्ञासा ही नहीं होती है।

समर्थन—अनुमिति के जो असाधारण हेतु उनके अभाव का उद्भावन असिद्ध है।

खण्डन—अनुमिति का असाधारण हेतु असत्प्रतिपक्षत्व भी है और उसका अभाव सत्प्रतिपक्षत्व है, अतः उसका उद्भावन भी असिद्ध हो जायगा, यदि कहें कि अनुमिति के

भावरूपतया हेतुविशेषणे च निरुपाधित्वव्यतिरेकोद्भावनाव्याप्तेः स्वरूपासिद्धिः सर्वप्रमाणसाधारणो दोष इत्यत्र तदुद्भावनाव्याप्तेश्च। अथोच्यते व्याप्तत्वपक्षधर्म्मताभ्यां प्रमितत्वस्य व्यतिरेको यत्र साक्षादुपन्यस्यते सोऽसिद्ध इति इदमप्यलक्षणमव्यापकत्वात्। यत्र व्याप्त्यादिव्यतिरेक उपन्यस्यते, तत्र वस्तुगत्या व्याप्तत्वप्रमितेर्व्यतिरेकोऽस्तु नाम नतूपन्यस्यतेऽपि, प्रयोजनाभावात्। व्याप्तिव्यतिरेकदर्शनादेवानुमानाङ्गवैकल्यात्मनो दोषस्योद्भावनपर्य्यवसानात्। तस्मात्तत्र प्रमितत्वव्यतिरेकोद्भावनं नास्तीत्यव्यापकत्वं दोषः ॥५४॥

ननु विशेषणाद्यभावोऽपि वस्तुतो विशिष्टाभाव एवेति नोक्तदोषः। न, यदि विशेषणाद्यधिको विशिष्टस्तदा तदभावभेदोऽपि स्यात्। अथ नाधिकस्तदा विशेषणाभावत्वान्नान्या सा विशिष्टाभावतेति विशेष्याभावेपि तथात्वे पृथगेव विशिष्टाभावत्वार्थस्तयोरित्यननुगम एव। स्वार्थानुमित्यसिद्ध्यव्याप्तिश्चानुद्भावनादिति ॥५५॥

अथ ब्रूषे यत्र व्याप्तत्वपक्षधर्म्मत्वप्रमितेर्व्यतिरेकः साक्षाच्छक्योपन्यासस्तदसिद्धं शक्योपन्यासत्वस्यानुपन्यस्तेपि सम्भवान्नास्त्यव्यापकतेति। नैतदपि युक्तम्। तथाहि शक्योपन्यासत्वं किं शक्यस्वरूपनिर्देशत्वमात्रं, उत शक्यप्रमापणत्वम्। आद्येऽ

असाधारण जो भावरूप हेतु उसका व्यतिरेकोद्भावन असिद्धि है तो व्याप्यत्वासिद्धि में अव्याप्ति हो जायगी, कारण कि अनुमिति के असाधारण हेतु अनौपाधिकत्व भाव रूप नहीं है। किञ्च स्वरूपासिद्धि सर्वप्रमाण का साधारण दोष है, अनुमिति का असाधारण नहीं है, अतः उसके उद्भावन में अव्याप्ति हो जायगी।

समर्थन—जहां व्याप्तत्व पक्षधर्मत्व से प्रमितत्व का व्यतिरेक साक्षात् उद्भावित हो वह असिद्ध है।

खण्डन—अव्यापक होने से यह भी अलक्षण है, कारण कि जहां व्याप्ति के व्यतिरेक का उद्भावन होता है, वहां वस्तुतः व्याप्ति-प्रमिति का व्यतिरेक है भी, परन्तु उसका उपन्यास प्रयोजनाभाव से नहीं होता है, कारण कि व्याप्तिव्यतिरेक के दर्शन से ही अनुमान के साधन के अभाव का उद्भावन हो गया, तस्मात् यहां प्रमितत्वव्यतिरेक का उद्भावन नहीं होता है, अतः अव्याप्ति दोष हो जायगा ॥ ५४ ॥

समर्थन—विशेषण (व्याप्ति) का अभाव भी वस्तुतः विशिष्ट (व्याप्ति-प्रमितत्व) का अभाव रूप ही है, अतः उक्त दोष नहीं होगा।

खण्डन—यदि विशिष्ट विशेषण, विशेष्य से भिन्न है, तो विशिष्टाभाव भी विशेषणाभाव से भिन्न ही है और यदि विशिष्ट विशेषण वा विशेष्य से भिन्न नहीं है तो विशेषणाभाव विशिष्टाभाव जैसे है वैसे ही विशेष्याभाव भी विशिष्टाभाव है, अतः अननुगम हो जायगा। किञ्च स्वार्थानुमिति में व्याप्त्यादि व्यतिरेक के उद्भावन के न होने से अव्याप्ति हो जायगी ॥ ५५ ॥

समर्थन—जिस स्थल में व्याप्ति-पक्षधर्मताप्रमितत्व का व्यतिरेक साक्षात् शक्योपन्यास हो वह असिद्ध है, जहां उपन्यास नहीं होता है, वहां भी उपन्यास हो सकता है, अतः अव्याप्ति नहीं होगी।

नैकान्तिकादावपि व्याप्तिशून्यत्वं शक्यप्रतिज्ञमभवत्येव। द्वितीयेऽपि यदि साक्षादिति प्रत्यक्षेणेत्यर्थः, तदा प्रत्यक्षेण प्रमापणीयत्वं व्याप्तिपक्षधर्म्मताप्रमितिविरहस्य प्रत्यक्ष-प्रतियोगिकाभावप्रत्यक्षतावादिमते विरुद्धादावप्यस्तीत्यतिव्याप्तिः। अन्यमते न क्वचि-दपीति सर्वाव्याप्तिः ॥५६॥

अथ व्याप्तिपक्षधर्म्मताविरहस्यापि प्रत्यक्षप्रमापणीयता विवक्षिता सा न युक्ता, उक्तलक्षणवाक्यस्य व्याप्तिपक्षधर्म्मताविरहानभिधायित्वात्। तद्विरहेऽपि तात्पर्याभ्यु-पगमे प्रत्येकसमुदितलक्षणताविकल्पेनाव्यापकत्वापातात्। अतीन्द्रियपक्षादिविरहे च विषये तदभावादव्यापकत्वापत्तेः ॥ ५७ ॥

एतेन यदि लिङ्गानपेक्षत्वं साक्षादर्थः सोऽपि निरस्तः। अथोच्यते यत्र व्याप्तत्व-पक्षधर्म्मत्वप्रमितेर्व्यतिरेकः प्रतिपादनीयान्तरानपेक्षतया तत्प्रमापकस्य लिङ्गस्योपन्या-सव्यतिरेकेण शक्योद्भावनः, तदसिद्धमिति। नैतदप्युपपन्नम्। अतिव्यापकत्वात्। तथा

खण्डन—"शक्योपन्यास" शब्द का क्या अर्थ है। जिसके स्वरूप का निर्देश शक्य हो—यह अर्थ है अथवा जिसका प्रमापण शक्य हो यह अर्थ है। प्रथमपक्ष में अनैकान्तिक आदि में भी व्याप्तिव्यतिरेक की प्रतिज्ञा (उपन्यास) शक्य है। अतः अव्याप्ति तदवस्थ ही है। द्वितीय पक्ष में साक्षात् शब्द का प्रत्यक्ष से ऐसा अर्थ करें तो व्याप्तिपक्षधर्मताविरह में प्रत्यक्ष से प्रमापणीयत्व [प्रत्यक्ष के अभाव को प्रत्यक्ष जो मानते हैं उनके मत में] विरुद्धादि में अतिव्याप्ति हो जायगी और प्रत्यक्ष के अभाव को प्रत्यक्ष जो नहीं मानते हैं, उनके मत में सर्वत्र असम्भव हो जायगा ॥५६॥

समर्थन—जहां व्याप्ति तथा पक्षधर्मता का अभाव प्रत्यक्षज्ञान का विषय हो वह असिद्ध है।

खण्डन—यह भी युक्त नहीं है, कारण कि प्रमितिघटित उक्त लक्षण वाक्य का यह अर्थ नहीं है। मान भी लें कि उक्त वाक्य का यह भी अर्थ है तो यदि उभयविरह का उद्भावन मिलित असिद्ध है तो जहां केवल व्याप्ति के विरह का उद्भावन है, वहां अव्याप्ति हो जायगी और यदि एक २ के अभाव का उद्भावन सिद्ध है तो यदि व्याप्तिविरह का उद्भावन असिद्ध है तो पक्षधर्मताविरहोद्भावनस्थल (आश्रयासिद्ध) में और यदि पक्षधर्मता के व्यतिरेक का उद्भावन असिद्ध कहें तो व्याप्यत्वासिद्ध में अव्याप्ति हो जायगी।

किञ्च जहां अतीन्द्रिय पक्षादि विरह है, वहां पक्षधर्मता का व्यतिरेक प्रत्यक्षप्रमा का विषय नहीं है, अतः अव्याप्ति हो जायगी ॥ ५७ ॥

समर्थन—साक्षात् शब्द का लिङ्गानपेक्षत्व अर्थ है अर्थात् जहां व्याप्ति पक्षधर्मता का विरह लिङ्ग की अनपेक्षा से प्रमाविषय हो वह असिद्ध है।

खण्डन—यह कथन भी युक्त नहीं है, कारण कि अतीन्द्रियपक्षस्थल में आश्रया-सिद्धि का अवगम लिंग से ही होता है, अतः अतीन्द्रिय आश्रयासिद्धि में अव्याप्ति हो जायगी।

समर्थन—जहां व्याप्ति अथवा पक्षधर्मता या तत्प्रमिति के व्यतिरेक का कथन [अन्य प्रतिपाद्य की अनपेक्षा से प्रमितिजनकहेतु के उपन्यास के बिना ही] हो सके

हि–विरुद्धादौ शक्यते तावद्विपक्षव्यावृत्तिदण्डभूततर्काभावात् सोपाधिताऽवगन्तुम् । यदाह "यत्रानुकूलस्तर्को नास्ति सोऽप्रयोजक" इति । तस्मात्तेषामप्येवं लक्षणयोगित्वादसिद्धत्वप्रसङ्गः । नच तादृशतर्काविषयत्वमपि प्रतिपादनीयान्तरानपेक्षव्याप्तिपक्षधर्म्मताप्रमितिविरहप्रमापकलिङ्गभूतमेवेति वाच्यम् । तथा सति विरुद्धत्वादिवत्तस्य हेत्वाभासान्तरत्वप्रसङ्गात् ॥ ५८ ॥

अथोच्यते, तथोपन्यस्यमानं तदसिद्धम्भवतु-साध्यविपरीतव्याप्तित्वादिना तु दूष्यमाणं विरुद्धाद्येव तत्, उपन्यासप्रकारभेदाच्च भेदव्यवस्था हेत्वाभासानाम् । नह्यत्र गोत्वाश्वत्वादिवदत्यन्तासङ्कर इष्यते । किं नाम ? प्रमाणप्रमेयभाववत् प्रकारासङ्करमात्रमिति । तदप्ययुक्ताभिधानम् । वक्तव्यं हि केन प्रकारेणासिद्धत्वम्भवति, न तावदुक्तलक्षणेन, तथाशक्योद्भावनत्वस्य विरुद्धोचितप्रकारेणोपन्यस्यमानस्य सम्भवात् । सर्वथा

यह असिद्ध है। इस लक्षण में विरुद्ध में लिङ्ग का उपन्यास होने से अतिव्याप्ति नहीं है और अतीन्द्रियपक्षस्थल में लिङ्ग का उपन्यास तो है, परन्तु लिङ्ग में व्याप्ति-प्रतिपादन की अपेक्षा है, अतः अव्याप्ति नहीं है।

खण्डन—यह भी युक्त नहीं है, कारण कि शब्दोनित्यः कृतकत्वात्, शब्दोऽनित्यः प्रमेयत्वात् इत्यादि विरुद्ध अनैकान्तिक स्थल में विपक्षबाधक तर्काभाव से भी व्याप्ति के व्यतिरेक का अवगम होता है। यह बात उदयनाचार्य जी ने भी कही है कि जहाँ अनुकूल तर्क न हो वह हेतु प्रयोजक (व्याप्तिरहित) है, तस्मात् विरुद्धादि में उक्त लक्षण के योग होने से अतिव्याप्ति हो जायगी।

समर्थन—विपक्ष-बाधक तर्क का अभाव भी प्रतिपादनीयान्तर की अनपेक्षा से लिङ्गरूप से ही विरुद्धादि में व्याप्तिविरह का अनुमापक है, अतः अतिव्याप्ति नहीं है।

खण्डन—ऐसा मानने पर विरुद्धादि के तुल्य विपक्षबाधक तर्काभाव भी हेत्वाभास हो जायगा ॥५८॥

समर्थन—कृतकत्व आदिहेतु में जिस समय विपक्षबाधक तर्क के अभाव से व्याप्यभाव का अवगम होता है, उस काल में वह असिद्ध है और जब साध्याभाव व्याप्तत्वादिरूप हेतु से व्याप्यभाव का अवगम होता है, तब वह विरुद्धादि हैं। उपन्यास के प्रकार के भेद-से ही हेत्वाभासों में भेद है। गोत्व अश्वत्व के तुल्य भेद नहीं है, किन्तु प्रमाण प्रमेय के तुल्य भेद हैं अर्थात् जैसे एक ही वस्तु चक्षुरादिप्रमिति के करण होने से प्रमाण और प्रमिति के विषय होने से प्रमेय है। ऐसे ही प्रकार का असङ्करमात्र है।

खण्डन—यह कथन भी अयुक्त है, कारण कि प्रकार के असङ्कर होने पर भी यह अवश्य कहना होगा कि किस प्रकार से असिद्धत्व है। उक्त लक्षणरूप प्रकार से असिद्धत्व नहीं कह सकते हैं, कारण कि व्याप्तिपक्षधर्मताप्रमिति के अभाव का शक्योद्भावनत्वरूप उक्त प्रकार—विरुद्ध के उचित प्रकार (लक्षण) से कथित कृतकत्वादि में भी—विद्यमान है, अर्थात् यदि असिद्ध का उक्त लक्षण करें तो विरुद्धस्थल में असिद्धरूप हेत्वाभास से ही अनुमिति के प्रतिबन्ध होने से विरुद्ध की हेत्वाभास में गणना व्यर्थ हो जायगी।

समर्थन—जहाँ साध्य के अभाव से व्याप्तत्वरूप विरुद्धत्व का उद्भावन न हो और व्याप्तिपक्षधर्मताप्रमिति के व्यतिरेक शक्योद्भावनत्व का उद्भावन हो वह असिद्ध है।

निष्प्रकारकस्यासिद्धधर्म्मिणस्तदुद्भावनाशक्यत्वात्। नच तथाशक्योद्भावनत्वमप्युद्भाव्यते, असिद्धेः, येन प्रकारभेदव्यवस्थितिरनेन भवेत्। नच शक्योद्भावनपदस्थाने उद्भाव्यमानत्वमिति कृते निस्तारः, सोपाधित्वाद्युद्भावने प्रमित्यभावोद्भावनं व्यर्थत्वान्न क्रियत इति तदव्यापकत्वं प्रसज्येतेति प्रागेवोक्तत्वादिति ॥ ५९ ॥

एतेनासिद्धः साध्यसम इति प्रत्युक्तम्। यथाकथञ्चित्साध्यसाम्यस्य सर्वसाधारणत्वात्। साम्यविशेषस्य चोक्तप्रकारपर्य्यवसानव्यतिरेकेणान्यस्यासम्भवात्, लक्षणान्तरेषु चोक्तदूषणप्रकारा यथासम्भवमिह योजनीया इत्यलंविस्तरेणेति ॥ ६० ॥

अपिचासिद्धलक्षणविशेषेषु प्रमाणव्यवच्छेदकव्यतिरिक्तेन यद्व्यवच्छेद्यं तत् किं केनचिद्विरुद्धं केनचिदन्यदिति चेत्। विरुद्धमेव किमुच्यते। तथा हि–साध्यविपरीतव्याप्तो विरुद्ध इत्याहुः। तत्र, साध्यव्यतिरेकेण हि व्याप्तिः कात्स्न्र्येन वा अनौपा-

---

खण्डन—ऐसा कोई स्थल नहीं है जहां विरुद्धादि प्रकार न हों, केवल असिद्ध प्रकार ही हो। किञ्च स्वार्थानुमिति में असिद्धस्थल में भी शक्योद्भावनत्व का उद्भावन नहीं होता है, फिर उक्तस्थल में उक्त प्रकार से भी व्यवस्था कैसे होगी।

समर्थन—शक्योद्भावन पद के स्थान में उद्भावनमात्र दें अर्थात् व्याप्तिपक्षधर्म्मताप्रमिति के व्यतिरेक का जहां उद्भावन हो वह असिद्ध है। विरुद्धादि में यद्यपि उक्त व्यतिरेक है, तथापि उद्भावन नहीं होता है, अतः अतिव्याप्ति नहीं होगी।

खण्डन—व्याप्यत्वासिद्ध स्थल में केवल व्याप्ति के व्यतिरेक का ही उद्भावन होता है। प्रयोजन न होने से व्याप्तिप्रमिति के व्यतिरेक का उद्भावन नहीं होता है, अतः अव्याप्ति हो जायगी इत्यादि पीछे कह आये हैं ॥५९॥

समर्थन—साध्य से सम असिद्ध है।

खण्डन—यदि अस्तित्व ज्ञेयत्व आदि धर्म से साम्य की विवक्षा करें तो विरुद्धादि हेतु भी उक्त प्रकार से साध्यसम होने से असिद्ध हो जायगें और यदि साम्यविशेष की विवक्षा करें अर्थात् जैसे साध्य साध्य से व्याप्तत्वरूप से प्रमित नहीं है, एक होने से तथा साध्य, पक्षधर्मता से प्रमित नहीं है, संदिग्ध होने से एवं व्याप्तिपक्षधर्मता से जो प्रमित न हो वह साध्यसम है—ऐसी विवक्षा करें तो उक्त प्रकार में ही पर्यवसान होगा और उन प्रकारों का खण्डन कर चुके हैं। अन्य असिद्धि के लक्षणों में भी उक्त दूषणों का अथवा उक्त दूषणों से सदृश अन्य दूषणों की यथासंभव योजना करना चाहिये, ग्रन्थ का विस्तार व्यर्थ है ॥ ६० ॥

इति असिद्धलक्षणखण्डन

अथविरुद्धलक्षणखण्डनानुवाद।

किञ्च व्याप्तिपक्षधर्म्मतात्प्रमिति के व्यतिरेक का कथन जहां लिङ्ग के उपन्यास के विना हो सके वह असिद्ध है इस लक्षण में प्रमित्यन्त प्रमाण के व्यवच्छेद का अर्थ है—लिङ्ग के उपन्यास के विना इस विशेषण का तथा शक्योपन्यास इस विशेषण का व्यवच्छेद्य क्या है। यदि कहें कि किसीका व्यवच्छेद्य विरुद्ध है और किसीका स्वार्थानुमितिस्थलीय

धिको वा स्वाभाविको वा सम्बन्ध इत्याद्युक्तिभिः सविशेषेण सहभाव एव निरुच्यते। तथा सति च साध्यव्यतिरेकेण सामानाधिकरण्यमेव विशेषणविशेषयुक्तं विरुद्धत्वमित्युक्तं स्यात्। यदा चैवं तदा साध्यव्यतिरेकसामानाधिकरण्यमेव हेतोरगमकत्वे समर्थमिति तन्मात्रमुद्भाव्यं वृथा विशेषणप्रक्षेपः। तथा चानैकान्तिक एवायं स्यात्॥ ६१॥

ननु साध्यव्यतिरेकसम्बन्धो यद्यपि विरुद्धानैकान्तिकयोर्द्वयोरप्यस्ति तथापि वस्तुगत्या स्वाभाविकोऽसौ विरुद्ध एवेत्येतावन्मात्रविशेषविवक्षया विरुद्धस्यानैकान्तिकाद्भेदोपन्यासः। मैवम्। दत्तोत्तरत्वात्। वस्तुगत्या सन्नप्ययं विशेषो नोद्भावनार्ह इत्युपेक्षणीय इत्युक्तम्। तथा हि नेदमस्य साधकमेतत्साध्यं प्रति विरुद्धत्वादित्यभिधीयमाने विरुद्धशब्दार्थनिरुक्तौ विशेषणाधिक्यस्योक्तन्यायेन दुष्परिहरत्वात्। अत एवानैकान्तिके सन्देहेन प्रत्यवस्थानं विरुद्धे तु व्यतिरेकनिश्चयेनेति विशेषादनयोर्भेदेनोपन्यास इत्यप्यनवकाशम्, अनुमितिहेतुव्यतिरेको हि हेतुदोषोऽनुमितिहेतुश्चैको व्याप्तिस्ततस्तदभावस्य दोषत्वात्तावन्मात्रं ज्ञाप्यं तच्चहेतुविपक्षसम्बन्धोद्भावनमात्रादेव गम्यते, तस्मा-

---

असिद्ध का संग्रह फल है तो विरुद्ध हो क्या वस्तु है, अर्थात् लक्षण न होने से अनिर्वचनीय है, अतः व्यवच्छेद्य के न होने से विशेषण व्यर्थ है।

समर्थन—साध्य के अभाव से व्याप्त हेतु विरुद्ध है। यहां साध्याभाव के साथ व्याप्ति विशेषण से युक्त सहभाव ही है, क्योंकि सार्वत्रिक वा अनौपाधिक अथवा स्वाभाविक सम्बन्ध ही व्याप्ति है। ऐसा होने पर साध्याभाव के साथ विशेषण (सार्वत्रिकत्व) से युक्त सामानाधिकरण्य ही विरुद्ध हुआ।

खण्डन—यदि ऐसा है तो साध्याभाव के साथ सामानाधिकरण्य ही हेतु के व्याप्तिशून्यत्व में समर्थ प्रयोजक है, अतः तन्मात्र ही लक्षण कहना चाहिये, विशेषण का प्रक्षेप व्यर्थ है और यदि विशेषण न दें तो विरुद्ध भी अनैकान्तिक ही हो जायगा॥ ६१॥

समर्थन—यद्यपि साध्याभाव के साथ सम्बन्ध विरुद्ध अनैकान्तिक दोनों में है, तथापि स्वाभाविक संबन्ध विरुद्ध में ही है। केवल इसीसे विरुद्ध से अनैकान्तिक का भेद है।

खण्डन—वस्तुतः सार्वत्रिकत्व के निवेश से कृतभेद हैं, परन्तु यह भेद कथन के योग्य नहीं है यह उत्तर दे चुके हैं। देखिये—"यह हेतु साध्य का साधक नहीं है, साध्य के विरुद्ध होने से" यह कहने पर विरुद्ध शब्दार्थ की निरुक्ति में उक्त रीति से विशेषण का आधिक्य दुःपरिहर है।

समर्थन—अनैकान्तिकस्थल में हेतु में साध्याभाव की व्याप्ति का सन्देहमात्र रहता है और विरुद्धस्थल में हेतु में साध्याभाव के साथ व्याप्ति का निश्चय रहता है—यह दोनों में परस्पर भेद है।

खण्डन—यह भी युक्त नहीं है, कारण कि अनुमिति हेतु का अभाव हेतु का दोष है और अनुमिति का हेतु एक व्याप्ति है और दूसरा पक्षधर्मता है, इससे उन दोनों के अभाव ही को दोष होने से तन्मात्र ही ज्ञाप्य है और उसका अवगम हेतु के—विपक्ष में—संबन्ध मात्र से ही होता है, तस्मात् अनुमिति का हेतु जो व्याप्ति उसकी प्रमिति के अभाव के बोधन के अर्थ पूर्वोक्त सन्देह अथवा निश्चय का उद्भावन भी करें तो उक्त संदेह वा निश्चय ही कैसे

दनुमितिहेतुव्याप्तिप्रमितिव्यतिरेकबोधनाय संशये व्यतिरेकनिश्चये चोद्भाव्यमानेऽपि कुतस्तावेवेत्यत्र विपक्षसम्बन्धमात्रनियततत्सम्बन्धावश्योपन्यास्याविति तत्सम्बन्धमात्रमेवास्तु, व्याप्तेस्तत्प्रमितेश्च व्यतिरेकस्य लिङ्गत्वादुद्भाव्यं कृतमितराभ्यामिति ॥६२॥

लकारभेदप्रयोगे तैस्तैर्लकारैः कालविषयविशेषप्रतिपादनवद्विभक्तिभिर्लिङ्गसङ्ख्याज्ञापनवत् पर्वतोऽग्निमानित्यादौ धर्म्यादिप्रतिपादनवच्च नेदं घटते तत्र तेपामतात्पर्य्यविषयाणामपि प्रदप्रयोगे विशिष्टबोधने वा अन्यथासिद्धानां यथा बोधनं तथा यद्यत्रापि व्याप्तेरतात्पर्य्यविपयत्वं तदनैकान्तिकसाधारण्यादेव, अन्यथोक्तदोपापरिहारादेवेति ॥६३॥

अनैकान्तिकत्वश्चानुद्भावयता अनधिगच्छता वा विरुद्धमशक्योद्भावनमशक्याधिगमश्चेति तदुपजीवित्वान्न पृथक् दूपणं विशेष्यप्रतिपादनं विशेष्यावगमश्च विना विशिष्टप्रतिपादनस्य विशिष्टावगमस्य चाशक्यत्वात्। एवमन्यत्रापि विशेषणस्याप्रयोजकता विशेष्यस्य सामर्थ्ये स्वयमूहनीया। तद्यथा-इदमसाधकं साधारणानैकान्तिकत्वादित्यत्र साधारणेति विशेषणे सपक्षविपक्षगतत्वादित्यत्र सपक्षगतत्वेऽप्युद्भाव्यमाने एवमसाधारणेऽपीनि इदमसाधकं जातित्वादिति जातित्वविवेचने स्वव्याघातकमुत्तरं

हुआ इस जिज्ञासा में विपक्षसम्बन्धमात्र तथा नियतविपक्षसम्बन्ध अवश्य वक्तव्य है, अतः व्याप्ति वा तत्प्रमिति के अभाव का कारण होने से विपक्ष में सम्बन्ध का ही कथन करना चाहिये, सन्देह वा निश्चय का उपन्यास व्यर्थ है ॥ ६२ ॥

"शब्दो नित्योऽस्ति" इस प्रतिज्ञावाक्य में कालसामान्य की विवक्षा होने से वर्तमान के प्रतिपादन के तुल्य तथा "वासः परिधेहि" यहां कर्ममात्र की विवक्षा होने से लिङ्ग संख्या के बोधन के तुल्य "पर्वतो वन्हिमान्" यहां विशिष्ट के बोध में तात्पर्य होने से धर्म्यादि के बोध के तुल्य यहां सम्भव नहीं है, कारण कि उक्त स्थलों में तात्पर्य का विषय न होने से पदप्रयोग में वा विशिष्ट के बोध में अन्यथासिद्ध (तात्पर्य का अविपय) काल विशेपादि का जैसे बोध होता है, वैसे यदि विरुद्धस्थल में व्याप्ति के बोध को तात्पर्य का विषय न मानें, तो लक्षण अनैकान्तिक साधारण हो जायगा और यदि व्याप्तिबोध को तात्पर्य का विषय मानें तो लक्षण में उक्त प्रकार से व्याप्ति का निवेश व्यर्थ हो जायगा ॥६३॥

किञ्च अनैकान्तिक के अज्ञान तथा अनुद्भावन के काल में विरुद्ध का ज्ञान तथा उद्भावन अशक्य है? कारण कि साध्याभाव के साथ सम्बन्धरूप विशेष्य के ज्ञान और प्रतिपादन के विना सार्वत्रिक सम्बन्धरूप विशिष्ट का अवगम और प्रतिपादन अशक्य है, अतः विशेष्य ज्ञान उपजीव्य है।

इसी प्रकार से विशेष्य के सामर्थ्य होनेपर विशेषण का वैयर्थ्य अन्यत्र भी जानना चाहिये। देखिए—"इदं साधारणं, साधारणानैकान्तिकत्वात्" यहां साधारण यह विशेषण तथा "इदमसाधकं सपक्षविपक्षगतत्वात्" यहां सपक्ष यह विशेषण व्यर्थ है। इसी प्रकार शब्दो नित्यः शब्दत्वात् इस असाधारणस्थल में-शब्दत्वम् असाधकम् असाधारणानैकान्तिकत्वात्-यहां असाधारण विशेषण तथा-शब्दत्वम् असाधकं सपक्षविपक्षव्यावृत्तत्वात् यहां विपक्षविशेषण व्यर्थ जानना चाहिये।

जातिरिति स्वव्याघातकत्वस्यैव सर्व्वमसत् ज्ञेयत्वादित्याद्यजातिजातिसाधारणस्य दूषणासमर्थत्वेनोत्तरत्वाभिधान इति ॥६४॥

किञ्च साध्यविपरीतेति साध्याभावेत्यर्थे, यदा अभावात्मैव साध्यः क्वचिद्भवति तत्र तद्विपरीतस्य भावत्वात्तदव्यापकत्वं लक्षणस्य। नच विपरीतशब्दस्य विरोधिमात्रार्थत्वे भावाभावोभयव्याप्तिरिति वाच्यम्। सहानवस्थानं हि भावाभावयोर्विरोधोऽभ्युपेयते, अनवस्थानञ्च संसर्गनिषेधः स च भावाभावयोरन्योन्यानवस्थानमेव परस्परप्रतिषेधरूपत्वात्तयोः, तथा च सति भावाभावयोः स्वरूपस्यानुपसङ्ग्रहे प्रत्येकमव्याप्तिर्मिलितस्यासम्भव एवेति। वक्ष्यामश्च भावाभावयोर्विरोधनिरुक्तिनिराकरणमुपरिष्टादिति ॥६५॥

किञ्च व्याप्तिपदेन लक्षणप्रविष्टेन किं व्यवच्छेद्यम्। अनैकान्तिकमिति चेत्, किं तदनैकान्तिकम्। तथा हि—अनैकान्तिकः सव्यभिचार इत्यलक्षणम्। सव्यभिचा-

---

"इदमसाधकम् जातित्वात्" यहां स्वव्याघातक उत्तर जाति है ऐसा जाति शब्दार्थ के विचारने पर स्वव्याघातकत्व ही "सर्वम् असत् ज्ञेयत्वात्" इस अजातिस्थल के तुल्य दूषण में समर्थ है, अतः "उत्तर" इस विशेष्य अंश का अभिधान व्यर्थ है ॥६४॥

किञ्च लक्षण में साध्यविपरीत शब्द का यदि साध्याभाव अर्थ करें तो जहां अभावही साध्य है, वहां साध्यविपरीत भाव है अभाव नहीं, अतः वहां लक्षण की अव्याप्ति हो जायगी।

समर्थन—लक्षणघटक विपरीत शब्द का विरोध अर्थ है, अतः अव्याप्ति नहीं।

खण्डन—सह अनवस्थान ही भाव अभाव का विरोध है और अनवस्थान संसर्ग का निषेध है और वह भाव अभाव के अन्योऽन्य के अनवस्थानरूप है-कारण कि भाव का प्रतिषेधरूप अभाव है और अभाव का प्रतिषेधरूप भाव है।

ऐसा होने से विरोध शब्द से दोनों के स्वरूप का संग्रह नहीं होगा, अतः लक्षण में अभाव के उपादान होने पर जहां अभावरूप साध्य विपरीत है, वहां अव्याप्ति हो जायगी। लक्षण में भाव अभाव दोनों का विपरीतशब्द से ग्रहण करें तो सर्वत्र असम्भव हो जायगा और भाव तथा अभाव के विरोध की निरुक्ति का खण्डन भी आगे कहेंगे ॥६५॥

इति विरुद्धलक्षणखण्डन

अथ सव्यभिचारखण्डनानुवाद

किञ्च विरुद्ध के लक्षण में प्रविष्ट व्याप्ति का व्यवच्छेद्य क्या है। यदि अनैकान्तिक को कहें तो अनैकान्तिक क्या वस्तु है अर्थात् लक्षण न होने से अनिर्वचनीय हैं, अतः व्यावर्त्य न होने से लक्षण में व्याप्ति का निवेश व्यर्थ है।

निर्वचन—सव्यभिचार अनैकान्तिक है।

खण्डन—यह लक्षण युक्त नहीं है, कारण कि यदि सव्यभिचार विपक्षवृत्तित्व है तो "शब्दोऽनित्यः कार्यत्वात्" इस विरुद्ध में अतिव्याप्ति तथा "शब्दोऽनित्यः आकाशविशेष-

रत्वं हि यदि विपक्षवर्जिता तदानीं विरुद्धेऽपि प्रसङ्गः असाधारणानैकान्तिकाव्याप्तिश्च । अथ सपक्षविपक्षगताभावता तदा साधारणोदाहरणाव्यापकत्वम् ॥६६॥

अथोच्यते सव्यभिचारत्वं सपक्षविपक्षसाधारणता अभिप्रेता सा चान्वयेन साधारणस्यव्यतिरेकेणासाधारणस्यानैकान्तिकस्य सङ्ग्राहिका, सपक्षविपक्षसाधारणतामात्रं त्वन्वयेन व्यतिरेकेण वेति विशेषणवत्तया न विवक्षिता, अतः साधारणासाधारणानैकान्तिकयोरुभयोरपि सङ्ग्रहः । विवादाध्यासितं क्षणिकं सत्त्वादित्यादेरनुपसंहार्य्यस्यापि सपक्षविपक्षशून्यत्वादेव सपक्षविपक्षगतत्वाभावेन साम्यमिति । विचार्य्यमेतद्व्याख्यानं परमस्तु तावदापाततः, तथापि व्यतिरेकेण सपक्षविपक्षसाधारणतायाः सपक्षाव्यापके सद्धेतौ धूमविशेषादौ गतत्वेनातिव्यापकत्वात् । यदि त्वस्य दोषस्य परिहारार्थं सर्वविपक्षसपक्षसाधारणमनैकान्तिकमिति ब्रूषे । तदा व्यतिरेकमात्रेण सर्वसपक्षविपक्षापक्षसाधारणता धूमानुमानादिगामिनी न भवतु नाम । अन्वयेन तु सर्व्वसपक्षविपक्षसाधारणता विपक्षसपक्षैकदेशगामिनं साधारणानैकान्तिकं शब्दो न नित्यः प्रत्यक्षग्राह्यत्वादित्यादिकं न सङ्गृह्णातीत्यव्याप्तिरित्येकं सन्धित्सतोऽपरं प्रच्यवते॥६७॥

गुणत्वात्" इस असाधारण में अव्याप्ति हो जायगी और यदि सपक्षविपक्ष में जिसका अभाव हो वह सव्यभिचार है तो "शब्दोऽनित्यः प्रमेयत्वात्" इस साधारण में अनैकान्तिक में अव्याप्ति हो जायगी ॥६६॥

समर्थन—सपक्ष विपक्ष में साधारणता सव्यभिचारत्व है, वह अन्वय से साधारण का और व्यतिरेक से असाधारण का संग्राहक है, यदि केवल अन्वय से सपक्ष विपक्ष में साधरणता कहें, तो असाधारण में और यदि केवल व्यतिरेक से कहें तो साधारण में और यदि अन्वयव्यतिरेक दोनों से सपक्षविपक्ष साधारणता कहें तो दोनों में अव्याप्ति हो जायगी, अतः विशेष की विवक्षा नहीं है, किन्तु जहां अन्वय से समन्वय की सम्भावना हो वहाँ अन्वय से और जहाँ व्यतिरेक से लक्षण के समन्वय की सम्भावना हो वहाँ व्यतिरेक से सपक्ष विपक्ष साधारणता का ग्रहण करना चाहिये।

विवाद का विषय—सब वस्तु क्षणिक है, ज्ञेय होने से इस अनुपसंहारी का भी—सपक्ष विपक्ष न होने से ही व्यतिरेक से सपक्ष विपक्ष साधारणता होने से—संग्रह है ।

खण्डन—यह व्याख्यान विचारणीय है, परन्तु आपात से है, देखिये—व्यतिरेक से सपक्षविपक्षसाधारणता सपक्ष (तप्तअयोगोलक) में अवृत्तिसद्धेतु धूम में भी है, अतः सद्धेतु में अतिव्याप्ति हो जायगी। यदि इस दोष के वारण के अर्थ सब सपक्ष विपक्ष साधारणता को अनैकान्तिकत्व कहें तो यद्यपि व्यतिरेक से सब सपक्षविपक्ष साधारणता धूमरूप सद्धेतु में नहीं है, अतः वहाँ अतिव्याप्ति नहीं होगी, तथापि अन्वय से सब सपक्षविपक्षसाधारणता विपक्ष (आत्मा) सपक्ष (घटादि) एक देश में स्थित "शब्दोऽनित्यः प्रत्यक्षग्राह्यत्वात्" इस साधारण अनैकान्तिक में—अव्याप्ति हो जायगी, कारण कि सब सपक्ष में गुरुत्व गुण भी है और सब विपक्ष मध्य में आकाश भी है, उनमें अन्वय से प्रत्यक्षत्व नहीं है, इस प्रकार आप एक दोष के समाधान की इच्छा करते हैं, अन्य दोष होता है ॥६७॥

अपि चान्वयव्यतिरेकाभ्यां सर्वसपक्षविपक्षगतत्वाद्धूमानुमानादौ स एव प्रसङ्गः, विशेषरूपेण तयोरविवक्षितत्वात् ।

किञ्च सर्व्वसपक्षविपक्षसाधारणमनैकान्तिकमिति वाक्ये यदि सर्वेति विपक्षस्यापि विशेषणं तदा विपक्षैकदेशवृत्तेः सपक्षव्यापिनः साधारणानैकान्तिकस्य त्रसरेणुः कार्य्यावयवको महत्त्वात् घटवदित्यादेरव्यापकं लक्षणमिदम् । अथ सर्व्वेति न विपक्षस्य विशेषणं तदा व्यतिरेकमादाय विपक्षसर्व्वसपक्षसाधाणमनैकान्तिकमिति एतद्विपक्षैकदेशमात्रवृत्तौ विरुद्धे क्षितिर्नित्या सावयवत्यादित्यादौ गतत्वादतिव्यापकमिति ॥६८॥

का चेयं वाचोयुक्तिः सपक्षविपक्षसाधारणमनैकान्तिकमित्युक्ते सर्वं सङ्गृह्यते अन्वयेन व्यतिरेकेण चेति कथमनुपसंहार्य्यस्यासत्सपक्षविपक्षस्य सपक्षे विपक्षे वा अन्वयेन व्यतिरेकेण वा साधारण्यं स्यात् तयोरेवाभावात् । यदि च सपक्षे च विपक्षे च साधारणत्वमुभयत्र स्वरूपानुगमो विवक्षितस्तदानीमसाधारणानैकान्तिकाव्याप्तिः । अथोभयस्मिंस्तस्मिन्नसत्त्वं तद्विवक्षितं तदा सर्वाव्याप्तिः, तदसत्त्वस्यातद्धर्म्मत्वात् । अथ तदुभयवर्त्त्यभावप्रतियोगित्वं तदुभयसम्बन्धस्य योऽभावस्तदाश्रयत्वं वाऽभिप्रेतं तदापि साधारणोदाहरणाव्याप्तिः ॥ ६९ ॥

किञ्च अन्वयव्यतिरेक से सब सपक्ष में और व्यतिरेक से सब विपक्ष में साधारण होने से धूमादि सद्धेतु में अतिव्याप्ति भी हो जायगी, कारण कि अन्वय से ही सपक्ष साधारण हो ऐसी—विशेष की विवक्षा है नहीं।

किञ्च सब सपक्ष विपक्ष साधारण अनैकान्तिक है इस वाक्य में-सब-यदि विपक्ष का भी विशेषण मानें तो परमाणुरूप में विपक्ष न रहने से विपक्ष का एकदेश दिग् आदि में वृत्ति तथा सब सपक्षवृत्ति "त्रसरेणुः कार्य्यावयवकः महत्त्वात् पटवत्" इस साधारण अनैकान्तिक में लक्षण की अव्याप्ति हो जायगी और यदि सब विपक्ष का विशेषण न दें तो विपक्ष तथा सब सपक्ष में साधारण अनैकान्तिक है ऐसा लक्षण हुआ, उसकी "क्षितिर्नित्या सावयवत्वात्" इस विरुद्ध में अतिव्याप्ति हो जायगी, कारण कि व्यतिरेक से बुद्ध्यादि विपक्ष और परमाणु आदि सब सपक्ष में सावयवत्व हेतु साधारण है ॥ ६८ ॥

किञ्च सपक्ष विपक्ष साधारणरूप अनैकान्तिक अन्वय व्यतिरेक से सब का संग्राहक है यह वचन की रचना कैसी असङ्गत है जिसका सपक्ष विपक्ष दोनों नहीं हैं।

उस अनुपसंहारी का सपक्ष विपक्ष में अन्वय या व्यतिरेक से साधारण्य कैसे होगा, यदि सत्व को सपक्ष विपक्ष में साधारण्य कहें तो असाधारण अनैकान्तिक का असंग्रह हो जायगा, कारण कि असाधारण हेतु का सत्व सपक्ष विपक्ष में नहीं होता है और यदि असत्व को सपक्ष विपक्ष में साधारण्य कहें तो असम्भव हो जायगा, कारण कि हेतुवृत्ति असत्व हेतु में नहीं रहता है, क्योंकि अंशतः आत्माश्रय हो जायगा। यदि सपक्ष विपक्ष में स्थित जो अभाव तत्प्रतियोगित्व अथवा सपक्ष विपक्ष सम्बन्ध का जो अभाव तदाश्रयत्व को साधारण्य कहें तो साधारण अनैकान्तिक में अव्याप्ति हो जायगी ॥ ६९ ॥

अथ मन्यसे-तदुभयसाधारण्यं नाम एकस्मिन् याद्रूप्यं हेतोः सत्त्वमसत्त्वं वा ताद्रूप्यमपरस्मिन्नपि यत्तदुच्यते, तथा सति नाव्यापकतादोष इति । मैवम् , मुख्यस्तावद्वचनार्थो नोपपद्यते हेतोरैकरूप्यस्य सपक्षविपक्षावाश्रय इति । किं नाम ऐकरूप्यवतो हेतोस्तावाश्रयाविति, स्यात्तदा चासाधारणाव्याप्तिः, तत्र सपक्षे विपक्षे च हेतोरसत्त्वेन तदाश्रयत्वासम्भवात् । तस्मात् सपक्षे विपक्षे च साधारणत्वं हेतोरनैकान्तिकत्वमित्यनुपपन्नमेव ॥ ७० ॥

असत्त्वपक्षे हेतोस्तदाश्रयकत्वानुपपत्त्या सपक्षे विपक्षे चेति सप्तमीनिर्देशस्यासङ्गतत्वात् । तदभावापेक्षया चाश्रयत्वस्योपपत्तौ हेतोस्तदाश्रयत्वे किमायातम् । आयातु वा किञ्चित्, तथापि साधारणोदाहरणेषु हेत्वभावापेक्षया सपक्षविपक्षयोर्नाश्रयता सप्तम्यर्थः; किन्तु हेत्वपेक्षयैवेति एकार्थापर्य्यवसायित्वे वाक्यस्य लक्षणाव्यापकतापत्तिरेव ॥ ७१ ॥

किञ्च सपक्षविपक्षसाधारणत्वं यदि सामान्यतो लक्षणं साधारणासाधारणानैकान्तिकभेदद्वयसङ्ग्रहार्थमुच्यते, तदा सपक्षविपक्षयोरन्यत्वादिभिर्हेतोः साधारण्यमस्त्यन्यत्रापीत्यतिव्याप्तिः । अथातिव्याप्तिपरिजिहीर्षयाऽन्वयव्यतिरेकाभ्यां सपक्षविपक्ष-

---

समर्थन—एक (सपक्ष वा विपक्ष) में हेतु का जो रूप (सत्व वा असत्व) हो उसी रूप का अन्य (विपक्ष वा सपक्ष) में होना ही सपक्षविपक्षसाधारण्य है, अतः अव्याप्ति दोष नहीं।

खण्डन—हेतु के ऐकरूप्य (सत्व वा असत्व) का सपक्ष विपक्ष आश्रय हैं इस मुख्य अर्थ का तो सम्भव नहीं है, कारण कि हेतु के सत्व का आश्रय हेतु ही है सपक्षादि नहीं है, किन्तु लक्षणा से ऐकरूप्य से युक्त हेतु के सपक्ष विपक्ष आश्रय हों इस अर्थ का सम्भव है और ऐसा अर्थ मानने पर असाधारण में अव्याप्ति हो जायगी, कारण कि वहां हेतु का सपक्ष विपक्ष में असत्व होने से आश्रयत्व नहीं है, तस्मात् हेतु का सपक्ष विपक्ष में साधारणत्व अनैकान्तिकत्व है यह अनुपपन्न ही है ॥७०॥

किञ्च असाधारण स्थल में हेतु का सत्व सपक्षादि में नहीं है, अतः हेतु की अपेक्षा से सपक्ष में विपक्ष में यह सप्तमी निर्देश अनुपपन्न है। यद्यपि हेत्वभाव की अपेक्षा से सप्तमी निर्देश उपपन्न है, परन्तु उससे हेतु में लक्षण का समन्वय कैसे होगा।

सपक्षविपक्षनिष्ठ अभाव के प्रतियोगित्व के हेतु में होने से समन्वय हो जायगा—यदि ऐसा कहें तो भी साधारण के उदाहरण में हेत्वभाव की अपेक्षा से आश्रयत्व सप्तम्यर्थ नहीं है, किन्तु हेतु की अपेक्षा से ही आश्रयत्व सप्तम्यर्थ है, अतः वाक्य के अनेकार्थक होने से लक्षण की अव्याप्ति हो जायगी ॥७१॥

किञ्च यदि साधारण असाधारण दोनों अनैकान्तिकों के संग्रहार्थ सामान्य से सपक्ष विपक्ष साधारण्यमात्र लक्षण करें तो अन्यत्र (विरुद्धादि) में भी हेतु का [अन्यत्व सत्व ज्ञेयत्व आदि से] सपक्षविपक्ष साधारण्य (सादृश्य) है, अतः उनमें अतिव्याप्ति हो जायगी। यदि अतिव्याप्ति के परिहार की इच्छा से अन्वयव्यतिरेक से सपक्षविपक्षसाधा-

साधारणमनैकान्तिकमित्युच्यते तदा अन्वयव्यतिरेकयोः प्रत्येकमिलितविकल्पानुपपत्त्या अव्यापकत्वापातः ॥७२॥

स्यादेतत्-स्वस्वाभावविरोधाश्रयाश्रितसपक्षविपक्षत्वं सपक्षविपक्षसाधारण्यं विवक्षितमेवं नाव्याप्त्यतिव्याप्ती इति। तदप्यसत्। तथाह्यस्तु तावत्सर्वपदविशेषणोपादानानुपादानपक्षोक्तदोषापातः, सर्वशब्दोपादाने धूमानुमानादौ प्रसङ्गश्च। स्वस्वाभावविरोधशब्दार्थस्याप्येकस्यानुगतस्यासम्भवेन लक्षणानुगमाभावो दोषः, तत्तदभावयोर्हि विरोधः सहानवस्थाम्, अनवस्थानञ्चावस्थानप्रतिषेधो, नच तद्भावस्याभावस्वरूपादन्यत्, नचाभावस्याप्यनवस्थानं भावस्वरूपादन्यत्, किन्तु तदेव भावस्य स्वरूपं तत्र स्वस्वाभावविरोधाश्रय इत्यस्य नार्थैक्यं किञ्चिन्मृग्यमाणमवाप्यते। स्वस्वाभावविरोधाश्रय इति वचनं विचारमर्हति। स्वस्वाभावयोर्विरोधविशेषणतया आधेयकोटिनिवेशात् विशेषणघटितमूर्तित्वाद्विशिष्टपदार्थस्य तदाधारत्वानुपपत्तेः। अतिव्यापकता च स्यात्। अन्वयमादाय सपक्षे, व्यतिरेकमादाय विपक्षे, वर्त्तमानस्याप्युक्तलक्ष-

---

रणय अनैकान्तिक है तो, यदि केवल अन्वय से साधारण्य की विवक्षा करें तो, असाधारण में और यदि केवल व्यतिरेक से साधारण्य की विवक्षा करें तो, साधारण में और यदि दोनों से साधारण्य की विवक्षा करें तो, उभयत्र अव्याप्ति हो जायगी ॥७२॥

ननु तथापि भावात्मके तस्मिन्नीश्वरे विधायकं किञ्चित्प्रमाणं वक्तव्यमिति चेत् । किं पुनर्भावत्वम् । विधित्वमिति चेन्न, पर्य्यायाप्रश्नात् । स्वरूपसत्त्वमिति चेत्, अभावस्यापि तथाभावात् । प्रतिस्वं व्यावृत्तत्वेनाननुगतत्वापत्तेश्च । अस्तीति-प्रतीतिविषयत्वमितिचेन्न, अभावो घटस्यास्तीतिप्रत्ययसम्भवेनाभावस्यापि तथात्वप्रसङ्गात् ।। नास्तीतिप्रतीतिविषयत्वेऽपि च घटादेर्भावत्वानिवृत्तेः ॥ ६५ ॥

अस्तीति चास्त्यर्थो वा शब्दो वा विवक्षितः । नाद्यः, तस्यानिरुक्तेः । सत्ता तदर्थ इति चेन्न, सामान्यादीनां तदभावादभावत्वापत्तेः । स्वरूपसत्त्वञ्च निरस्तम् । नापि द्वितीयः, अभावोऽस्तीतिप्रतीतेरुक्तत्वात् । वर्त्तत इत्याद्याकारेण च प्रतीयमानस्याभावत्वप्रसङ्गात् । सोऽप्यस्तिपर्य्याय इति चेन्न, उभयसाधारणैकार्थनिर्व्वचनमन्तरेण

अथ चतुर्थ परिच्छेद में भावत्व की निरुक्ति के खण्डन का भाषानुवाद ।

यद्यपि किम्शब्दार्थ के निर्वचन के न होने से ईश्वर के सद्भाव में प्रमाण का प्रश्न नहीं हो सकता है, तो भी भावरूप ईश्वर में विधायक कुछ प्रमाण अवश्य कहना चाहिये ।

प्रश्न— भाव क्या वस्तु है, अर्थात् भाव [निर्वचन न होने से] अनिर्वचनीय है उस में प्रमाण का प्रयोजन नहीं है ।

निर्वचन—विधि भाव है ।

खण्डन—पर्य्याय नहीं पूछते हैं, लक्षण पूछते हैं, अतः आप को लक्षण कहना चाहिये ।

समर्थन—स्वरूप से जो सत् हो, वह भाव है ।

खण्डन—अभाव भी स्वरूप से सत् है, अतः अभाव में अतिव्याप्ति हो जायगी । किञ्च स्वरूपसत्व प्रतिव्यक्ति पृथक् पृथक् होने से उसको लक्षण मानने में उक्त लक्षण से लक्ष्य का अनुगम नहीं होगा ।

समर्थन—"अस्ति" इस प्रतीति का विषय भाव है ।

खण्डन—"घटस्य अभावोस्ति" ऐसी प्रतीति होती है, अतः अस्ति इस प्रतीति के विषय होने से अभाव में लक्षण की अतिव्याप्ति हो जायगी । किञ्च यदि अस्ति प्रतीति के विषय को भाव कहें, तो "घटा भावो नास्ति" इस प्रतीति के विषय होने से घट में भावत्व की निवृत्ति होनी चाहिये ॥ ६५ ॥

किञ्च अस्तिसे अर्थ अभिप्रेत है, अथवा शब्द इनमें प्रथम पक्ष युक्त नहीं, है कारण कि, अब तक अस्ति के अर्थ की निरुक्ति हुई ही नहीं है । यदि सत्ता को अस्ति का अर्थ मानें, तो सामान्य आदि में सत्ता का अभाव होने से उनमें लक्षण की अव्याप्ति होजायगी । और यदि स्वरूप से स्वत्त्व को अस्ति का अर्थ मानें, तो उसके अभाव में होने से लक्षण की अतिव्याप्ति होगी । तथा द्वितीय पक्ष भी युक्त नहीं है, कारण कि द्वितीय पक्ष में अस्ति-शब्द से जिसका उल्लेख होता हो ऐसी प्रतीति का विषय भाव है, ऐसा लक्षण हुआ उसकी

पर्य्यायत्वस्य प्रतिपादयितुमशक्यत्वात्। यत्रैकस्यास्तिपदप्रयोगः तत्रैवापरस्य वर्त्ततइति प्रयोगात् सामान्येन तावत् पर्य्यायत्वं शक्याधिगममिति चेन्न। प्रमेयाभिधेयादिशब्दानां तथात्वेऽप्यपर्य्यायत्वात्। यत्रेत्यस्य प्रवृत्तिनिमित्तार्थत्वे च तन्निर्वचनप्रसङ्गस्तदवस्थः स एवार्थो भावत्वमुच्यतां किं शब्दोल्लेखगवेषणया ॥ ६६ ॥

अपरप्रतिषेधात्मकत्वं भावत्वमिति चेन्न। व्यवच्छेद्यासम्भवेन परपदवैर्य्यात्। भावाभावयोः परस्परप्रतिषेधात्मकतास्वीकाराच्च। तथापि भावो नास्तीत्यभावप्रतिपत्तिवदभावो नास्तीतिभावस्याप्रतीतिरिति चेन्न, तावतापि लक्षणानिरुक्तेः। अपरप्रतिषेधमुखेन प्रतीयमानत्वमेव भावत्वमिति चेन्न। चक्षुरादिभिर्भावत्वाग्रहणप्रसङ्गात्, नहि प्रतीयमानत्वं चक्षुरादिग्राह्यम्। अभावो नास्तीतिप्रतीतेर्निर्विषयत्वप्रसङ्गाच्च नहीयं भावविषया, भवत्पक्षे परप्रतिषेधमुखेन प्रतीयमानत्वात्। नाप्यभावविषयैव तन्निषे-

---

"अभावोऽस्ति" इस प्रतीति का विषय अभाव में अतिव्याप्ति हो जायगी। और यदि केवल अस्तिशब्द के उल्लेखवाली प्रतीति विषय को ही भाव मानें तो "घटोवर्तते" "घटो भवति" इत्यादि प्रतीति का विषय घट अभाव हो जायगा।

समर्थन—अस्तिपर्य्याय का उल्लेख करने वाली प्रतीति का विषय भाव है, और अस्ति का पर्य्याय 'भवति, 'वर्तते' भी हैं, अतः भवति वर्तते का उल्लेख करने वाली प्रतीति के विषय में अव्याप्ति नहीं।

खण्डन—एक अर्थ के वाचक को ही पर्य्याय कहते हैं। अतः यावत् भावरूप एक अर्थ का निर्वचन न हो, तावत् पर्य्यायघटित इस लक्षण का ज्ञान नहीं हो सकता है।

समर्थन—जिस अर्थ में एक पुरुष अस्ति का प्रयोग करता है। उसी अर्थ में अन्य पुरुष भवति वर्तते का प्रयोग करता है, इस से सामान्यरूप से भावत्व के निर्वचन के विना भी पर्य्यायत्व का ज्ञान हो सकता है।

खण्डन—एक अर्थ में प्रयोग होने पर भी प्रमेय और अभिधेय शब्द पर्य्याय नहीं है, अतः एक अर्थ में प्रयोग होने से पर्य्यायत्व का सामान्य से ज्ञान नहीं हो सकता।

समर्थन—जिन दो अर्थों का एक प्रवृत्तिनिमित्त हो, वे दोनों आपस में पर्य्याय हैं, और प्रमेय अभिधेय शब्द के प्रमाविषयत्व अभिधाविषयत्वरूप दो प्रवृत्तिनिमित्त हैं अतः पर्य्यायत्व नहीं हैं।

खण्डन—यावत् अस्ति शब्द के प्रवृत्तिनिमित्त का ज्ञान न हो, तावत् प्रवृत्तिनिमित्त घटित पर्य्यायत्व के अज्ञान से पर्य्यात्वघटित उक्त लक्षण का भी ज्ञान नहीं हो सकेगा। अतः उस अस्ति के प्रवृत्तिनिमित्त का ही निर्वचन करिये। अस्ति शब्द के उल्लेख का अन्वेषण व्यर्थ है ॥ ६६ ॥

समर्थन—परका प्रतिषेधरूप जो न हो वह भाव है

खण्डन—अप्रतिषेधरूप भाव है, इतना ही कहने में कोई दोष तो है नहीं, अतः व्यवच्छेद्य न होने से पर पद का निवेश व्यर्थ है। किञ्च भाव भी अभाव का प्रतिषेध रूप है अतः उक्त लक्षण का असम्भव हो जायगा।

थार्थत्वात्, नैवं प्रतीतिरेव स्यादिति चेन्न, शाब्द्याः प्रतीतेः सम्भवात्। आकाङ्क्षादिमद्भिः पदैः प्रतिस्वं संसर्गबोधनात्।

"अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि" ॥ ६७ ॥

प्रत्यक्षप्रतीतेस्तथा विवक्षितत्वादयमदोष इति चेन्न। सर्वस्य भावस्य प्रत्यक्षत्वानङ्गीकारात्। सेश्वरपक्षे सर्व्वं प्रत्यक्षमिति चेन्न, तेन तेषामपपरप्रतिषेधात्मतया ग्रहणे प्रमाणाभावात्। तेषां विधिरूपतया तथैव ग्रहणमिति चेन्न, विधिरूपत्वस्यानवधारणात्। यदपरप्रतिषेधात्मकतया शब्देनापि बोध्यते, तत्तावत् भावरूपमिति चेन्न, परपदवैयर्थ्यात्। तत्त्यागेऽप्यचाक्षुपादित्वापत्तेः। सुरभि चन्दनमित्यादाविवान्योपनी-

---

समर्थन—जैसे भावो नास्ति, ऐसी अभाव की प्रतिषेधरूप से प्रतीति होती है, वैसे ही "अभावो नास्ति" ऐसी भाव की प्रतिषेधरूप से प्रतीति नहीं होती है।

खण्डन—इस कथन से भी लक्षण की निरुक्ति तो नहीं हुई।

समर्थन—पर के प्रतिषेधरूप से जो अप्रतीयमान हो, वह भाव है।

खण्डन—प्रतीति घटित उक्त भावत्व का चक्षु से प्रत्यक्ष नहीं होगा, कारण कि प्रतीति का चाक्षुष प्रत्यक्ष नहीं होता है। किञ्च "अभावो नास्ति" 'यह प्रतीति' निर्विषयक हो जायगी। देखिये—यह प्रतीति भाव विषयक नहीं है, कारण कि आपके मत में पर के प्रतिषेधरूप से प्रतीयमान है, और अभाव विषयक भी नहीं है, कारण कि अभाव के प्रतिषेधरूप से प्रतीयमान है—ऐसी प्रतीति ही नहीं होती है—यह भी नहीं कह सकते, कारण कि आकाङ्क्षादि युक्त पदों से प्रतिपदार्थों के परस्पर संसर्ग बोध होने से शब्द से जन्य ऐसी प्रतीति हो सकती है जब "शशशृङ्गं नास्ति" इस शब्द प्रयोगस्थल में अत्यन्त असत् अर्थ का भी शब्द से बोध होता है तब प्रकृतस्थल में जहाँ सत् अर्थ है वहाँ शब्द से प्रतीति क्यों नहीं होगी ॥ ६७ ॥

समर्थन—अपर प्रतिषेधमुख से जायमान जो प्रत्यक्ष उसका विषय भाव है। और घटादि का प्रत्यक्ष प्रतिषेधरूप से नहीं होता है, अतः घटादि में अव्याप्ति नहीं है।

खण्डन—देश, काल, स्वरूप से विप्रकृष्टभाव के प्रत्यक्ष न होने से सब भाव का प्रत्यक्ष होता हो, इसमें कुछ प्रमाण नहीं है। यदि कहें कि ईश्वरऔर योगी को सब वस्तुओं का प्रत्यक्ष होता है तब भी उन्हें अपरप्रतिषेधरूप से ही प्रत्यक्ष होता हो इसमें कुछ प्रमाण नहीं है।

समर्थन—घटादि विधि अपरप्रतिषेधरूप हैं, अतः उसी रूप से ग्रहण होता है।

खण्डन—अद्यावधि घटादि के विधि (अपर प्रतिषेध) रूपत्व का अवधारण नहीं हुआ है।

समर्थन—जो अपरप्रतिषेधरूप से शब्द से भी बोधित हो, वह भाव है।

खण्डन—पूर्वोक्त रीतिसे अपर पद का वैयर्थ्य हो जायगा। यदि पर पद का लक्षण में निवेश न भी करें, तब भी बोध घटित होने से उक्तभावत्व का चाक्षुष प्रत्यक्ष नहीं होगा।

समर्थन—सुरभि चन्दनम्, यहाँ जैसे सौरभ का तथा "ज्ञातो घटः" यहाँ जैसे ज्ञान का ज्ञानलक्षणप्रत्यासत्ति से भान होता है, वैसेही उक्त लक्षणरूप भावत्व का भी प्रत्यक्षहोगा।

तभागवत् तत्र चाक्षुपत्वं भविष्यतीति चेन्न, तथाविधविषयेण विशिष्टाया बुद्धेर्विषय-विशेषणताग्रहे स्वाश्रयोऽप्यंशतः स्यात्। तेनोपलक्षितायास्तथात्वे चाभावविशिष्टभा-वग्रहार्थस्याभावस्य तथात्वापत्तेः॥ ६८॥

तेन यदेवंविधं तद्भावरूपमिति च ब्रुवतैवंविधस्वाद्भावत्त्वमन्यद्वाच्यमभेदे च यदेवंविधं तद्भावरूपमिति नियमानुपपत्तेः। अस्योपलक्षणत्वे चोपलक्ष्यस्यान्यस्य वाच्यत्त्वात्। अस्यैव भावार्थत्वे चाभावो नास्तीति कृत्वा प्रतीयमानस्य भावस्य भाव-त्वाभावप्रसङ्गात्। भिन्नश्च भावत्वं न सम्भवति, षट्पदार्थव्यतिरेकप्रसङ्गात्। यच्च कि-ञ्चिद्भावत्वं तत्स्वात्मन्यस्ति नो वा, अस्ति चेदात्मनि वृत्तिविरोधः, नास्ति चेत्स्वस्या-न्यप्रतिषेधमुखेन चाप्रतीयमानस्याभावत्वप्रसङ्ग इति। ६९॥

खण्डन—अपर प्रतिषेधरूप जो विषय उससे विशिष्ट बुद्धि को यदि लक्षण प्रविष्ट विषय का विशेषण मानें, तो विषयविशिष्टबुद्धि के विषय में वृत्ति होने से बुद्धि द्वारा विषय भी विषयवृत्ति हुआ, अतः आत्माश्रय हो जायगा। और यदि अपर प्रतिषेधरूप विषय को बुद्धि में और उससे उपलक्षित बुद्धि को विषय में उपलक्षण मानें, तो अपर भूतल पर विषय से उपलक्षित "घटाभाववद् भूतलम्" इत्याकारक बुद्धि से उपलक्षित जो घटा भावरूपविषयत्व वह घटाभाव में भी है, अतः लक्षण की घटाभाव में अतिव्याप्ति हो जायगी॥ ६८॥

किञ्च अपरप्रतिषेधरूप से प्रतीयमान भाव है ऐसा आप कहते हैं, तो लक्षण से अन्य भावत्वरूप लक्ष्यता के अवच्छेदक को भी कहना चाहिये, कारण कि लक्षण और लक्ष्यता-वच्छेदक को एक मानो, तो जो ऐसा हो वह भाव है—यह कथन नहीं बनेगा। यदि लक्षण को उपलक्षण भी मानें, तो भी उपलक्षण से अन्य उपलक्ष्यता के अवच्छेदक को कहना चाहिये, यदि किसी प्रकार से अपर प्रतिषेध मुख से प्रतीयमानत्वरूप लक्षण को ही लक्ष्य का अवच्छेदक मानो तो "अभावो नास्ति" इस प्रकार प्रतिषेधरूप से प्रतीयमान घटादिभाव लक्ष्य न कहावेगा। और उस लक्षण से अन्य भावत्व की सम्भावना है नहीं, कारण कि द्रव्यादि पदार्थों से अन्य पदार्थ को मानना पड़ेगा। किञ्च जो कुछ भी भावत्व हो वह भावत्व के लक्षण में रहता है, वा नहीं, यदि रहता है, तो स्व में स्व को वृत्तित्व हो जायगा। जो विरुद्ध है। और यदि नहीं रहता है, तो लक्षण में परप्रतिषेधरूप से अप्रतीयमान होने पर भी अभावत्व का प्रसङ्ग हो जायगा॥ ६९॥

॥ इति भावत्वनिर्वचनखण्डनानुवाद॥

अथ अभावत्वनिर्वचनखण्डनानुवाद।

इस प्रकार से प्रश्न में प्रश्न कर ईश्वर में प्रमाण को नहीं दिखा सके। अतः ईश्वर के अभाव का प्रसङ्ग हुआ।

प्रश्न—अभाव ही क्या वस्तु है। अर्थात् निर्वचन न होने से अनिर्वचनीय है अतः ईश्वर का अभाव नहीं होगा।

नन्वेवमीश्वरे प्रमाणानुपदर्शनात्तदभाव एवापद्यत इति चेत्, अभावत्वं किमभिधीयते। निषेधात्मकत्वमिति चेत् तद्यदि प्रतिक्षेपात्मकत्वं तदा भावेऽप्यस्ति, भावाभावयोर्द्वयोरपि परस्परप्रतिक्षेपात्मकत्वस्वीकारात्। अथाभावत्वमेव तदा न निवृत्तः पर्यनुयोगः। एतेन निषेधमुखेन प्रतीयमानत्वमिति निरस्तम्। ७० ॥

भावविरोधित्वमिति चेन्न, सर्व्वभावविरोधित्वं तद्विशेषविरोधित्वं वा। नाद्यः, असिद्धेः, नहि घटाभावो भूतलादि विरुणद्धि। नापि द्वितीयः, भावानामपि केषाञ्चित्तथाभावात्। अथ सहानवस्थानं विरोधो विवक्षितः, स भावानां नास्तीति चेन्न, गोत्वाश्वत्वादौ तस्यापि भावात्। एकविधावन्यनिषेधः स इति चेन्न, भेदे भावभेदयोरेव प्रसङ्गात्। एकविधिरेवापरनिषेधः स इति चेन्न, निषेधस्याभावार्थत्वे भावार्थत्वे

निर्वचन—जो निषेधरूप हो, वह अभाव है।

खण्डन—यदि निषेध प्रतिक्षेप है, तो भाव में लक्षण की अतिव्याप्ति हो जायगी, कारण कि भाव अभाव दोनों परस्पर प्रतिक्षेपरूप हैं, और यदि निषेध अभाव ही है, तो प्रश्न निवृत्त नहीं हुआ। अर्थात् प्रश्न का उत्तर नहीं हुआ।

समर्थन—निषेधमुख से प्रतीयमान अभाव है।

खण्डन—यह लक्षण भी युक्त नहीं है कारण कि यदि निषेध प्रतिक्षेपरूप मानें, तो भाव में अतिव्याप्ति हो जायगी। और यदि अभावरूप मानें, तो पक्ष निवृत्त नहीं हुआ।

समर्थन—भाव का विरोधी अभाव है।

खण्डन—सब भावों का विरोधित्व लक्षण है, अथवा यत् किञ्चित् भाव का। इनमें प्रथम पक्ष युक्त नहीं है, कारण कि घटाभाव का भूतल अविरोधी है। अतः सर्व भावों का किसी भी अभाव में विरोध न होने से असंभव हो जायगा। और द्वितीय पक्ष में यदि किञ्चिद्भाव (उत्तर संयोग) के साथ वध्यघातकभावरूप विरोध कर्म को भी है अतः उसमें अतिव्याप्ति हो जायगी।

समर्थन—सहानवस्थानरूप विरोध की विवक्षा है वह भावों में नहीं है।

खण्डन—गोत्व अश्वत्व में सहानवस्थानरूप विरोध है, अतः उनमें अतिव्याप्ति होने से यह भी युक्त नहीं है।

समर्थन—एक के विधि में अन्य का निषेध अभाव है।

खण्डन—यदि लक्षण घटक विधिनिषेध में भेद है, तो पीत की विधिमें नील के निषेध होने से नील में अव्याप्ति हो जायगी। और यदि एक की विधि हो अपर का निषेध हो इस प्रकार विधि निषेध का अभेद है, तो निषेध शब्द का यदि अभाव अर्थ करें, तो अद्य पर्य्यन्त अभाव की निरुक्ति न होने से और यदि निषेध शब्द का भाव अर्थ करें, तो निषेध शब्द के भावार्थत्व की अप्रसिद्धि होने से लक्षण की असिद्धि हो जायगी।

समर्थन—नास्ति इत्याकारक जो (ज्ञान) उसका विषय अभाव है।

खण्डन—घटाभावोनास्ति इत्याकारक प्रतीति का विषय घट भी है, अतः घट में अतिव्याप्ति हो जायगी।

किञ्च इस लक्षण में अस्ति इत्याकारक प्रतीति का विषय भाव है, इस भाव की निरुक्ति में उक्त दोष भी हो जायँगें।

चासिद्धेः । नास्तीति प्रतीयमानत्वमिति चेन्न । घटाभावो नास्तीति घटस्य तथाप्रतीयमानतया अभावत्वापत्तेः । अस्तीति भावत्वनिरुक्तौ यदुक्तं दूषणं तदापत्तेश्च ॥७१॥

प्रतियोगिनिरूपणाधीननिरूपणत्वमिति चेन्न । प्रतियोगिनः परार्थत्वेऽतिप्रसङ्गात्, विरोध्यर्थत्वे चैतदनिरुक्तेः, असदर्थत्वे नञर्थस्यासिद्धेः, अतीतानागतज्ञानादौ विषयादिनाऽतिप्रसङ्गात् ॥ ७२ ॥

यच्च किञ्चिदभावस्य लक्षणमुच्यते, स भावोऽभावो वा स्यात् । नाद्यः, भावस्याभावानाश्रितत्वात् विषयिधर्म्मेण च कथमपि तथात्वे तन्निर्वाच्यं स्यात् । अन्यदेव तद्वदिति चेन्न । तद्वदभावस्याभावत्वे स्ववृत्तिः, भावत्वे च व्याघातात् । न द्वितीयः, तस्यात्मनि वृत्तौ विरोधापत्तेः, अवृत्तावव्यापकत्वप्रसङ्गादिति । प्रतिक्षेप्यविशिष्टमेव यत् प्रतिभाति सोऽभाव इति चेन्न । प्रतिक्षेपानिरुक्तौ प्रतिक्षेप्यानिरुक्तेः ॥ ७३ ॥

अर्थात् नास्ति यह शब्द शब्दपरक है या अर्थ परक, यदि शब्द परक मानें, तो "न वर्तते" "न भवति" इत्यादि प्रतीति का विषय अभाव न कहावेगा और यदि अर्थपरक कहें तो अद्यावधि नास्ति शब्द के अर्थ का निश्चय हुआ नहीं है, अतः असिद्धि वा आत्माश्रय दोष हो जायगा ॥ ७ ॥

समर्थन—प्रतियोगी के निरूपण के अधीन निरूपण जिसका हो वह अभाव है।

खण्डन—यदि प्रतियोगी शब्द का "पर" अर्थ करें तो विषय के निरूपण के अधीन बुद्धि के निरूपण होने से बुद्धि में एवं संयोगादि इत्यादि में अतिव्याप्ति हो जायगी। और विरोधी अर्थ कर नहीं सकते, कारण कि विरोध का अद्यावधि निर्वचन हुआ नहीं है।

और नञर्थ की निरुक्ति न होने से प्रतियोगी शब्द का "असत्" अर्थ भी नहीं कर सकते। किञ्च अतीत अनागत वस्तुका ज्ञान वर्तमान काल में असत् विषय से ही निरूपित होता है अतः उसमें अतिव्याप्ति भी हो जायगी ॥ ७२ ॥

किञ्च आप जो कुछ अभाव का लक्षण करते हैं। वह भाव है, वा अभाव, इनमें प्रथम पक्ष युक्त नहीं है, कारण कि भाव अभाव में नहीं रहता है। यदि विषयिधर्म्म प्रमेयत्व अभिधेयत्व के तुल्य भावरूप लक्षण को अभाव मानें भी, तो उस लक्षण का निर्वचन करना चाहिये। और उस प्रकार से सब निर्वचन खण्डित हैं। प्रमेयत्व के तुल्य किसी भावरूप अभाव के लक्षण का कथन भी करें, तो लक्षणयुक्त अभाव को यदि अभाव मानें, तो उसमें भी लक्षण का अस्तित्व कहना पड़ेगा, तब तो विशिष्टवृत्ति धर्म के विशेषण में रहने से आत्माश्रय हो जायगा। और लक्षणयुक्त अभाव को यदि भाव कहें, तो अभाव भाव है—ऐसा व्याघात हो जायगा। और लक्षण को यदि अभावरूप मानें, तो आत्माश्रय होगा। और यदि अभावरूप लक्षण में लक्षण की स्थिति न मानें, तो लक्षणरूप अभाव में ही लक्षण की अव्याप्ति हो जायगी।

समर्थन—प्रतिक्षेप निषेध्य से विशिष्ट ही जो भासता हो वह अभाव है।

खण्डन—प्रतिक्षेप शब्द के अर्थ की यावत् निरुक्ति न हो, तावत् यह लक्षण दुर्बोध है। और प्रतिक्षेप शब्द के अर्थ की अद्यावधि निरुक्ति हुई नहीं ॥ ७३ ॥

इति अभाव निर्वचन खण्डनानुवाद।

विशिष्टशब्दार्थश्च निर्वचनीयः स्यात्। तत्र विशिष्टं विशेषणविशेष्यतत्सम्बन्धेभ्यो भिन्नमभिन्नं वा। नाद्यः, दण्डपुरुषसम्बन्धमन्तरेण दण्डिनोऽन्यस्याप्रतीतेः। दण्डिनमानयेत्युक्तेऽतदानयनप्रसङ्गाच्च। तत्सम्बन्धेनोपलक्षितत्वात्तथेति चेन्न, अतद्गत उपलक्ष्यत्वेऽतिप्रसङ्गात्। तद्गतश्चान्यत्वात्। सम्बन्धो हेतुः स च तदधिकरण एवेति चेन्न, सम्बन्धात्तदधिकरणसम्बन्धान्यत्वापत्तेरित्येप न पन्थाः। तत्सम्बन्धिनि तत्र व्यवहार इति चेन्न। तस्यापि विशिष्टत्वेनान्यत्वापत्तौ व्यवहारविषयगतविशेषस्य वक्तु-

अथ विशिष्ट खण्डनानुवाद।

किञ्च अभावलक्षणघटकविशिष्ट पदार्थ का लक्षण करना चाहिए। विशिष्ट विशेषण, विशेष्य और उनके सम्बन्ध से भिन्न है या अभिन्न? इनमें प्रथम पक्ष युक्त नहीं है, कारण कि "दण्डिनमानय" इस वाक्य के श्रवण के अनन्तर दण्ड पुरुष सम्बन्ध से भिन्न किसी अर्थ की प्रतीति नहीं होती है—

किञ्च यदि विशिष्ट को भिन्न मानें तो "दण्डिनमानय" इस वाक्य के कथन के अनन्तर विशेषण विशेष्य सम्बन्ध, से भिन्न का आनयन होना चाहिये। इनसे भिन्न का आनयन होता नहीं है।

समर्थन—विशिष्ट विशेषण विशेष्य के सम्बन्ध से उपलक्षित होता है, अतः विशिष्ट में होता हुआ व्यवहार, विशेषण विशेष्य में भी होता है।

खण्डन—प्रकृत विशेषण विशेष्य से शून्य विशिष्ट उपलक्ष्य है, अथवा प्रकृत विशेषण-विशेष्य से घटित? प्रथम पक्ष में "दण्डिन मानय" ऐसा कहने पर कुण्डली की प्रतीति या आनयन होना चाहिये, और द्वितीय पक्ष में विशिष्ट के अन्य होने से विशिष्ट के व्यवहार को विशेषण विशेष्य में नहीं होना चाहिये।

समर्थन—सम्बन्धविशिष्ट की प्रतीति अथवा व्यवहार में हेतु है और सम्बन्ध विशेषण विशेष्य उभयाश्रित है, अतः विशिष्ट व्यवहार विशेषण, विशेष्य दोनोंको ग्रहण कर ही होता है।

खण्डन—केवल सम्बन्ध अतिप्रसक्त होने से विशिष्टव्यवहार का हेतु नहीं है। किन्तु दण्डादिरूप अधिकरण से विशिष्ट सम्बन्ध ही हेतु है, और दण्डाधिकरणविशिष्ट सम्बन्ध विशिष्ट होने से सम्बन्ध से अन्य है, और विशिष्ट व्यवहार का हेतु उक्त विशिष्ट का अधिकरण—अंशतः आत्माश्रय होने से—विशेषण विशेष्य है नहीं, अतः विशिष्ट व्यवहार विशेषण विशेष्य दोनों में नहीं होगा। तस्मात् विशिष्ट अन्य है—यह कथन युक्त नहीं है।

समर्थन—यद्यपि विशिष्ट विशेषणविशेष्य सम्बन्ध से अन्य है तथापि विशेषण विशेष्य का सम्बन्धी है, अतः विशिष्ट व्यवहार विशेषण विशेष्य उभय को ग्रहण कर ही होता है।

खण्डन—विशिष्ट मात्र तो दण्ड पुरुष का सम्बन्धी है नहीं, किन्तु दण्ड पुरुषीयत्व-विशिष्ट ही विशिष्ट दण्ड पुरुष का सम्बन्धी है। और वह अन्य है अतः दण्ड पुरुषीयत्व विशिष्ट में जो व्यवहार होता है वह दण्ड पुरुष का आदान कर होवे। केवल दण्डी रूप विशिष्ट में जो व्यवहार होता है वह दण्ड, पुरुष में कैसे होगा।

मशक्यत्वात् । एवं परम्पराकल्पनायामप्यनवस्थामात्रं न तु व्यवहार्यगतो विशेषः कश्चित् ॥ ७४ ॥

द्वितीये तु प्रत्येकं दण्डिव्यवहारप्रसङ्गो विशेषाऽभावात् । न ते प्रत्येकं दण्डिपदार्थाः किन्तु मिलिता इति चेत्, मिलिता इति किं ते च मेलकं चाभिधीयते उत तेभ्योऽन्य एव कश्चित्, आद्ये, प्रत्येकं स एव प्रसङ्गः, मेलकेऽप्याधिकः । द्वितीयस्तु प्रतीतिव्यवहारविरोधात्पूर्ववदेवनिरस्तः । एकज्ञानारूढो वा अविरलनानाज्ञानारूढोवाऽनेकश्च सम्बन्धश्च विशिष्टपदार्थ इति चेन्न । घटपटाविति बुद्धावारूढौ घटपटौ सम्बन्धश्च घटपटरूपो विशिष्टः स्यात् । घटत्वपटत्वसम्बन्धानां तद्बुद्धावारूढानामभ्युपगमेन सम्बन्धस्यापि तद्बुद्ध्यारोहोपगमध्रौव्यात्, अन्यथा घटत्वविशिष्टरूपो घटः, पटत्वविशिष्टरूपश्च पटः कथमभ्युपेयस्तत्र । नच घटपटावित्यपि विशिष्टमेव, स्वतन्त्रयोः घटपटयोः परस्परासम्बन्धयोस्तत्र व्यवहारात् न पुनर्यथा दण्डी पुरुषस्तथा घटी पटः, पटी घट इति वा तत्र व्यवहारः ।

समर्थन—दण्डी पुरुष इस विशिष्ट का सम्बन्धी दण्ड पुरुषीयत्व से विशिष्ट विशिष्ट है और उसका सम्बन्धी दण्ड पुरुष है अतः परम्परा से विशिष्ट का सम्बन्धी दण्ड पुरुषको भी होने से विशिष्ट में व्यवहार दण्ड पुरुष का ग्रहण कर ही होगा ।

खण्डन—दण्ड पुरुषीयत्व से विशिष्ट भी विशिष्ट मात्र नहीं है किन्तु विशिष्ट विशेष ही है और वह अन्य है तथा दण्ड पुरुष का सम्बन्धी है नहीं, अतः विशिष्ट का व्यवहार दण्ड पुरुष का आदान कर नहीं होगा । इस रीति से विशिष्ट परम्परा के आश्रयण में केवल अनवस्था होगी व्यवहर्त्तव्य विषयगत विशेष का लाभ नहीं होगा ॥ ७४ ॥

विशेषण, विशेष्य, सम्बन्ध से अभिन्न ही विशिष्ट है, इस द्वितीय पक्ष में भी दण्ड, पुरुष, सम्बन्ध प्रत्येक में दण्डी व्यवहार हो जायगा ।

समर्थन—दण्ड, पुरुषादि प्रत्येक दण्डीपद का अर्थ नहीं है, किन्तु मिलित (समुदाय) दण्डी पद का अर्थ है अतः प्रत्येक में दण्डी व्यवहार नहीं होता है ।

खण्डन—मिलित शब्द का क्या अर्थ है, दण्ड, पुरुष, सम्बन्ध और इनका समूह अर्थ है, अथवा दण्डादि से अन्य ही समुदायरूप अर्थ है ? प्रथम पक्ष में प्रत्येक में भी विशिष्ट व्यवहार हो जायगा और समुदाय में भी विशिष्ट व्यवहार होगा—यह अधिक हुआ । द्वितीय पक्ष का पूर्व ही (विशिष्ट अन्य है इस कल्प के खण्डन के समय में ही) निराकरण कर आये हैं ।

समर्थन—एक ज्ञान अथवा अव्यवधान से जात अनेक ज्ञान का विषय अनेक और सम्बन्ध विशिष्ट पद का अर्थ है ।

खण्डन—"घटपटौ" इत्या कारक बुद्धि का विषय घटपट तथा संबन्ध भी घट पटरूप विशिष्ट हो जायगा, कारण कि घटत्व पटत्व और उनके सम्बन्ध को उस ज्ञानके विषय होने से सम्बन्ध भी उस ज्ञान का विषय है ही । यदि सम्बन्ध को उस ज्ञान का विषय न मानें, तो घट को घटत्वविशिष्ट तथा पट को पटत्वविशिष्ट कैसे मानेंगे । घट पटविशिष्ट ही है ऐसा नहीं मान सकते । कारण कि स्वतन्त्र (परस्पर असम्बद्ध) ही घट पट का वहां व्यवहार होता है । जैसे "दण्डीपुरुषः" यह व्यवहार होता है वैसे "घटी पटः" "पटी घटः" ऐसा व्यवहार नहीं होता है ।

न चैकज्ञानाद्यारूढ़तैव तयोर्न मन्तव्या, यतो घटपटाविति द्वित्वं तयोस्तद्द्वयानवगाहिना कथं विज्ञानेनावगाह्येतेति प्रत्यभिज्ञाप्रस्तावोक्तान् दोषानाहास्यामः। अत एवाविरल-नानाज्ञानारूढतापि विशिष्टता निरवकाशा ॥ ७५ ॥

अथाप्रकाशमानासम्बन्धोऽनेक एकबुद्ध्यारूढस्तथा नचैवं घटपटौ तत्कथमुक्त-दोषापत्तिरिति चेन्न, अप्रकाशमानोऽसम्बन्धो ययोरित्ययमप्यर्थो विशकलित इति घट-त्वपटत्वव्यवत्यादवैशिष्ट्यमपि तत्र भज्येताविशेषात्। अथ धर्म्मधर्म्मिसम्बंधाः स्वतन्त्रा एवैकबुद्ध्यारूढास्तथा नच घटपटौ धर्म्मधर्म्मिरूपावित्यनतिप्रसङ्ग इति चेन्न। धर्म्म-त्वस्यैकस्य दण्डादिगुणादिसाधारणस्य वक्तव्यत्वापातात्। सोऽप्येष्टव्य इति चेत्। इष्यतां परं तस्यापि वालुकावद्विशकलितस्योपगन्तव्यत्वेन धर्म्म्येव किन्न धर्म्मः स्यात् ॥ ७६ ॥

तथाप्रतीत्यभावान्न स्यादिति चेन्न। त्वदुक्तैकप्रतीत्यारोहस्याविशेषे प्रतीति-रपि तथा किन्न स्यात्। मास्तु धर्म्मत्वमनुगतं तत्तद्रूपादिपदार्थस्वरूपमेव तथा विचित्रं

समर्थन—घट पट दोनों एक ज्ञान के विषय नहीं होते हैं।

खण्डन—घट पट दोनों को विषय न करने वाले विज्ञान का विषय उन दोनों का द्वित्व कैसे होगा। इस प्रकार से प्रत्यभिज्ञा के खण्डन के प्रकरण के दोष आहृत होंगे। इसी प्रकार से अव्यवधान से जात नानाज्ञानविषय अनेक और सम्बन्ध विशिष्ट हैं—यह लक्षण भी खण्डित जानना चाहिये ॥ ७५ ॥

समर्थन—अप्रकाशमान है असम्बन्ध जिनका ऐसे एक बुद्धि के विषय अनेक विशिष्ट हैं, घट पट का असम्बन्ध प्रकाशित है, अतः "घट पटौ" इत्याकारक समूहालम्बन ज्ञान के विषय घट पट में विशिष्ट लक्षण की अतिव्याप्ति नहीं।

खण्डन—अप्रकाशमान है असम्बन्ध जिनका यह अर्थ साफ नहीं है, किस का किसमें असम्बन्ध अप्रकासित हो यह स्पष्ट कहना चाहिये, अतः घटत्व का पट में तथा पटत्व का घट में असम्बन्ध अप्रकाशित होने से घटत्वविशिष्ट घट, पटत्वविशिष्ट पट में अव्याप्ति हो जायगी

समर्थन—धर्म्म, धर्म्मी, सम्बन्ध स्वतन्त्र विशिष्ट का अविशेषण एक बुद्धि के विषय विशिष्ट हैं घट पट परस्पर धर्म्म-धर्म्मी भावापन्न नहीं हैं, अतः उक्तस्थल में अतिव्याप्ति नहीं है।

खण्डन—दण्डादि और गुणादि उभय साधारण धर्म्म का निर्वचन करना चाहिये। और प्रमेयत्वादि के तुल्य दण्डादि साधारण धर्म्म को मान भी लें, तब भी विशिष्ट के अथावधि निर्वचन न होने से धर्म्मत्व विशिष्ट धर्म्म है, ऐसा धर्म्म का लक्षण हो नहीं सकता। अतः उपसंग्राहकरूप न होने से बालू के तुल्य विशकलित ही धर्म्म हुए फिर धर्म्मी ही धर्म्म क्यों न कहावे ॥ ७६ ॥

समर्थन—धर्मत्व विशिष्ट रूप से धर्म्मी की प्रतीति नहीं होती है अतः धर्म्मी धर्म्म नहीं है।

खण्डन—यावत् विशिष्ट की निरुक्ति न हो, तावत् ऐसी व्यवस्था हो नहीं सकती। किसी प्रकार से हो भी तो धर्म्मत्व, धर्म्मी, सम्बन्ध, एक बुद्धि के विषय होते ही हैं, अतः आपके अभिमत विशिष्ट लक्षण के समन्वय होने से धर्म्मत्व विशिष्टरूप से धर्म्मी की प्रतीति ही क्यों न हो

यत्तदेव धर्म्मिणा सम्बन्धेन च सममेकबुद्ध्यारूढं विशिष्टं नान्यदिति चेन्न, तेषां स्वरूपाणां भेदेन नानाभूतेषु विशिष्टेषु अनुगता विशिष्टबुद्धिर्न स्यात् । सम्बन्धमपि तर्हि विलुम्प, एवंस्वभावादेव रूपादिकं तथाधियमाधत्ताम् । एतदपि किं न स्यादितिचेत्तर्हि वराको धर्म्यपि विसृज्यतां यथा विना सम्बन्धं विशिष्टबुद्धी रूपादिस्वभावसामर्थ्यात्समर्थिता तथा विना धर्मिणमप्यस्त्विति जितं जैनैः ॥ ७७ ॥

स्यादप्येवं यदि शुक्ल इत्येतावन्मात्रमेव प्रतीयेत, किन्तु शुक्लः शङ्ख इत्यादिना प्रत्ययेन सामानाधिकरण्यमुल्लिखता धर्म्यप्यानीय दीयत इति चेन्न । शङ्खजातेरुपाधेर्वा रूपादेरविरलतादृगवस्थितस्य वा स्वरूपवैलक्षण्यमेव तत्पदेऽभिषिच्यतां येन विनाऽप्यधिकरणं सामानाधिकरण्यव्यवहारः स्यात् । किञ्च नैतावन्मात्रं, बुद्धिमादाय तदर्थगतवैचित्र्यान्तरखण्डने बुद्धिरेव स्वकारणसामर्थ्यात्तथोच्चिथता तत्तद्व्यवहारप्रसवित्री स्वीक्रियतां कृतमर्थव्यसनेन ।

तस्मात्—

"प्रत्येतव्यस्य वैचित्र्यं प्रत्ययोल्लेखसाक्षिकम् ।
धियं निवेश्य लुम्पद्भ्यो भङ्गं साध्येव यच्छति" ॥ ७८ ॥

समर्थन—धर्म्मत्व अनुगत न हो हानि क्या है। रूपादि पदार्थों के स्वरूप ही वैसे विचित्र हैं जिस से धर्म्मी और सम्बन्ध के साथ एक बुद्धि के विषय हो कर विशिष्ट हैं अन्य विशिष्ट नहीं हैं।

खण्डन—रूपादि के स्वरूप भिन्न भिन्न हैं, अतः विशिष्ट मात्र में अनुगत विशिष्ट बुद्धि नहीं होगी। किंच यदि रूपादि के स्वभाव के वैचित्र्य से ही निर्वाह करना है, तो सम्बन्ध को भी त्यागिये, स्वभाव से ही रूपादि सम्बन्ध विषयक बुद्धि का भी उत्पादन करेंगे। यदि कहें कि सम्बन्ध को भी त्याग देंगे, तो बिचार धर्म्मी को भी त्यागिये जैसे बिना सम्बन्ध रूपादि के स्वभाव से विशिष्ट बुद्धि होगी ऐसी ही बिना धर्म्मी के भी विशिष्ट बुद्धि होगी अतः धर्म्मी को भी न मानने वाले बौद्धों ने विजय पाया ॥ ७७ ॥

समर्थन—यदि ऐसा होता तो "शुक्ल" इत्याकार ही प्रतीति होती किन्तु सामानाधिकरण्य उल्लेख करने वाले "शुक्लः शंखः" इस ज्ञान से धर्म्मी भी गृहीत होता है।

खण्डन—शंखत्व जाति या उपाधि तथा एक ज्ञान विषय रूपादि के स्वरूप के वैलक्षण्य को ही उसके स्थान में अभिषिक्त कीजिये, जिससे अधिकरण के विना भी सामानाधिकरण्य व्यवहार हो। किञ्च यही नहीं होगा किन्तु यदि बुद्धि को ग्रहण कर अर्थ के वैचित्र्य का खण्डन करें, तो स्वकारण से विचित्ररूप से उत्थित बुद्धि ही को उस उस व्यवहार का जनक मान लीजिये, बाह्य अर्थ के स्वीकार में व्यसन व्यर्थ है। तस्मात् ज्ञान का आकार जिस में प्रमाण है ऐसे प्रत्येतव्य (विशिष्टरूप विषय) के वैलक्षण्य का—बुद्धि घटित लक्षण के निवेश कर—अपलाप करने वाले मनुष्य को पराजय उक्त प्रकार से बाह्य पदार्थ मात्र के खण्डन द्वारा बुद्धि ही देगी। अर्थात् अतिरिक्त विशिष्ट के खण्डन का विज्ञान वाद में पर्य्यवसान न होने से नैयायिक का अपसिद्धान्त हो जायगा ॥ ७८ ॥

यत्तु केनचिदभावस्य स्थाने तन्मात्रधीरभिषिक्ता तत्तस्य परमुचितम् ।
गुरुर्धियमभावस्य स्थाने स्थानेऽभिषिक्तवान् ।
प्रसिद्ध एव लोकेऽस्मिन् बुद्धबन्धुः प्रभाकरः ॥ २ ॥

अपि चैकबुद्ध्यारूढोऽनेकश्च सम्बन्धश्च विशिष्टइति पक्षे योप्येवंरूपवैलक्षण्यभाग्विशिष्ट इति कथ्यते, सोऽप्ययं विशिष्टोऽविशिष्टाद्वैलक्षण्येन बोध्यमानो ज्ञानमन्तर्भाव्यैव स्यादिति तत्र तत्रापि ज्ञानान्तरनिवेशनेऽनवस्था क्वचिदनिवेशे तदभावादविशिष्टत्वे शेषस्याऽऽमूलमविशिष्टत्वापातः । तद्योग्यस्तथेति चेत् । न तर्हि योग्यतापि तद्विशेषणं वालुकावदसंलग्नाऽतिप्रसङ्गिकैवेत्युक्तमावर्त्तते ।

एवमेकमिति ज्ञानमित्यारूढमित्यादिद्वारे द्रष्टव्यम् । तथाहि—
"अविशिष्टाद्विशिष्टस्य वैशिष्ट्ये यदि धीर्विशेत् ।
तद्बुद्धिधाराविश्रान्तिः स्याद्वा मूलाविशिष्टतेति ॥ ३ ॥

विशिष्टनिरासेन च सर्वाणि लक्षणानि निरस्तानीति मन्तव्यं यथा गुणाश्रयो द्रव्यमित्यादि ॥ ७९ ॥

जो मीमांसक प्रभाकर अभाव के स्थान में अभाव बुद्धि का अभिषेक करते हैं, "घटाभाववत् भूतलम्" इत्याकारक ज्ञान ही भूतल में घटा भाव है, उक्त बुद्धि से अन्य घटाभाव बाह्य पदार्थ नहीं है—ऐसा कहते हैं, उनका यह कथन युक्त ही है, कारण कि इस लोक में "गौतमश्चार्कबन्धुश्च" इस अमर के अनुसार बुद्ध का बन्धु अर्क (प्रभाकर) प्रसिद्ध ही है।

किञ्च—विशिष्ट का जो [एक बुद्धि में आरूढ़ अनेक तथा सम्बन्ध विशिष्ट है] लक्षण है उस लक्षण से विशिष्ट भी लक्ष्य ही है। अतः उसकी अविशिष्ट से व्यावृत्ति भी अन्य ज्ञान से घटित उक्तलक्षण से ही होगी, अतः ज्ञान परम्परा के निवेश से अनवस्था हो जायगी, और यदि अन्य ज्ञान का निवेश न करें, तो मूल पर्य्यन्त अविशिष्ट हो जायगा।

समर्थन—लक्षण विशिष्ट में अन्य ज्ञान घटित लक्षण नहीं रहता है किन्तु ज्ञान की योग्यता से घटित ही लक्षण रहता है (अतः ज्ञान परम्परा के अनिवेश से अनवस्था नहीं।

खण्डन—योग्यता से घटित उक्त लक्षण विशिष्ट में भी यदि उक्त लक्षण को मानें, तो अनवस्था और यदि न मानें तो मूल पर्य्यन्त अवैशिष्ट्य हो जायगा। इसी प्रकार से एक ज्ञान में आरुढ़-रूप विशेषण से विशिष्ठ जो लक्षण रूप विशिष्ट उसको भी लक्ष्य होने से लक्षण का वैशिष्ट्य मानेंगे इस प्रकार से विशेषण परम्परा विशिष्ट लक्षण परम्परा के स्वीकार में अनवस्था जानना चाहिये। लक्षण विशिष्ट की अविशिष्ट से व्यावृत्ति यदि अन्य ज्ञान से घटित उक्त लक्षण से मानें, तो ज्ञान परम्परा मानने में अनवस्था और यदि व्यावृत्ति न करे तो मूल पर्य्यन्त अवैशिष्ट्य हो जायगा ॥ ७९ ॥

इति विशिष्ट लक्षण खण्डनानुवाद

इतोऽपि गुणाश्रयो द्रव्यमित्यसङ्गतं तथाहि—कथमेतल्लक्षणमवधारणीयं सङ्ख्यारूपगुणवत्तया रूपादेरपि प्रतीतेः। भ्रान्तिरसाविति चेत्, पृथिव्यादौ कथमभ्रान्तिरिति वक्तव्यम्। तत्र बाधकाभावादिति चेत्, तुल्यम्। गुणस्य गुणवत्तायां बाधकमस्माभिरवश्यं वक्तव्यं निर्गुणा गुणा इति सिद्धान्तादिति चेन्न, रूपादेर्गुणत्वस्यैव निश्चेतुमशक्यत्वात्॥ ८०॥

सामान्यवान् गुण इत्यादिगुणलक्षणयोगात्तन्निश्चय इति चेन्न, अगुण इति गुणलक्षणांशस्यासिद्धेः सङ्ख्यावत्तया प्रतीतेर्विद्यमानत्वात्। भ्रान्तिरिति चेन्न, परस्पराश्रयप्रसङ्गात्। सङ्ख्यावत्तया प्रतीतेर्भ्रान्तित्वे गुणलक्षणसिद्धिः तत्सिद्धौ च बाधेन भ्रान्तित्वस्थापनम्। नच हेत्वन्तराद्रूपादेर्गुणत्वसिद्धौ बाधकसिद्धिः दृष्टान्तस्यापि सङ्ख्यायोगिप्रत्ययाक्रान्तत्वेन प्रसक्तद्रव्यकोटिप्रवेशतया गुणत्वेनासिद्धेः। सङ्ख्यायाः

अथ द्रव्यलक्षण-खण्डनानुवाद

विशिष्ट के खण्डन से सम्पूर्ण लक्षण को खण्डित जानना चाहिये, कारण कि विशिष्ट के प्रवेश के विना कोई भी लक्षण हो नहीं सकता—जैसे गुण-विशिष्ट द्रव्य है—यह लक्षण, और वक्ष्यमाण दोषों से भी गुण-विशिष्ट द्रव्य है—यह लक्षण असङ्गत है। देखिये-संख्यारूप गुण, रूपरस आदि में भी है—फिर यह कैसे जाना जाय कि गुण विशिष्ट ही द्रव्य है। रूप रस में सङ्ख्या की प्रतीति भ्रम है—यह कह नहीं सकते, कारण कि पृथ्वीआदि में संख्या की प्रतीति भ्रम नहीं है और रूपादि में सङ्ख्या की प्रतीति भ्रम है—इसमें कुछ प्रमाण नहीं है। पृथिवी में संङ्ख्या की प्रतीति का बाधक नहीं है—यह भी रूपादि में संख्या की प्रतीति में बाधक न होने से तुल्य ही है।

समर्थन—रूपादि गुण में सङ्ख्यादि गुण नहीं रहता है, इसमें बाधक हम अवश्य कहेंगे, कारण कि "निर्गुणा गुणाः" यह सिद्धान्त है॥ ८०॥

खण्डन—रूप गुण है इसमें प्रमाण न होने से यह अनिश्चित है।

समर्थन—जिसमें जाति रहती हो और गुण न रहता हो, वह गुण है। इस लक्षण से निश्चय करेंगे कि रूप गुण है।

खण्डन—रूपमें सङ्ख्यारूप गुण के होने से गुणलक्षणघटक "अगुण" इस अंश का समन्वय न होने से रूप गुण है—इसमें कुछ प्रमाण नहीं है।

समर्थन—रूप रस में संख्या की प्रतीति भ्रम है।

खण्डन—अन्योन्याश्रय हो जायगा। देखिये—रूप में सङ्ख्या की प्रतीति भ्रम है—ऐसा निश्चय होने पर गुणलक्षण की रूप में सिद्धि होगी। और रूप में लक्षण की सिद्धि होने पर बाध होने से प्रतीति भ्रम सिद्ध होगी।

समर्थन—"रूपादयो गुणाः सामान्यवत्त्वे सति अचलनात्मकत्वात् शब्दवत्" इस अनुमान से रूप में गुणत्व की सिद्धि होने पर रूप में संख्या का बाध सिद्ध होगा।

खण्डन—शब्दरूप दृष्टान्त में संख्या के होने से उसका द्रव्य कोटि में प्रवेश होने से दृष्टान्त के अभाव से अनुमिति नहीं होगी, अनवस्था होने से, संख्या में संख्या के न होने से संख्या ही दृष्टान्त होगी, यह नहीं कह सकते, कारण कि संख्या में भी पृथक्त्वरूप गुण

सङ्ख्यावत्त्वेनानवस्थाप्रसङ्गान्निःसङ्ख्यत्वव्यवस्थितौ दृष्टान्तत्वं सम्भविष्यतीति चेन्न, पृथक्त्वेनापि तस्याः सम्भावितद्रव्यकोटिप्रवेशत्वात्। एवं पृथक्त्वस्यापि सङ्ख्यावत्तयेति ॥ ८१ ॥

जातीतरानाश्रयोऽकर्म्मरूपो गुण इत्यपि न, जातिव्यापकत्वात्। जातिमात्राश्रय इत्येवार्थ इति चेन्न, अभावाश्रयतया सर्वाव्यापनात्। जातिमात्रभावाश्रय इति चेन्न, उपाधीनामपि तदाश्रत्वात्। नोपाधीनामाश्रयो रूपादिः, किन्तु कथमपि सम्बन्धी, तावतैवानुमादिप्रवृत्तिरिति चेन्न, उपाधिसम्बन्धं प्रत्यप्याश्रयत्वस्य मन्तव्यत्वात्। अन्यथा यदि किञ्चिद्रूपमत्र नेष्यते तदा सामान्यविशेषानुमानं तत्र न स्यात्, व्यधिकरणयोर्गम्यगमकभावानभ्युपगमात्। तस्माद्यदेतदेव लक्षणं तत्तावन्न जातिरूपं तदिदं रूपं यदि रूपादौ नास्ति तदानीमस्ति, यद्यस्ति तदा नास्तीति विचित्रेण लगेत्युक्ते न लगति मा लगेत्युक्ते च लगतीति प्रवह्लिकामनुकरोति ॥ ८२ ॥

अपि च गुणाश्रय इत्यत्र कश्चाश्रयार्थः ? समवायीति चेन्न, गुणत्वादेरपि द्रव्यत्वप्रसङ्गात् गुणावच्छिन्नस्य समवायस्य गुणत्वेऽपि विश्रान्तत्वात्। गुणः समवेतो यत्र

रहता है, अतः उसका भी द्रव्य में ही अन्तर्भाव होने से वह भी दृष्टान्त नहीं हो सकता। इसी प्रकार से पृथक्त्व में संख्या होने से उसका भी द्रव्यकोटि में अन्तर्भाव होने से वह भी दृष्टान्त नहीं हो सकता ॥ ८१ ॥

समर्थन—जो जाति से इतर के आश्रय न हों और कर्म्म से भिन्न हों, वे गुण हैं।

खण्डन—यह लक्षण भी जाति में अतिव्याप्त होने से अयुक्त है।

समर्थन—केवल जाति के ही आश्रय हों और कर्म्म भिन्न हों, वे गुण हैं।

खण्डन—अभाव के सब गुणों में रहने से लक्षण में असम्भव दोष हो जायगा।

समर्थन—केवल जातिरूप भाव के जो आश्रय हों तथा कर्म्म से भिन्न हों, वे गुण हैं।

खण्डन—प्रमेयत्वआदि उपाधि के गुण में होने से फिर भी असम्भव हो जायगा ॥

समर्थन—उपाधिप्रमेयत्वआदि का रूपादि आश्रय नहीं है किन्तु किसी प्रकार से सम्बन्धी हैं इसीसे "रूपादि अभिधेयं प्रमेयत्वात्" इस अनुमिति की प्रवृत्ति होती है।

खण्डन—प्रमेयत्व के सम्बन्ध का आश्रय अवश्य रूपादि को मानना होगा यदि सम्बन्ध का भी आश्रय न मानें, तो रूपादि में विशेषगुणत्व का तथा सङ्ख्यादि में सामान्यगुणत्व का अनुमान नहीं होगा, कारण कि एक अधिकरण में न रहने वालों में गम्यगमक भाव होता नहीं हैं। और यहाँ कोई उपाधि आपके मत में है नहीं।

तस्मात् जो यह लक्षण है वह जातिरूप तो है नहीं किन्तु उपाधिरूप है, अतः यह लक्षण यदि रूपादि में नहीं है, तब तो लक्षण के समन्वय होने से है, और यदि है तो लक्षण के समन्वय न होने से नहीं है, अतः "लग" कहने पर तो नहीं लगता और "मालग" कहने पर लगता है—इस विचित्र पहेली का अनुकरण आप का लक्षण करता है[1] ॥ ८२ ॥

---

१ प्रश्न—ऐसी कौन वस्तु है जो "मागल" कहने पर लगता हो और "लग" कहने पर न लगता हो ? उत्तर—अ

स गुणसमवायीति विवक्षितमिति चेन्न, यत्रेत्यस्याधिकरणार्थस्याद्याप्यनिरूपणेन तेनैव तद्व्याकारानुपपत्तेः, इहेति प्रत्ययहेतुराधार इति चेन्न, इह शङ्खे पीतिमेति प्रत्यया-च्छङ्खस्य पीतगुणाधिकरणत्वप्रसङ्गात् । भ्रान्तिरसौ, यथार्थश्च प्रत्ययोऽत्र विवक्षित इति चेन्न, तदर्थासत्त्वनिरूपणव्यतिरेकेण तदप्रामाण्यस्य बोद्धुमशक्यत्वात् । न चाद्यापी-हेति प्रत्ययस्यार्थः प्रतीतो यत्प्रतियोगिकमसत्त्वं तत्र निरूप्यते । पीतत्वं प्रतियोगि तच्च क्वचित्सिद्धमेवेति चेन्न, तस्य प्रमितत्वादेवासत्त्वानुपपत्तेः । तत्र न तस्य प्रमितत्वमिति चेन्न, तत्रेत्याधारत्वानिरूपणादिति ॥ ८३ ॥

एतेन समवायिकारणं द्रव्यमित्यपि लक्षणं निरस्तम् । कथं निर्णेतव्यमिदं सम-वायिकारणमिदं नेति रूपादौ घटादौ च सङ्ख्यासमवायिकारणत्वयुक्तेस्तुल्यत्वात् ।

किञ्च गुणका आश्रय द्रव्य है यहाँ आश्रय शब्द का अर्थ क्या है समवाय आश्रय शब्द का अर्थ नहीं है, कारण कि गुण समवाय के गुणत्व में होने से गुणत्व भी द्रव्य हो जायगा ।

समर्थन—गुण [समवाय सम्बन्ध से जहाँ] रहता हो वह द्रव्य है ।

खण्डन—"जहाँ" शब्द के अर्थ का अद्यावधि निश्चय न होने से अधिकरण से ही अधिकरण का लक्षण करना युक्त नहीं ।

समर्थन—" इह " इत्याकारक जो ज्ञान उस ज्ञान का विषय अधिकरण है ।

खण्डन—" इह शंखे पीतिमा " ऐसा ज्ञान होने से पीतिमा का आश्रय शंख हो जायगा । उक्त प्रतीति भ्रम है और लक्षणघटक यथार्थ प्रतीति है, अतः शंख में पीतिम के अधिकरणत्व की आपत्ति नहीं—यह नहीं कह सकते, कारण कि अधिकरणरूप अर्थ के असत्व का यावत् निश्चय न हो तावत् " शंखे पीतिमा " यह ज्ञान भ्रम है—ऐसा निश्चय नहीं हो सकता और अद्य पर्यन्त " इह " इस ज्ञान का विषय निर्णीत नहीं है जिसके असत्व का "शंखे पीतिमा" इस ज्ञान में निश्चय करें ।

समर्थन—असत्व का प्रतीयोगी पीतत्व है, वह पुष्पादि में कहीं सिद्ध ही है ।

खण्डन—पीतत्व के प्रमित होने से ही उसका असत्व नहीं होसकता ।

समर्थन—यद्यपि समान्य से पीतिमा का असत्व नहीं है, तो भी शंखरूप अधिकरण में असत्व है ही ।

खण्डन—यावत् अधिकरण की निरुक्ति न हो तावत् शंखरूप अधिकरण में इत्यादि विशेष का प्रदर्शन नहीं कर सकते ॥ ८३ ॥

समर्थन—समवायी कारण द्रव्य है ।

खण्डन—घटादि समवायी कारण है और रूपादि नहीं है—यह निश्चय कैसे हो, कारण कि घटादि में और रूपादि में संख्या समवायी कारणत्व की युक्ति तुल्य है ।

समर्थन—रूप में संख्या नहीं है, अतः रूप में समवायी कारणत्वरूप लक्षण की अति-व्याप्ति नहीं है ।

खण्डन—घट में संख्या है इसमें क्या प्रमाण है । यदि "एकोघटः" "द्वौघटौ" इस प्रतीति को प्रमाण कहें, तो "एकं रूपं द्वे रूपे" इत्यादि प्रतीति से रूप में संख्या होने से रूप में अतिव्याप्ति हो जायगी ।

सङ्ख्यैव रूपादौ नास्तीति चेत् घटादौ कथमस्ति प्रत्ययस्योभयत्रापि तुल्यत्वादित्युक्तमनुपञ्जनीयम्। द्रव्य एव सङ्ख्यास्वीकारे तत्सम्बन्धात् गुणेऽपि तद्व्यवहारोपपत्तौ कल्पनालाघवात् गुणे सङ्ख्याद्यस्वीकार इति चेत्, विपरीतमेव कुतो न स्यात् सत्तासामान्याद्यपि गुणादौ किमर्थमङ्गीक्रियते द्रव्यद्वारैव तत्र व्यवहारोपपत्तेः ॥८४॥

ननु सामान्यार्थ एव कः ? तथाहि—अनुवृत्तप्रत्ययकारणं सामान्यमिति न लक्षणं, सामग्र्या सर्वकार्य्योत्पत्तेः, तथा तदेकदेशान्तरैश्च व्यभिचारात्। असाधारणविशेषणादनन्यजातीयप्रयोजकत्वश्च तदिति चेन्न, स्वसामग्र्यामपि प्रसक्तादवस्थ्यात् भेदप्रतिपत्त्यादावपि प्रयोजकत्वाच्च। एतत्प्रतिपत्तिप्रमाणकत्वमिति चेन्न, स्वसामग्र्यामप्यस्याः प्रमाणत्वात्। एतदेकप्रमाणकत्वमिति चेन्न, अर्थक्रियाभेदादेरपि तत्र प्रमाण-

समर्थन—द्रव्यमें संख्या समवाय से उत्पन्न होती है और गुण में सामानाधिकरण्य सम्बन्ध से है, अतः गुण में संख्या व्यवहार होता है फिर रूप में संख्या समवाय मानने में गौरव है क्यों मानें।

खण्डन—विपरीत ही क्यों न मानें, अर्थात् गुण में समवाय से संख्या की उत्पत्ति और परम्परा सम्बन्ध से द्रव्य में व्यवहार क्यों न मानें। किञ्च सत्ता को भी गुण में क्यों मानते हैं, द्रव्य में सत्ता है—इसी से ही परम्परा सम्बन्ध से गुण में सत्ता की प्रतीति का निर्वाह हो जायगा ॥ ८४ ॥

इति द्रव्यगुणलक्षण-खण्डनानुवाद।

अथ सामान्य-खण्डनानुवाद।

सामान्य शब्द का क्या अर्थ है, देखिये—अनुवृत्त जो प्रयत्य अर्थात् अनेक वस्तुओं में एकाकार जो ज्ञान उसका कारण सामान्य है—यह लक्षण युक्त नहीं है, कारण कि सामग्री से सब कार्य होते हैं। अतः सामग्री में तथा सामग्री के एक देश में लक्षण की अतिव्याप्ति हो जायगी।

समर्थन—अनुवृत्त प्रत्यय का असाधारण कारण सामान्य है। और अन्य जातीय कार्य्य का अप्रयोजक असाधारण शब्द का अर्थ है।

खण्डन—स्वसामग्री भी अन्य जातीय कार्य्य का अप्रयोजक होती है अतः उसमें अतिव्याप्ति वैसी ही है। किञ्च "अयं न महिषः गोत्वात्" इस प्रकार से भेदानुमिति का भी सामान्य कारण होता है अतः सामान्य अनुवृत्तप्रत्यय का असाधारण कारण है भी नहीं।

समर्थन—अनुवृत्त प्रत्यय है प्रमाण जिसमें, वह सामान्य है।

खण्डन—कार्य्य से कारण की अनुमिति होने से स्वसामग्री में भी अनुवृत्त प्रत्यय प्रमाण है अतः स्वसामग्री में अतिव्याप्ति हो जायगी।

समर्थन—अनुवृत्त प्रत्यय ही है एक प्रमाण जिस में वह सामान्य है और सामग्री में अन्य भी प्रमाण है, जैसे सामग्री का एक देश चक्षु, रूपज्ञान से अनुमेय है और आलोक प्रत्यक्ष है।

त्वात् । एतत्प्रतिपत्तिप्रमापकत्वमिति चेन्न तद्विशिष्टस्यापि तत्त्वप्रसङ्गात् । तदवच्छिन्नप्रमांशप्रमापकत्वमिति चेन्न, तदसिद्धचैवासिद्धेः । इयं प्रतीतिर्येन विना नोपपद्यते तत्सामान्यमिति चेन्न, कारकान्तराणामपि तथात्वादिति ॥८५॥

अनुवृत्तं सामान्यमित्यप्यलक्षणम् । किमिदमनुवृत्तत्वं नाम ? अनेकाश्रितत्वमिति चेन्न, अवयविना संयोगादिभिश्च व्यभिचारात् नित्यत्वे सतीति चेन्न, समवायेन व्यभिचारात् । अत एव न बहुवृत्तित्वमित्यपि । असम्बन्धत्वे सतीति चेन्न, अणुभिर्व्यभिचारादिति । नित्यत्वे सत्यनेकसमवेतं सामान्यमिति चेन्न, विकल्पासहत्वात् । एतल्लक्षणं नित्यमनित्यं वा स्यात् । नाद्यः, स्वात्मनि वृत्तिविरोधात् विशिष्टमविष्टमपि हि नित्यत्वं नित्यमेव ॥८६॥

नापि द्वितीयः, सामान्यस्य समवायस्य च नित्यत्वाभावप्रसङ्गात् । आत्मत्वादौ

खण्डन—अर्थ क्रिया (कार्य्य भेद) आकस्मिक न हो इस लिये कारणता के अवच्छेदकत्वरूप हेतु से सामान्य की सिद्धि होती है, जैसे कार्य्य का समवायी कारणतावच्छेदक होने से द्रव्यत्वजातिसिद्ध होती है, अतः अनुवृत्त प्रत्ययमात्र एक ही को सामान्य में प्रमाण न होने से असम्भव हो जायगा ।

समर्थन—अनुवृत्त प्रत्यय ही प्रमा जिसमें हो, वह सामान्य है ।

खण्डन—सामान्य से विशिष्ट व्यक्ति में भी अनुवृत्त प्रत्यय ही प्रमा है, अतः व्यक्ति में अतिव्याप्ति हो जायगी ।

समर्थन—विषयरूप से सामान्य से अवच्छिन्न प्रमा जिसमें प्रमाण है, वह सामान्य है ।

खण्डन—यावत् सामान्य की सिद्धि न हो तावत् इस लक्षण की सिद्धि नहीं होगी और इस लक्षण से ही सामान्य की सिद्धि है इस प्रकार से अन्योन्याश्रय हो जायगा ।

समर्थन—अनुवृत्त प्रत्यय जिसके विना न हो, वह सामान्य है ।

खण्डन—आत्ममनःसंयोग आदि अन्य कारण के विना भी अनुवृत्त प्रत्यय नहीं होता है अतः उनमें लक्षण की अतिव्याप्ति हो जायगी ॥ ८५ ॥

समर्थन—जो अनेक में अनुवृत्त हों, वे सामान्य हैं ।

खण्डन—अनुवृत्तत्व क्या वस्तु है, यदि अनेक में आश्रितत्व कहें, तो संयोग तथा अवयवी में अनेकाश्रितत्व होने से अतिव्याप्ति हो जायगी । और यदि नित्य होकर अनेकाश्रितत्व है, तो समवाय में अतिव्याप्ति हो जायगी । इसीसे बहुवृत्तिकत्व भी अनुवृत्तत्व नहीं है । यदि सम्बन्ध से भिन्न हो ऐसा भी निवेश करें, तो अणु संयोगसम्बन्ध से अनेक दिशा में रहता है अतः अणु में अतिव्याप्ति हो जायगी ।

समर्थन—नित्य होकर अनेक में जो समवाय सम्बन्ध से रहता हो वह सामान्य है ।

खण्डन—विकल्प के असह होने से यह लक्षण भी युक्त नहीं है, देखिये—यह लक्षण नित्य है या अनित्य, इनमें प्रथम पक्ष युक्त नहीं है, कारण कि विशिष्टवृत्ति धर्म्म विशेषण में भी रहता है अतः लक्षण में नित्यत्व के रहने से लक्षण के विशेषण में भी नित्यत्व रहेगा । इससे अंशतः आत्माश्रय हो जायगा ॥ ८६ ॥

द्वितीय पक्ष भी युक्त नहीं है, कारण कि लक्षण में प्रविष्ट समवाय तथा लक्ष्य सामान्य

व्यक्त्यभावायत्तस्यापि विशिष्टाभावस्यासम्भवात्तस्य च कदाचिदसत्त्वानङ्गीकारे तदनित्यत्वस्यैव वक्तुमशक्यत्वात्। तद्ग्राहिणश्च प्रत्ययस्यैककालिकस्य च मिथ्यात्वेऽविशेषात्। सार्वकालिकस्य च मिथ्यात्वप्रसङ्गेन सर्वथा तदसत्त्वापत्तेः। एकस्य च सत्यत्वेऽविशेषात्। सर्वसत्यतायां कदाचिदपि तदसत्त्वं नास्तीति। एकदा तत्सम्बन्धेनोपलक्षितस्यऽन्यदापि विद्यमानत्वात् तथात्वमिति चेन्न, तादृशोपलक्ष्यासम्भवात्, व्यक्तीनां भेदादनित्यत्वानुपपत्तिरेवेति। एतेन नित्यत्वमन्यत्रापि प्रतिवचनीयमिति ॥८७॥

के चानेन लक्षणेन व्यवच्छिद्यन्ते। विशेषादय इति चेत्, विशेषा एव केऽभिधीयन्ते। तत्र नित्येष्वेव द्रव्येष्वेव वर्त्तन्त एव ये ते विशेषा इत्यलक्षणम्। आत्मत्वादिना व्यभिचारात् नित्यान्तरेऽसत्त्वाच्च, न तत्सर्व्वत्र नित्ये वर्त्तते विशेषास्तु नैवं, वर्त्तन्तएवेति

भी अनित्य हो जायँगे। यदि कहें, कि लक्षणघटक व्यक्ति के अनित्य होने से लक्षण अनित्य है, तो जहाँ आत्मत्वादि स्थल में आत्मारूप व्यक्ति भी नित्य है वहाँ लक्षण अनित्य कैसे होगा। किञ्च यदि लक्ष्य में कदाचित् भी लक्षण का असत्व न हो, तो लक्षण अनित्य नहीं हो सकता। और यदि लक्षण का कदाचित् असत्व मानें, तो असत्व काल में लक्ष्य में लक्षण का ज्ञान न होना चाहिये। और सर्वदा ज्ञान होता है अतः सर्वदा लक्षण का सत्व है। यदि लक्षण के ग्राही ज्ञान को [उत्तर काल में बाध न रहते भी एक काल में] भ्रम मानें, तो सब काल में जात लक्षण ज्ञान के मिथ्या होने से सर्वदा लक्षण का असत्व हो जायगा। और एक लक्षणज्ञान को सत्य मानें, तो विशेष न होने से सब लक्षणज्ञान के सत्य होने से लक्षण का कदापि असत्व नहीं होगा। यदि लक्षणत्व के असत्व काल में भी लक्ष्य सामान्य का उपलक्षण करता है अतः असत्व काल में भी लक्षण से उपलक्षित लक्ष्यक का ज्ञान भ्रम नहीं है, तो सामान्यरूप व्यक्ति भिन्न भिन्न हैं और सब में वृत्ति कोई एक उपलक्ष्यता का अवच्छेदक धर्म्म है नहीं, अतः लक्षण उपलक्षण नहीं हो सकता है— इससे लक्षण में अनित्यत्व अनुपपन्न है। इसी प्रकार से अन्यत्र भी नित्यत्व का खण्डन जानना ॥ ८७ ॥

॥ इति सामान्यलक्षण-खण्डनानुवाद ॥

❀ अथ विशेषलक्षण-खण्डनानुवाद ❀

इस सामान्य के लक्षण में प्रविष्ट "अनेक" इस विशेषण का व्यवच्छेद्य क्या है। यदि कहें विशेष, तो विशेष ही क्या वस्तु है। लक्षण न होने से अनिर्वचनीय है।

समर्थन—नित्य में ही द्रव्य में ही जो रहते ही हों, वे विशेष हैं।

खण्डन—आत्मत्व भी नित्य में ही द्रव्य में ही रहता है। अतः आत्मत्व में अतिव्याप्ति होने से यह लक्षण असङ्गत है।

समर्थन—आत्मत्व सब नित्य द्रव्यों में नहीं रहता है और सब नित्य द्रव्यों में जो रहे वह विशेष है, अतः आत्मत्व में अतिव्याप्ति नहीं हुई।

खण्डन—एक एक विशेष भी सब नित्यों में नहीं रहते हैं। अतः उनमें अव्याप्ति हो जायगी।

नियमादितिचेन्न, प्रतिविशेषमव्याप्त्याऽलक्षणत्वात् । यज्जातीय एवमिति लक्षणार्थ इति चेन्न, जातेरनङ्गीकारात् । जातीयेत्यस्यापदत्वात् । उपाधिरेव तथा विवक्षित इति चेन्न, तस्येतरव्यावृत्तस्यावगतौ व्यर्थमिदं तदुपजीविलक्षणम् अत एव विजातीयव्यावृत्तिप्रतीतेः इतरव्यावृत्तस्य वाऽनधिगतौ लक्षणस्य दुरवधारणत्वापत्तेः इतरव्यावृत्ततया तज्जातीयत्वत्वस्याप्रतीतेः ॥८८॥

भवतु स एवोपाधिर्लक्षणमिति चेन्न, तस्यानिरुक्तेः । यतो नित्यद्रव्यव्यक्तिषु विश्वव्यावृत्तधीर्योगिनां स विशेष इति चेन्न, स्वरूपधर्म्मव्यक्तिभेदेष्वपि प्रसङ्गात् । अन्यथा कार्य्यद्रव्यगुणादिव्यक्तिषु सा तेषां कुतः स्यात्, तास्विव वैधर्म्यान्तरस्य नित्येऽष्वपि सम्भवात् विशेषवत्, विशेषासम्भवेन लक्ष्यासिद्धिरिति ।

अपि च विशेषादिभ्यो विशेषलक्षणादेर्भेदात्कथं तत्र तत्रैव तैर्विशेषादिव्यवहारः

समर्थन—जिससे समान जाति वाला सब नित्यों में रहता हो, वह विशेष है ।

खण्डन—विशेष में जाति के न होने से जाति घटित उक्त लक्षण युक्त नहीं है । यदि जाति से उपाधि का ग्रहण करें, तो युक्त नहीं, कारण कि यदि विशेष में वृत्ति इतरव्यावृत्त उपाधि प्रथम से ज्ञात है, तो उसीसे इतरव्यावृत्तत्वरूप से विशेष ज्ञान के सिद्ध होने से उस उपाधि का उपजीवी यह लक्षण व्यर्थ है और यदि इतरव्यावृत्तत्वरूप से उपाधि का ज्ञान नहीं है, तो इस लक्षण का ज्ञान अशक्य है, कारण कि इतरव्यावृत्तत्वरूप तज्जातीयत्व की प्रतीति नहीं है ॥ ८८ ॥

वह उपाधि ही लक्षण हो—यह भी नहीं कह सकते हैं, कारण कि अद्यावधि उस उपाधि की निरुक्ति नहीं हुई है ।

समर्थन—नित्य द्रव्य व्यक्तियों में योगियों की इतर सब से व्यावृत्ति बुद्धि जिससे हो वह विशेष है ।

खण्डन—अतीन्द्रिय कार्य्य द्रव्यों में तथा गुणों में योगियों की व्यावृत्तत्व बुद्धि जिस स्वरूपभेद या धर्म्मभेद से होती है वे विशेष नहीं है । अतः उनमें विशेषलक्षण की अतिव्याप्ति हो जायगी । अन्यथा (यदि स्वरूप भेदादि को व्यावृत्तत्व बुद्धि का हेतु न मानें तो) अतीन्द्रिय कार्य्य द्रव्यादि में उन योगियों की व्यावृत्तत्व बुद्धि कैसे होगी । यदि कहें, कि विशेष के लक्षण में "नित्य द्रव्य में व्यावृत्तत्व बुद्धि जिससे हो" ऐसा निवेश है अतः अतीन्द्रिय कार्य्य द्रव्य में व्यावृत्ति के हेतु स्वरूपभेदादि में अतिव्याप्ति नहीं होगी । तो जैसे अतीन्द्रिय कार्य्य द्रव्य में स्वरूप भेदादि से व्यावृत्ति बुद्धि होती है, वैसे ही नित्य द्रव्यों में भी व्यावृत्तत्व बुद्धि हो जायगी अतः नित्य द्रव्य में विशेष का स्वीकार व्यर्थ है । किञ्च विशेष में विना विशेष के स्वरूपभेद से ही जैसे व्यावृत्तत्व बुद्धि होती है वैसे ही नित्य द्रव्यों में भी व्यावृत्तत्व बुद्धि हो जायगी, अतः विशेष का स्वीकार व्यर्थ है ।

किञ्च यदि विशेषादि लक्ष्यों से विशेषादि के लक्षणों का भेद है तो उन २ विशेषादि लक्ष्यों में ही उन २ लक्षणों से व्यवहार क्यों होता है अन्यत्र व्यवहार क्यों नहीं होता है । यदि कहें, कि लक्ष्य में लक्षण का सम्बन्ध, व्यवहार का नियामक है, तो सम्बन्ध का भी

क्रियतां नान्यत्र । सम्बन्धो नियामक इति चेन्न, सम्बन्धस्यापि सम्बन्धान्तरेण नियामकत्वेऽनवस्थापातात् । अन्यथा त्वनियमात् ॥ ८६ ॥

तदनिरुक्तेश्च तथाहि कः सम्बन्धशब्दार्थः ? समवायादय इति चेत्, सत्यं किन्तु केन निमित्तेनेति हि प्रश्नवाक्यतात्पर्य्यं प्रतिस्वं व्यावृत्तेन संयोगत्वादिनाऽन्येन वा । आद्ये, अनुगतव्यवहारानुपपत्तिप्रसङ्गः, अस्ति चासाविन्द्रियार्थसन्निकर्षोत्पन्नादिमत्यत्तं नित्यप्राप्तिः समवाय इत्यादि । न द्वितीयः, तस्यैकस्यासम्भवात् ॥९०॥

नियामकत्वं तदिति चेन्न, स्वभावस्यापि भवता नियामकत्वाङ्गीकारात् । तथाविधः सोऽपि सम्बन्ध एवेति चेन्न, त्वया सर्वस्वभावनियन्तृताया अवश्याभ्युपगन्तव्यत्वेन नियामकनिरुक्तिलभ्यसत्त्वादधिकांशासामर्थ्यापत्तेः । नियम्यस्य च स्वस्यानतिप्रसङ्गेन नियामकत्ववाचोयुक्त्यनुपपत्तेः, अतिप्रसक्तत्वे च तस्यैव नियामकत्वादति-

---

नियामक यदि अन्य सम्बन्ध मानें, तो अनवस्था हो जायगी, और यदि अन्य सम्बन्ध को सम्बन्ध का नियमक न मानें तो सम्बन्ध का नियम नहीं होगा ॥ ८९ ॥

॥ इति विशेषलक्षण-खण्डनानुवाद ॥

❀ अथ सम्बन्ध लक्षण खण्डनानुवाद ❀

किञ्च सम्बन्ध की निरुक्ति भी नहीं हो सकती है। कहिये—सम्बन्धशब्द का क्या अर्थ है, निरुक्ति न होने से अनिर्वचनीय है, यदि कहें, कि समवायआदि सम्बन्ध है, तो सत्य है परन्तु किसरूप से—यह प्रश्न वाक्य का तात्पर्य्य है। क्या प्रतिसम्बन्ध में व्यावृत्त संयोगत्वादिरूप से, अथवा सम्बन्धमात्र में विद्यमान किसी अन्यरूप से। इनमें प्रथम पक्ष में सम्बन्धमात्र में अनुगत सम्बन्ध व्यवहार की उपपत्ति नहीं होगी और "इन्द्रियार्थसन्निकर्षोत्पन्नम् प्रत्यक्षम्" इस सूत्र में सम्बन्धवाचक सन्निकर्षशब्द से संयोग समवाय दोनों के ग्रहण से तथा "नित्या प्राप्तिः समवायः" यहाँ सम्बन्धार्थक प्राप्ति पदसे सम्बन्धमात्र के अभिधान से अनुगत व्यवहार देखा जाता है।

द्वितीय पक्ष भी युक्त नहीं है, कारण कि सम्बन्ध मात्र में अनुगत एक रूप का सम्भव नहीं है ॥ ९० ॥

समर्थन—नियम के जनक अर्थात् अतिप्रसङ्ग की निवृत्ति का जनक सम्बन्ध है।

खण्डन—अभाव समवाय आदि की विशिष्ट-बुद्धि में स्वरूप को भी नियामक आप मानते ही हैं, और वह सम्बन्ध है नहीं, अतः वहाँ अतिव्याप्ति हो जायगी।

समर्थन—नियम का जनक स्वरूप भी सम्बन्ध ही है, अतः वहां लक्षण का जाना भूषण ही है दूषण नहीं।

खण्डन—आप स्वरूपमात्र को सम्बन्ध अवश्य मानेंगे, अतः नियामक पदार्थ के नियतपूर्वसत्वरूप निरुक्ति को घटक सत्व ही सम्बन्ध का लक्षण रहे, सत्व से अधिक अंश व्यर्थ है। किञ्च स्वरूप अनतिप्रसक्त नियम्य का नियामक हो नहीं सकता, कारण कि जो स्वयं अनतिप्रसक्त है उसका अतिप्रसक्ति निवारणरूप निमयन हो नहीं सकता। और

प्रसक्तेन नियमायोगात् भूत्वा नियमकरणे च प्रागनियतत्त्वापत्तेः, एवमन्येनापि जन्य-नियमे, अन्यदपि हि यदि पूर्वं घटादिरूपेणानियतमेव घटादि करोति, तदा पटाद्यपि तथा कुर्य्यात् ॥६१॥

न घटादित्वे नियन्तृत्वमन्यस्य किन्तु घटादेः कालविशेषयोग इति चेन्न, यदि नासौ घटादिकालविशेषयोगिता नियतमिष्यते तदा पटादिकालविशेषयोगमपि तथा कुर्य्यात् । तस्मात्—यदि कुर्यादसत्कालानियतं नियतं परः ।

तत्स्यादतिप्रसक्तत्वमन्यथा चानियन्तृतेति ॥४॥

कार्य्यकारणयोः कालभेदान्नियम्यनियामकत्वोपगमे उत्तरोत्तरेण पूर्वपूर्वनियमः किन्नस्यादित्यविनिगम्यत्वापत्तिः ।

प्राचोत्तरस्य नियमे प्राच एव न तेन किम् ।
अनाद्यनन्तयो नैवं विनिगन्ता प्रवाहयोरिति ॥५॥

यदि नियम्य अतिप्रसक्त है, तो वही नियामक भी है, अतः अतिप्रसक्तस्वरूप, नियमन कर नहीं सकता, कारण कि अतिप्रसङ्ग का निवारण ही नियमन है ।

किञ्च जो नियामक है वह उत्पन्न हो कर नियमन करता है, या अनुत्पन्न ही नियमन करता है। यदि कहैं कि उत्पन्न हो कर नियामक है, तो आपही नियम्य भी है और नियामक भी है अतः उत्पत्ति से प्राक् आप अनियत हो जायगा और यदि उत्पत्ति से प्राक् अनियत मानें, तो उत्पत्ति से उत्तर भी अनियत हो जायगा । इसी प्रकार से अन्य कारणादि से कार्य्य के नियम में दोष जानना चाहिये । देखिये—अन्यद्दण्डादि यदि घटादिरूप कार्य्य से पूर्वकाल में असत् घटादि का नियमन करता है, तो पटादि का भी नियमन क्यों न करे ॥ ६१ ॥

समर्थन—दण्डादि कारण, घटादि कार्य्य का नियामक नहीं है किन्तु काल के सम्बन्ध का नियामक है ।

खण्डन—दण्डादि, घटादि, सम्बन्धी काल के सम्बन्ध का नियमन यदि करता हो, तो घट का ही नियमन लब्ध हुआ, अतः पूर्व उक्त दोष का प्रसङ्ग हो जायगा । और यदि घटका अनन्तर्भाव कर केवल काल के सम्बन्धमात्र का नियम करता हो, तो पट के काल के सम्बन्ध का भी नियमन का प्रसङ्ग हो जायगा । यदि दण्डादि असत्-काल से अनियत घटादि को नियत करता हो, तो अतिप्रसङ्ग हो जायगा । अर्थात् दण्ड पट का भी नियामक हो जायगा । यदि सत् घट का ही नियमन करता है, तो घट के सत् होने से दण्ड नियामक ही नहीं होगा—

किञ्च, कारण यदि भिन्न काल में होने पर भी कार्य्यका नियामक है, तो जैसे पूर्व कारण से उत्तर कार्य्य का नियमन होता है ऐसे ही उत्तर कार्य्य से पूर्व कारण का नियम क्यों न हो ।

समर्थन—नियम में पूर्व अपर भाव नियामक है । पूर्व नियामक होता है और उत्तर नियम्य होता है ।

खण्डन—कार्य्य और कारण का प्रवाह अनादि है अतः किसी . कारण से पूर्व कार्य्य के होने से कारण पूर्व ही है कार्य्य उत्तर ही है ऐसा नियम नहीं पूर्व से उत्तर का जैसे नियमन होता है वैसे ही उत्तर से पूर्व का नियमन क्यों न हो, कार्य्य कारण के अनादि

भूला च करणे व्याघातात् ॥६२॥

सम्बन्धिनश्चाधारत्वात् सम्बन्धस्याधेयत्वात् तस्यैव तदाधारत्वानुपपत्तेः। नहि सुशिक्षितोऽपि नटवटुः स्वस्कन्धमारुह्य नृत्यति। नाप्यन्यस्यासौ सम्बन्धस्त्वयैव तथाऽनभ्युपगमात्। स्वभावादेवायमीदृश इति हि स्वभाववादः तत्र परस्य नियमनाभावात्, कथं परः सम्बन्धी सङ्गच्छते।

यच्च किञ्चित्सम्बन्धत्वमभिधीयते तत्समवायेऽपि स्वीकार्य्यम्, नच समवायाधारत्वं द्रव्यादिषट्कस्य सम्भवति। नचोपाधिभावात् स्यात्, संयोगसमवायासम्भवात्। स्वभावसम्बन्धस्य च निरस्तत्वात्। नचासावभावोऽपि प्रतिषेध्यप्रतियोगिभावभेदाभिधानप्रसङ्गात्। सप्तपदार्थीपरिसमाप्तश्च जगत् परस्परविरोधेन तल्लक्षणव्यवस्थापनादिति। यदपि नियम्यात् भिन्नं नियामकं तदपि कथं तदेव नियमयति नान्यदिति। तदाधारत्वादितिचेत्, कः पुनराधारार्थः ॥ ६३ ॥

अनन्त प्रवाह होने से कारण पूर्व ही है, कार्य्य उत्तर ही है, इसमें कोई विनिगमक नहीं है। यदि कहें, कि असत् कारण नियामक है, तो व्याघात हो जायगा, कारण कि नियम से पूर्व सत् को नियामक कहते हैं ॥ ६२ ॥

किञ्च सम्बन्धी आधार होता है और सम्बन्ध आधेय होता है। और यदि स्वरूप को सम्बन्ध मानें, तो स्वको स्वका आधार मानना पड़ेगा वह अयुक्त है, कारण कि सुशिक्षित भी नट का बालक स्वस्कन्ध पर आरूढ़ होकर नृत्य नहीं कर सकता। और अन्य का स्वरूप अन्य का सम्बन्ध नहीं है, कारण कि आप ऐसा नहीं मानते हैं। स्वरूप से ही अभावादि नियमित हैं—यह आपका स्वभाववाद है उस वाद में पर के नियमन न होने से अन्य सम्बन्धी कैसे होगा।

किञ्च आप सम्बन्ध का लक्षण जो कुछ भी करेंगे उस लक्षण का स्वत्व समवाय में भी अवश्य मानेंगे। और द्रव्यादि छवों में कोई भी समवाय मे नहीं रहता है। अर्थात् आप सम्बन्ध के लक्षण को द्रव्यादि षड्पदार्थ में अन्तर्भूत ही मानेंगे और उनमें से कोई भी समवाय में रहता नहीं है।

यदि कहें, कि प्रमेयत्व के तुल्य उपाधि ही सम्बन्ध का लक्षण है और वह समवाय में रहता है, तो उस लक्षण का भी संयोग अथवा समवायरूप सम्बन्ध समवाय में अवश्य मानना पड़ेगा। और वह समवाय में है नहीं और स्वरूप के सम्बन्धत्व का निरास कर ही चुके हैं। और सम्बन्ध का लक्षण अभावरूप भी नहीं है, कारण कि यदि लक्षण को अभावरूप मानें, तो प्रतिषेध्य भावरूप प्रतियोगी का कथन करना पड़ेगा। और सप्त पदार्थ में ही पदार्थ मात्र का अन्तर्भाव है। तथा ये सप्त पदार्थ परस्पर विलक्षण हैं। जो नियम्य से भिन्न नियामक सम्बन्ध है वह भी कैसे उसी का नियमन करता है, अन्य का नियमन क्यों नहीं करता है। यदि कहें, कि उसका आधार होने से उसी का नियमन करता है, तो आधार क्या वस्तु है। अर्थात् लक्षण न होने से आधार अनिर्वचनीय है फिर उससे अन्य का नियम कैसे होगा ॥ ६३ ॥

॥ इति सम्बन्ध-खण्डनानुवाद ॥

यत्र स्थीयते तदिति चेन्न, यत्रेति सप्तम्यर्थस्यापि विवेचनीयत्वात्। इहेति प्रत्ययविषय इति चेन्न, तत्रेति प्रत्ययविषयस्यानाधारत्वप्रसङ्गात्। किञ्च प्रत्ययविशेषावगमो विषयविशेषावगमात्। विषयविशेषावगमश्च प्रत्ययविशेषावगमादिति व्यक्तमन्योन्याश्रयः। समवायीति चेत्, शशे शृङ्गाभावः कुण्डे बदरमित्याद्यव्याप्तेः। गौणस्तत्र प्रयोग इति चेत्, नैतावन्मात्रं प्रत्ययश्च भ्रान्त इत्यपि वक्तव्यमवशिष्यते भवतः। ओमितिचेत्, अथ विपरीतमेव कुतो न स्यात्। शशे विषाणं नास्तीति च यदि विशेषणाभावाधिकरणत्वप्रतीतिर्भ्रान्ता शृङ्गस्य तर्हि शशोऽधिकरणं स्यात्। भावाभावयोरन्यतरनिषेधस्यान्यतरविधिपर्यवसायित्वेनाभ्युपगमात् ॥६४॥

पतनप्रतिबन्धकमधिकरणमिति चेन्न, अवयविनं गुणादिकञ्च प्रति तदभावात्। अव्यवहिताधःस्थितमिति चेन्न, गुणाद्यपेक्षया गुणवदादेरधःस्थितत्वे प्रमाणाभावात्। अविशेषेण वाऽवयविगुणादीनामवयवाधारत्वप्रसङ्गात्। ऊर्ध्वस्थितस्य संयोगिनः संयोगं प्रति च तदभावात्। सूत्रालम्बितद्रव्यादौ बहुलं व्यभिचारात्।

॥ अथ आधार लक्षण खण्डनानुवाद ॥

निर्वचन—वस्तु जिसमें स्थित होती हो, वह आधार है।

खण्डन—"में" इस सप्तमी का क्या अर्थ है उसका विचार करना चाहिये।

समर्थन—"इह" इत्याकारक ज्ञान का विषय सप्तम्यर्थ है।

खण्डन—"तत्र" इस ज्ञान का विषय सप्तम्यर्थ (आधार) नहीं कहावेगा।

किञ्च ज्ञानविशेष का ज्ञान अर्थात् यह ज्ञान भ्रम है, यह प्रमा है—ऐसा निश्चय विषयविशेष के निश्चय से—होता है। और आप के मत में विषयविशेष (अधार) का निश्चय होगा ज्ञानविशेष (प्रमा) से, अतः अन्योन्याश्रय हो जायगा।

समर्थन—समवायी (समवाय युक्त) आधार है।

खण्डन—"शशे शृङ्गाभावः" "कुण्डे बदराभावः" इत्यादि स्थल में लक्षण की अव्याप्ति हो जायगी यदि कहें, कि यह प्रयोग गौण है, तो इतना ही नहीं कहना चाहिये किन्तु यह भी कहना चाहिये कि—यह ज्ञान भी भ्रम है। प्रतीति को भ्रम मानलें, तो विपरीत ही क्यों न मानें अर्थात् "घटे घटत्वम्" इस प्रतीति को भ्रम तथा शशे शृङ्गाभावः—इस को प्रमा क्यों न मानें, किञ्च यदि "शशे शृङ्गाभावः" इस प्रतीति को भ्रम मानें, तो शशे शृङ्गम्" यह प्रमा हो जायगी। कारण कि भाव अभाव दोनों में एक का निषेध अन्य के विधि में पर्य्यवसित होता है॥ ६४॥

समर्थन—पतन का प्रतिबन्धक अधिकरण है॥

खण्डन—अवयवी के पतन का प्रतिबंधक अवयव तथा गुण के पतन का प्रतिबन्धक गुणी नहीं होता है अतः उनके वे अधिकरण नहीं होंगे॥

समर्थन—अव्यवहित (व्यवधान से रहित) जो अधः स्थित हों वह आधार है।

खण्डन—गुण तथा अवयवी की अपेक्षा से गुणी तथा अवयव अधःस्थित हैं—इस में कुछ प्रमाण नहीं। किञ्च विशेष न होने से अवयवी के गुण का अवयव आधार हो जायगा।

यद्येकोऽधिकरणार्थो नोपपद्यते तर्ह्यक्षशब्दार्थवद्भिन्न एवास्त्विति चेत्, आश्रयासिद्ध्यादेर्भेदप्रसङ्गात्। सोऽपि स्वीकार्य्य इति चेन्न, असिद्ध्यादिविधापरिगणनस्य व्यवहारतोऽन्यथाभावप्रसङ्गात्। क्वचिदाश्रयस्य समवायित्वात् क्वचिच्चाभावं समवायञ्च हेतुं प्रति तदसम्भवात्। एकस्य च तेषामुपसङ्ग्राहकस्य वक्तुमशक्यत्वात् ॥९५॥

बहव एवाश्रयशब्दार्थाः आश्रयासिद्ध्यादयोऽपि पृथक्पृथगेव बहवः असिद्धभेदपरिगणनग्रन्थोऽप्यन्यथाकारं बोद्धव्यो बाधदर्शनादिति चेन्न, तथापीह कुण्डे बदरमित्यत्र क आधारार्थ इति वक्तव्यम्, न तावत्पतनप्रतिबन्धकत्वं सहैव कुण्डेन पतति बदरे तदसम्भवात्। नापि संयोगित्वं वैपरीत्यस्यापि प्रसङ्गात्। संयोगित्वे सत्यधःस्थितत्वं तत्राधिकरणार्थ इति चेन्न, तस्मिन् सत्यप्यन्यत्र चरणतलमिलितधूलीपटलादावधिकरणप्रतीत्यनुपपत्त्या प्रत्युत चरणतले धूलीत्येव प्रतीत्याऽऽधारत्वप्रतीतौ व्यभिचारित्वेन प्रकृतेऽपि तथास्वीकाराऽनुपपत्तेः। न सार्वत्रिकोऽयमाधारार्थः किन्तु काचित्को

किञ्च ऊर्ध्वस्थित घटादि, भूतलघट संयोग का आधार न कहावेगा,। किञ्च सूत्रआदि में अवलम्बित गेन्दुक आदि का सूत्रादि आधार नहीं कहावेंगे,

समर्थन—यदि अधिकरण शब्द का एक अर्थ उपपन्न नहीं होता है, तो अक्षशब्द के तुल्य अनेकार्थ ही अधिकरण शब्द रहे, हानि क्या है।

खण्डन—आश्रयासिद्धिआदि का भेद हो जायगा। और यदि आश्रयासिद्धि के भेद को मानलें, तो व्यवहार का हेतु जो असिद्धि, वह आश्रयासिद्धि आदि भेद से त्रिप्रकार है—यह गणना असङ्गत हो जायगी। कारण कि "इदं द्रव्यं कर्म्मणः" यहाँ आश्रय समवायीरूप है। "शब्दो नित्यः अकृतकत्वात्" तथा पृथवी इतरभिन्ना गुणसमवात्, यहाँ आश्रय को ही अन्यरूप होने से आश्रय एक रूप न रहा। और सब आधारों का उपसंग्राहक एक रूप नहीं रहा ॥९५॥

समर्थन—आश्रय शब्द के बहुत अर्थ हैं। और आश्रयासिद्धि भी पृथक् २ बहुत ही हैं। तथा असिद्धिभेद की गणना भी आधार की निरुक्ति में उक्तबाध होने से स्वरूपासिद्धि व्याप्यत्वासिद्धि से अन्य असिद्धि आश्रयासिद्धि है—ऐसाही जानना चाहिये।

खण्डन—तब भी "इह कुण्डे बदरम्" यहाँ आधार शब्द का क्या अर्थ है यह वक्तव्य है। किञ्च कुण्डकेसाथही बदर जहाँ गिरते हैं, वहाँ बदर का कुण्ड अधिकरण न कहावेगा। संयोगित्व भी आधार नहीं है, कारण कि कुण्ड का संयोग बदर में भी है अतः बदर भी कुण्ड का आधार हो जायगा।

समर्थन—संयोगी होकर जो अधःस्थित हो वह आधार है।

खण्डन—ऐसा लक्षण करने से "कुण्डे बदरम्" यहाँ निर्वाह होने पर भी चरणतल में मिलित धूलिपटल में अव्याप्ति हो जायगी "धूलिपटले चरणतलम्" ऐसा व्यवहार नहीं होता किन्तु इससे विपरीत" चरणतलेधूलिः "ऐसाही व्यवहार होता है अतः यह लक्षण युक्त नहीं है।

समर्थन—यह आधार का लक्षण सार्वत्रिक नहीं है, किंतु कादाचित्क है। और नानारूप आधार है।

नानारूपाधारत्ववादिपक्ष इति चेन्न, भवत्वन्यत्रान्यस्याधारार्थत्वं तस्य त्वाधारार्थत्वं नोपपद्यतेऽनाधारप्रतीतिविषयेऽपि सत्वादित्युक्तेः। आधेयापेक्षया महत्परिमाणत्वे सतीति चेन्न, करतलस्थिततूलराश्यादौ तदसम्भवात् अन्यस्य च वक्तुं तत्राधारार्थस्याशक्यत्वात् ॥९६॥

अधःशब्दार्थस्य च वक्तुमशक्यत्वात्। पतनाभिमुखदिग्स्थितत्वमिति चेन्न। पतनार्थस्य गमनाधिकस्याधः शब्दार्थव्यतिरेकेण निर्वक्तुमशक्यत्वात्। अत एवाधःशब्दार्थस्य दुर्वचत्वमधिगम्याद्वैतवादिना गुरुणा शिष्याय खण्डनमुपाचक्षाणेन भगवता पराशरेणाभिहितम्—"अधः शब्दनिगद्यं किं किञ्चोर्ध्वमभिधीयते"।

पृथिव्यभिमुखी दिगधःशब्दार्थ इति चेन्न, ऊर्ध्वशब्दार्थस्यापि पृथिव्यभिमुखत्वसम्भवात्। यदपेक्षया पृथिव्यभिमुखी या दिक् तदपेक्षया साऽध इति चेन्न, यदपेक्षयेति किं यमवधीकृत्येति विवक्षितम्, उत यदीयाभिमुख्यव्यवस्थितेति। आद्ये, पृथिव्यूर्द्ध्वस्थितं पदार्थमवधीकृत्य योर्द्ध्व दिगिति भवद्भिर्व्यवह्रियते सापि पृथिव्यभिमुखी भवतीति साप्यधः स्यात्। अत एव न द्वितीयोऽपि ॥९७॥

खण्डन—अन्यत्र अन्य आधार का अर्थ हो परन्तु वह युक्त नहीं है, कारण कि अनाधार में गत होने से—यह हम कहते हैं।

समर्थन—आधेय की अपेक्षा से जो महत्परिणाम होकर अधःस्थित संयोगी हो वह अधार है, चरणतल मिलितधूल में महत्परिणाम नहीं है, अतः अतिव्याप्ति नहीं।

खण्डन—करतल में स्थित तूल राशि में अव्याप्ति हो जायगी, कारण कि तूल राशि की अपेक्षा से करतल में महत्परिमाण नहीं है, और अन्य प्रकार का आधारत्व तूल राशि का करतल में हो नहीं सकता ॥ ९६ ॥

समर्थन—पतन के अभिमुख दिशा में जो अवस्थित हो वह आधार है।

खण्डन—यावत् अधःशब्द के अर्थ का निर्वचन न हो, तावत् गमन से अधिक पतनार्थ हो नहीं सकता है। और अधःशब्द के अर्थ का निर्वचन हो नहीं सकता है। अधःशब्दार्थ के दुर्वचत्व को जान कर ही अद्वैत वादी गुरु ऋभु ने शिष्य निदाघ को जो खण्डन का उपदेश किया था उसके अनुवादकर्ता पराशर मुनि ने कहा है कि अधःशब्द का क्या अर्थ है और ऊर्द्ध्वशब्द का क्या अर्थ है, कुछ नहीं, अर्थात् अधः ऊर्ध्व शब्दार्थ अनिर्वनीय हैं।

समर्थन—पृथिवी के अभिमुख दिशा, अधःशब्द का अर्थ है।

खण्डन—उर्द्ध्व शब्द का अर्थ भी पृथिवी के अभिमुख दिशा ही है अतः उसमें अतिव्याप्ति हो जायगी।

समर्थन—जिस मार्तण्डमण्डलादि की आपेक्षा से पृथिवी के अभिमुख जो दिशा हो उसकी आपेक्षा से वह दिशा अधःशब्द का अर्थ है।

खण्डन—यहां अपेक्षाशब्द का क्या अर्थ है, अवधि अर्थ है या अभिमुख अर्थ है, प्रथम पक्ष में पृथिवी के अभिमुख में स्थित है तथा उसमें मार्तण्डमण्डल अवधि भी है। द्वितीय पक्ष में भी मार्तण्डमण्डल से ऊर्द्ध्व देश अधः कहा जायगा, कारण कि उसमें पृथ्वी का जैसे आभिमुख्य है वैसे ही मार्तण्डमण्डल का भी आभिमुख्य है ॥ ९७ ॥

यस्यां दिशि क्रियया पृथ्वी सन्निहिता भवति सा दिगध इति चेन्न, कूपादौ मध्यगतस्य तिर्य्यग्दोलायमानस्य क्रिया पतनं स्यात् तद्गत्याक्रान्ता च तिर्य्यग्दिगधः स्यात्। पृथिवीमवधीकृत्य यं चान्यं पदार्थं अवधीकृत्य यो मध्य इति देशो व्यवह्रियते स पृथिव्यतिरिक्ततदवध्यपेक्षया ऽध इति चेन्न, पृथिव्यामेव तद्व्यवहारापत्तेः। पृथिवीं, पदार्थान्तरञ्चापेक्ष्य मध्यत्वस्य विवक्षितस्याधःशब्दार्थप्रदर्शनमन्तरेण निर्वक्तुमशक्यत्वात्। पृथिव्यपेक्षयोर्ध्वं परापेक्षया चाधः तत्र तयोर्मध्यमित्येवं निरुच्यते मध्यत्वम् अन्यथा तिर्य्यगपि प्रसङ्गात् तद्यथा–पृथिव्यपेक्षया पूर्वमपरापेक्षया च पश्चिमं तयोर्मध्यमुच्यते प्रतीपदिगवस्थितयोः परस्परापेक्षया प्रतीपदिक्सङ्करे मध्यव्यवहारात् ॥६८॥

अथान्यः कश्चिदाधारार्थोऽस्तु प्रतीतिसिद्धत्वात्प्रतीतेश्चैवमनन्योपपाद्यत्वात्। मैवम्। तदनित्यं वा स्यात् नित्यं वा। नाद्यः, तदभावे आधारप्रतीत्यभावप्रसङ्गात् गोत्वादिनित्यत्वन्यायसाम्येऽपि अस्यानित्यत्वे तेषामप्यनित्यत्वापाताच्च। नापि द्विती-

---

समर्थन—जिस दिशा में क्रिया से पृथिवी सन्निहित हो वह दिशा अधःशब्दार्थ है।

खण्डन—कूपादि के मध्य गत टेढ़ा दोलायमान जो घण्टादि उसकी क्रिया, पतन हो जायगी। और उसकी क्रिया से सन्निहित तिर्य्यग् अधः हो जायगा।

समर्थन—पृथिवी को अवधि कर तथा अन्य पदार्थ को अवधि कर जो मध्यदेश कहा जाता है वह देश पृथिवी से इतर अवधि की अपेक्षा से अधःशब्द का अर्थ है।

खण्डन—पृथिवी में मध्य व्यवहार नहीं होगा, कारण कि पृथिवी और इतर अवधि की अपेक्षा से पृथिवी मध्य देश नहीं है, अतः पृथिवी उस अवधि की अपेक्षा से अधः नहीं कहावेगी। किञ्च पृथिवी और पदार्थान्तर की अपेक्षा से विवक्षित मध्यत्व का लक्षण अधः-शब्द के निर्वचन के बिना हो नहीं सकता। पृथिवी की अपेक्षा से ऊर्ध्व और अन्य अवधि से अधः दोनों की अपेक्षा से मध्य है यही वक्तुं इष्ट मध्यत्व का लक्षण है। अतः मध्य से अधः का और अधः से मध्य का लक्षण होने से अन्योन्याश्रय हो जायगा। यदि अधःशब्द से घटित विवक्षित मध्य काल लक्षण न करें, तो तिर्य्यग् देश भी मध्य कहा जावेगा। देखिये-ऊर्ध्व पृथिवी देश की अपेक्षा से पूर्व और इतर अवधि की अपेक्षा से पश्चिम उन दोनों की अपेक्षा से मध्य है, कारण कि विरुद्ध दो दिशाओं में स्थित दो पदार्थों के परस्पर की अपेक्षा से विरुद्ध दिशायों का सङ्कर (पूर्व पश्चिमरूप) ही मध्य है। और इसी को यदि विवक्षित मध्य कहें, तो इतर अवधि की अपेक्षा से तिर्य्यग् देशरूप जो मध्य देश है वह भी अधः कहा जायगा ॥ ६८ ॥

समर्थन—"इह" इत्याकारक प्रतीति, आधार के कल्पन के बिना अनुपपन्न है अतः उक्त प्रतीति की अन्यथा अनुपपत्ति से ही आधार का कल्पन करेंगे। वह आधार किंरूप है इस निर्णय से कुछ प्रयोजन नहीं।

खण्डन—उस आधारत्व को अनित्य मानेगें अथवा नित्य इनमें प्रथम कल्प युक्त नहीं है, कारण कि यदि अनित्य मानें, तो कदाचित् उसके अभाव को अवश्य मानना पड़ेगा। अतः आधारत्व के अभाव काल में आधार की प्रतीति नहीं होगी। और आधार की प्रतीति

यः, तादृशमप्यनुगतमननुगतं वा स्यात्। द्वितीयेऽनुगताधारप्रतीत्यसम्भवः सङ्केतग्रहाशक्यत्वञ्च प्रथमे सामान्यवदाश्रयापरित्यागि वा स्यात् तत्त्यागि वा। आद्ये यदेव तदाधारतया प्रतीतं तत्तदाधेयं न स्यात् । द्वितीयेऽपि च यदि नियामकमन्तरेण तत्स्वाश्रयं भजति त्यजति च तदा नियमानुपपत्त्या सर्वदा तद्भजनत्यजनोचितप्रत्ययव्यवहारप्रसङ्गः ॥६६॥

अथ तस्याश्रयभजनत्यजनयोर्नियामकोऽस्ति तर्हि स वक्तव्यः । सोऽपि कल्पयिष्यतेऽन्यथाऽऽधारप्रतीत्यनुपपत्तिरिति चेन्न, तत्परिकल्पने यदेव भजने नियामकं स एवाधारार्थोऽस्तु कृतं पूर्वपरिकल्पितेनेति । अस्त्वेवमेवेति चेन्न, तस्यापि स्वाश्रयभजनत्यजननियामकस्याऽवश्यवाच्यत्वे तस्यापि चैवं वैयर्थ्यमित्यधिकापरिकल्पने नियमानुपपत्तिः । अधिकपरिकल्पने च पूर्वपूर्ववैयर्थ्यप्रसङ्ग इति गुरुतरं व्यसनमापद्येत । परस्परेण परस्परस्य नियामकत्वमिति चेत्, अन्योन्याश्रयिणावर्थावपि परस्प-

---

सर्वदा होती है। किञ्च गोत्वादि जाति के नित्यत्व के साधक युक्तियों के तुल्य होने पर भी यदि आधारत्व को अनित्य मानें, तो गोत्वादि जाति भी अनित्य हो जायगी।

द्वितीय कल्प में भी आधारत्व अनुगत है वा अननुगत है, द्वितीय पक्ष में आधारमात्र में अनुगत एक धर्म न होने से अनुगत आधार की प्रतीति नहीं होगी और संङ्केत (शब्दार्थ सम्बन्ध) का ग्रह भी नहीं होगा। प्रथम पक्ष में आधारत्व सामान्य के तुल्य आश्रय का अपरित्यागी है वा परित्यागी। आद्य पक्ष में जो जिस काल में आधारत्वरूपसे प्रतीत होता है वही उसी काल में आधेयत्वरूप से प्रतीत नहीं होगा। द्वितीय पक्ष में यदि नियामक के विना ही वह आधारत्व, आधार को त्यागता भी है और ग्रहण भी करता है, तो सर्वदा प्राप्ति त्याग को उचित प्रतीति वा व्यवहार होना चाहिये। अर्थात् सर्वदा "आधारः न आधारः" दोनों व्यवहार वा प्रतीति हो जायगी ॥ ६६ ॥

समर्थन—उस आधारत्व के आश्रय के प्राप्तित्याग में नियामक हैं।

खण्डन—तो उस नियामक को कहिये। यदि कहें कि आधारत्व की प्रतीति की अन्यथानुपपत्ति से कल्पना करेंगे, तो जो प्राप्तित्याग में नियामक है, वही आधारत्व रहे। पूर्व कल्पित आधारत्व व्यर्थ है। यदि कहें कि ऐसा ही रहे, तो उसके भी आश्रय के प्राप्तित्याग में नियामक अवश्य वक्तव्य होने पर पूर्वोक्त प्रकारसे पूर्व नियामक व्यर्थ है। इस प्रकार अधिक २ नियामक की कल्पना न करें, तो नियम नहीं होगा। और यदि अधिक नियामक की कल्पना करें, तो पूर्व नियामक व्यर्थ हो जायगा। इस प्रकार से अनिवार्य्य दुःख परम्परा प्राप्त हो जायगी।

समर्थन—पूर्व नियामक से उत्तर का और उत्तर नियामक से पूर्व का नियम न होगा अतः न तो अनियमन है और न उत्तर २ से पूर्व २ का वैयर्थ्य है।

खण्डन—यदि उत्तर स्वयँ पूर्व से नियमित हो ले, तो पूर्व का नियम करे, और पूर्व भी उत्तर से स्वयम् नियमित हो ले, तो उत्तर का नियमन करे इस प्रकार से अन्योन्याश्रय हो जायगा। उस अन्योन्याश्रय का निवारण कर आप आधारत्व को स्वस्थित करें अनन्तर हम उत्तर देंगे।

राकर्षकभावव्यवस्थया सुस्थीकुरु ततो दास्यामस्तत्रोत्तरम्। जात्यादयोऽपि तर्ह्येवमनुपपन्ना इति चेन्नोच्चैर्वक्तव्यं यदि कोऽपि शृणोति तदा महदनिष्टमस्माकं प्रकाशीकृतं स्यात् ॥१००॥

किञ्च यत्तदाधारत्वं तत् साधारमनाधारं वा। अन्त्ये, क्व स्वविशिष्टप्रत्ययं कुर्य्यात् विशेषाभावात्। आद्ये, तदाधारत्वं वाच्यम्। स्वरूपमेव तादृशं तस्य येन स्वयं सत्ता स्वात्मनि सत्ताप्रत्ययकारिणी सत्तान्तरमन्तरेण यथा तथेदमपि विनैवाधारान्तरमाधारप्रत्ययकारीति चेन्न, भ्रान्तित्वप्रसङ्गात्। यथा विना रजतत्वं तत्प्रत्ययो भ्रान्तिस्तथैव स्यात् उपपाद्यश्चायमर्थो भेदखण्डनप्रस्ताव इत्युपरम्यते। विनाऽप्याधाराधेयभावं स्वभावसम्बन्धेन नियामकत्वं भविष्यति यथा विषयविषयिभावेनार्थज्ञानयोरिति चेन्न, स्वभावसम्बन्धस्य निरस्तत्वात्। यत्तुदाहरसि च विषयविषयिभावं सोऽपि वक्तुं न शक्यते ॥ १ ॥

समर्थन—जाति आदि के भी आश्रय के प्राप्ति त्याग में किसी नियामक की कल्पना करें, तो जाति आदि उक्त प्रकार से व्यर्थ हैं। और यदि नियामक की कल्पना न करें, तो उस व्यक्ति से अन्यत्र भी उस जाति का व्यवहार हो जायगा।

खण्डन—उच्च स्वर से न कहिये। यदि कोई अन्य मत वाला यह सुनेगा तो हम वैदिकों का महान् उपहास होगा। अर्थात् पदार्थमात्र के अनिर्वचनीयत्व वादी के मत में जाति का खण्डन भी इष्ट ही है। अतः इसी युक्ति से जाति का भी खण्डन है ॥ १०० ॥

किञ्च जो वह आधारत्व है वह साधार है अथवा आधार रहित है यदि उसको आधार रहित मानें, तो आधारत्व की प्रतीति कहाँ होगी, कारण कि आधारत्व विशिष्टरूप विशेष नहीं है। और यदि आधारत्व का आधार को मानें, तो आधारत्वरूप जो आधेय उसके आधारत्व को कहना चाहिये अर्थात् आधारत्व का आधारत्व उसका आधारत्व इस रीति अनवस्था होने से आधारत्व को साधार नहीं मान सकते।

समर्थन—आधारत्व का स्वरूप ही वैसा है जिससे जैसे सत्ता, अन्य सत्ताके विनाही स्व में सत्ता प्रतीति का कारण है वैसाही आधारत्व भी अन्य आधारत्व के विना ही स्व में आधारत्व व्यवहार का कारण है।

खण्डन—आधार प्रतीति भ्रान्ति हो जायगी। अर्थात् जैसे विना रजतत्व का ज्ञान भ्रम है वैसेही आधारत्व के विना आधारत्व का ज्ञान भ्रम हो जायगा।

इसका उपपादन भेद खण्डन में हम करेंगे।

समर्थन—आधारत्व के साथ आधाराधेय भाव न होने पर भी स्वरूप परसम्बन्ध से नियामक होगा। जैसे अर्थ—ज्ञान का विषयविषयीभाव से—नियमन करता है।

खण्डन—स्वरूप ,सम्बन्ध का खण्डन हो चुका है। और जिस- विषयविषयीभाव का कथन करते हैं। उसका भी उपपादन आप नहीं कर सकते। कहिये ज्ञानादि का पटादि के साथ विषयविषयीभाव क्या वस्तु है। अर्थात् लक्षण न होने से अनिर्वचनीय है ॥ १ ॥

॥ इति आधारलक्षणखण्डनानुवाद ॥

यथाहि कः पुनर्ज्ञानादेर्घटादिना विषयविषयिभावः । प्रकाशस्य सतस्तदीयतामात्ररूपः स्वभावविशेष इति चेन्न, इच्छादिविषयाव्यापनात् । विषयिण इति चेन्न, तत्त्वस्यैव निरूप्यमाणत्वात् ।

किञ्च स्वभावः स्वधर्मो वा स्वात्मा वा तस्य विवक्षितः । आद्ये ज्ञानत्वादिकं वा साधारणमसौ तत्तद्घटज्ञाननियतो वा कश्चित् । आद्ये साधारण्यान्न विशेषतस्तदीयतामात्ररूपत्वसम्भवः । द्वितीये तु प्रतिविषयं व्यावृत्तज्ञानधर्मस्वीकारे वचनभङ्गिभेदेन साकारवादस्वीकारः । किञ्च नाऽसौ धर्म उपधेयान्तराधीनो विषयभूतघटाद्यतिरिक्तोपाधिप्रतीत्यपेक्षाप्रसङ्गात् ॥ २ ॥

न च घटादिरेव तथा, असम्बन्धात् । तथापि तथात्वे चातिप्रसङ्गात् । नापि जातिरूपः, क्वचिद्घटमात्रपटमात्रज्ञानगततया पृथग्व्यवस्थितौ सत्यां घटपटविषयैकज्ञाने

॥ अथ विषयविषयीभाव खण्डनानुवाद ॥

निर्वचन—प्रकाशक का [केवल तदीयतारूप] स्वाभावविशेष विषयविषयीभाव है।

खण्डन—इच्छा, कृति, प्रकाशरूप नहीं हैं, अतः उनके साथ अर्थ के सम्बन्ध में अव्याप्ति हो जायगी। और प्रकाश के स्थान पर विषयी का निवेश नहीं कर सकते हैं, कारण कि विषयविषयीभाव का ही यह लक्षण है, अतः यदि निवेश करें, तो आत्माश्रय हो जायगा।

किञ्च स्वभाव उसका धर्म्म है अथवा आत्मा है। प्रथम पक्ष में वह ज्ञानत्वआदि साधारण धर्म्म है अथवा घटादि—ज्ञानादि में ही वृत्ति कोई धर्म्मविशेष है । प्रथम पक्ष में ज्ञानत्वरूप विषयविषयीभाव के साधारण होने से यह घटविषयक ज्ञान है, यह पटविषयक ज्ञान है—ऐसा विशेषरूप से नियम नहीं होगा, और द्वितीय पक्ष में विषय २ की प्रतीति व्यावृत्त भिन्न २ ज्ञान में वृत्तिज्ञानधर्म्म के स्वीकार करने पर वचन की रचना के भेद से साकारवाद का स्वीकार हो जायगा। अर्थात् घटादि बाह्य पदार्थ के ज्ञान के धर्म्म में प्रवेश होने से बाह्य पदार्थ का अपलाप हो जायगा।

किञ्च वह धर्म्म जातिरूप है वा उपाधिरूप है। उपाधिरूप में भी उपाधि का निमित्त अन्य है या घटादि ही निमित्त है। उपाधिरूप में अन्य निमित्त नहीं है, कारण कि यदि अन्य निमित्त मानें, तो "अयं घटः" इत्याकारक ज्ञान में विषयभूत घटादि से इतर की अपेक्षा हो जायगी। और इतर की अपेक्षा होती नहीं है । तथा घटज्ञानत्वादिरूप उपाधि में घटादि भी निमित्त नहीं है, कारण कि घटादि से कोई सम्बन्ध नहीं है। और सम्बन्ध के विना भी यदि घटादि को निमित्त मानें, तो पटादि-ज्ञानत्व में भी घट निमित्त हो जायगा। तथा घटादिज्ञानत्वादि जातिरूप भी नहीं है। कारण कि घटविषयक ज्ञान में घटज्ञानत्व और पटविषयक ज्ञान में पटज्ञानत्व और उभयविषयक समूहालम्बन ज्ञान में घटज्ञानत्व, पटज्ञानत्व दोनों के होने से साङ्कर्य्य हो जायगा।

यदि कहें, कि प्रतिविषय ज्ञान-व्यक्ति के भेद होने से समूहालम्बन ज्ञान होता ही नहीं, तो यह युक्त नहीं है, कारण कि ऐसा मानने पर विशिष्ट ज्ञान भी नहीं होगा। यदि कहें, कि जैसे रूपत्वव्याप्य चित्रत्वजाति है वैसे ही घटपट-समूहालम्बन ज्ञान में घटपटज्ञानत्व से विलक्षण एक जाति मानेंगे। अतः समूहालम्बन में घटज्ञानत्व, पटज्ञानत्व के

सहावस्थित्या जातिसङ्करप्रसङ्गात्। प्रतिविषयं ज्ञानभेदनियमे विशिष्टज्ञानानुपपत्तेः एवम्भूतविचित्रजात्यभ्युपगमे प्रत्येकोचितव्यवहारस्याप्यभावप्रसङ्गात्। अथ जातिसङ्करोऽपीष्यते तथापि स एव विशेषो घटज्ञानत्वादिरस्त्विति विषयासिद्धिः ॥ ३ ॥

अथ विषयेणापि सम्बन्धप्रतिभासनात् सोऽपीष्यते, न, तस्यैव सम्बन्धस्य विचार्य्यमाणत्वात्। स एवासाविति चेन्न, तदैक्यात् ज्ञानार्थसाधारणविषयप्रतीत्यापत्तेः। संयोगप्रतिपत्तिवत् विषयित्वं तत्र अर्थे तु विषयत्वमन्यदिति चेन्न, सैव हि ज्ञातता स्यात् सा च निराकरिष्यते। द्वितीये च स्वात्मा घटपटव्यक्तीनामिव घटपटज्ञानव्यक्तीनां व्यावृत्त इति तत्तद्विषयविषयितागोचरानुगतबुद्धिव्यवहारभङ्गप्रसङ्गः ॥४॥

किञ्च तदीयता ज्ञानस्य स्वभाव इति वचनं विचारमर्हति। तदिति तावद्विषयपरामर्शः सम्बन्धिता छप्रत्ययस्यार्थः तदेतदन्योन्यविशिष्टमुभयं ज्ञानस्य स्वभाव इति

समावेश न होने से सङ्कर नहीं है, तो केवल एकविषयक कोई भी ज्ञान नहीं होता है, कारण कि निर्विकल्पक भी अनेकविषयक होता है अतः घटज्ञानत्व, पटज्ञानत्व एक २ विषयक व्यवहार का लोप हो जायगा।

समर्थन—गुण की जाति में सङ्कर दोष नहीं होता है, अतः घटज्ञानत्व दोनों जाति समूहालम्बन ज्ञान में रहती हैं।

खण्डन—यदि विषय भेद से ज्ञान में जातिभेद को मानलें, तो उन्हीं जातियों से प्रतीति में वैलक्षण्य सिद्ध है फिर घटादि विषय की असिद्धि हो जायगी ॥ ३ ॥

समर्थन—घट-ज्ञानत्वादि को विषय का ही तो सम्बन्ध मानते हैं, अतः सम्बन्ध के अन्यथानुपपत्ति से विषय की सिद्धि होगी।

खण्डन—उसी विषय तथा ज्ञान के सम्बन्ध का विचार करते हैं, कि वह सम्बन्ध किंरूप है। अर्थात् उस सम्बन्ध को यदि घटज्ञानत्वादिरूप मानें, तो उससे ही प्रतीति के वैलक्षण्य की सिद्धि होने से विषय की असिद्धि हो जायगी। अतः घटज्ञानत्वादिरूप यह सम्बन्ध नहीं है।

समर्थन—विषयविषयीभाव ही घट तथा ज्ञान का सम्बन्ध रहे हानि क्या है।

खण्डन—विषयविषयीभावरूप सम्बन्ध एक है, अतः संयोग के तुल्य ज्ञान अर्थ दोनों परस्पर विषयी और विषय हो जायेंगे।

समर्थन—अनुभव के अनुसार ज्ञान में विषयित्व और अर्थ में विषयत्व अन्य ही है।

खण्डन—अर्थ गत जो विषयत्व है—वही मीमांसकों की ज्ञातता है उसका निराकरण आगे करेंगे। द्वितीय पक्ष में घट-पट-व्यक्तियों के तुल्य घटज्ञान-पटज्ञान-व्यक्ति का भी आगे रूप भिन्न २ है अतः संपूर्ण घट-ज्ञान में एकाकार अनुगत प्रतीति नहीं होगी ॥ ४ ॥

किञ्च तदीयता ज्ञानका स्वभाव है—यह वचन भी विचारणीय है। यहां तद्-शब्द से विषय का परामर्श है और सम्बन्धिता (सम्बन्ध) छप्रत्यय का अर्थ है। ये दोनों परस्पर मिलकर अर्थात् विषय-सम्बन्ध-ज्ञान के स्वभाव हैं—यह जो कहते हैं, उससे विषय विज्ञान का स्वभाव है—यह उक्त होता है। अतः विज्ञानवाद के समर्थन होने से विज्ञानवाद के खण्डन के प्रकरण का उपसंहार खूब किया गया।

मुवाणेन विषयो विज्ञानस्य स्वभाव इत्युक्तं भवतीति साधु विज्ञानवादिनिराकरणप्रकरणोपसंहरणमकारि। सम्बन्धमात्रं ज्ञानस्य स्वभावो न तु विषय इत्याशय इति चेन्न, विशेषानुपादाने सम्बन्धमात्रमिदं सर्वस्यैव स्यात्। यतो न तावन्न कस्यचित्, सम्बन्धस्वरूपतात्यागप्रसङ्गात्। नापि नियतस्य तादात्म्यापत्तेरुक्तत्वात् नियामकासम्भवाच्च। कारणं नियामकमितिचेत्, तेन नियामकेन किं भवति। तदीयत्वं तस्य सम्बन्धस्येति चेत्, तदेव तदीयत्वं ज्ञानस्वभावभूतसम्बन्धस्वरूपप्रविष्टमुत बहिर्भूतं धर्मान्तरम्॥ ५॥

यदि प्रथमः, तच्छब्दार्थोऽपि तर्हि स्वरूपप्रविष्ट इति विषयज्ञानयोः स एवाभेदप्रसङ्गः। द्वितीये च तस्य धर्मान्तरस्य विषयेणाभेदः, तच्छब्दार्थस्य विषयस्य विशेषणस्य तदीयशब्दार्थे विशिष्टरूपे प्रविष्टस्य स्वीकृतधर्मान्तरस्वभावतया निरुक्तत्वात्।

समर्थन—सम्बन्धमात्र ज्ञान का स्वभाव है, विषय नहीं।

खण्डन—विशेषविषय का उपादान करें, तो सम्बन्धमात्र सभी वस्तुओं का सब ज्ञान में हो जायगा, कारण कि सम्बन्ध किसी का नहीं है—ऐसा नहीं है, अन्यथा यदि सम्बन्धी से अनियत सम्बन्ध को मानें, तो सम्बन्ध स्वरूप से ही उच्छिन्न हो जायगा अर्थात् सम्बन्ध ही नहीं कहावेगा।

समर्थन—घटादि से नियत सम्बन्ध, ज्ञानका स्वभाव है।

खण्डन—घटनियत सम्बन्ध को यदि ज्ञान का स्वभाव मानें, तो घट का भी ज्ञान के स्वरूप में प्रवेश होने से घट, ज्ञान, दोनों का अभेद हो जायगा।

किञ्च घट का सम्बन्ध घट-ज्ञान का स्वभाव है—इसमें कोई नियामक भी नहीं है।

समर्थन—घट के सम्बन्ध में जो घट-ज्ञान का स्वभावत्व है, उसमें घट और चक्षुस्सम्बन्धजन्यत्व ही नियामक है।

खण्डन—घट, चक्षुस्सम्बन्धजन्यत्वरूप नियामक क्या करता है, यदि कहें, कि ज्ञान के स्वभावभूत सम्बन्ध में घटीयत्व को उत्पन्न करता है, तो यह विकल्प होता है, कि वह घटीयत्व ज्ञान के स्वभावभूत सम्बन्ध के स्वरूप में अन्तर्भूत है वा बहिर्भूत अन्य धर्म्म है? ॥५॥ यदि प्रथम कल्प मानें, तो तद्शब्दार्थ का भी स्वरूप में प्रवेश होने से वही विषय और ज्ञान के अभेद का प्रसङ्ग हो जायगा। और यदि द्वितीय कल्पमानें, तो तदीयत्वरूप उस धर्म्मान्तर का विषय के साथ अभेद हो जायगा, कारण कि तदीयशब्द का अर्थ विशिष्ट में प्रविष्ट तथा विशेषण तत्शब्द के अर्थविषय का [स्वीकृत तदीयत्वरूप धर्म्मान्तर के] स्वरूप में अन्तर्भाव है।

समर्थन—वह तदीयत्व विषय से अभिन्न ही रहे, हानि ही क्या है।

खण्डन—वह तदीयत्व ज्ञान के स्वभाव-सम्बन्ध से संबद्ध है या नहीं, यदि सँबद्ध नहीं है, तो विज्ञान किसी का सम्बन्धी न कहावेगा। और यदि सम्बद्ध है, तो क्या अन्य सम्बन्ध से अथवा स्वरूप सम्बन्ध से। यदि प्रथम कल्प मानें, तो वह सम्बन्ध अन्य सम्बन्ध से ही विज्ञान के स्वभावभूत सम्बन्ध का सम्बन्धी होगा इस प्रकार से उत्तर २ सम्बन्ध के स्वीकार होने से वही अनवस्था हो जायगी जिसके भय से स्वरूप सम्बन्ध का स्वीकार है।

अस्तु असौ धर्मो विषयाभिन्न इति चेत्, तथापि किमसौ स्वीकृतेन स्वभावसम्बन्धेन सम्बद्धो न वा, न चेत्, तद्विज्ञानं न कस्यचित्सम्बन्धि स्यात्। सम्बद्धश्चेत्, किं सम्बन्धान्तरेणाऽऽहो स्वभावसम्बन्धेनैवासौ ज्ञानात्मकसम्बन्धसम्बन्धीयः। आद्ये तत्राप्येवं प्रसङ्गो यस्या भयेन स्वभावसम्बन्धः स्वीकृतः सा तदवस्थैवानवस्था। द्वितीयश्चेत्, ज्ञानात्मकसम्बन्धसम्बन्धीय इत्यत्र विशिष्टस्वरूपे ज्ञानरूपमपि विशेषणं प्रविष्टमिति पूर्वोक्तन्यायेनाधुनोक्तन्यायेन च ज्ञानस्यैकस्यैव द्वयमपि स्वात्मेति वाग्भङ्गिभेदमात्रेण ज्ञानगोचरयोरभेदस्वीकार इति। एतेनान्यत्रापि स्वभावसम्बन्धः प्रत्याख्यातव्यः ॥६॥

ज्ञानीयफलाधारत्वं विषयत्वं तद्वत्त्वं च विषयित्वमित्यपि दुष्टम्। तथाहि—ज्ञानीयं फलं ज्ञातता वा व्यवहारो वा स्यात्। आद्येऽतीतानागतधीभ्रमाद्यर्थाव्याप्तिः। न च तत्रैव फलजनने किं नियामकमिति प्रयोजकमनुगतं शक्यनिर्वचनं, तथात्वे वा तदेव

और यदि स्वभाव सम्बन्ध से सम्बन्धी हैं, तो तदीयत्व का ज्ञानात्मक स्वभाव सम्बन्ध के स्वरूपरूप सम्बन्धी में ज्ञान विशेषण भी प्रविष्ट है—इस पूर्वोक्त रीति से तथा सम्प्रति उक्त-रीति से ज्ञान के ही घट और घटीयत्व-दोनों आत्मा हुए, अतः वचन की रचना के भेद से ज्ञान और विषय का अभेद ही सिद्ध हुआ।

इसी प्रकार से अन्यत्र (समवायअभावआदि स्थल में) भी स्वरूप सम्बन्ध का खण्डन जानना चाहिये ॥ ६ ॥

समर्थन—ज्ञान का जो फल उसका आधारत्व विषयत्व है, और उस फलका जनकत्व विषयित्व है।

खण्डन—यह भी लक्षण युक्त नहीं है, कारण कि ज्ञानजन्य फल ज्ञातता है, अथवा व्यवहार। प्रथम पक्षमें अतीतअनागतविषयक बुद्धिस्थल में तथा भ्रमविषय में अव्याप्ति हो जायगी, कारण कि उक्त स्थल में उत्पन्न विषय के वर्त्तमान न होने से बिना आधार के ज्ञातता उत्पन्न कहां होगी। किञ्च घट ज्ञानसे घट में ही ज्ञातता होती है।

पट में नहीं इसमें अनुगत प्रयोजक का निर्वचन शक्य नहीं है। यदि कोई अनुगत प्रयोजक हो भी, तो उसी को विषयत्व मान लीजिये, उससे पृथक् ज्ञातता मानना व्यर्थ है। तथा द्वितीय पक्षमें व्यवहार को हस्तआदि से आनयनादिरूप मानें, तो वह सर्वत्र गुणादि वा व्यापक आत्मादि में नहीं है, अतः उसमें विषयत्व के लक्षण की अव्याप्ति हो जायगी। किञ्च मणि-आनयनरूप व्यवहार उसकी प्रभा में भी है और केवल मणि-विषयक ज्ञान का विषय प्रभा है नहीं, अतः प्रभा में उक्त लक्षण की अतिव्याप्ति हो जायगी। और व्यवहारसे यदि इच्छा का ग्रहण करें, तो उसका आधार आत्मा है, घटादि नहीं है, अतः घटादि में अव्याप्ति हो जायगी। यदि ज्ञानजन्य जो इच्छा तद्विषयत्व को व्यवहार कहें, तो विषयत्व से घटित विषयत्व के लक्षण के होने से आत्माश्रय हो जायगा। किञ्च इच्छा-विषयत्व भी ज्ञान-विषयत्व की अपेक्षा करता है अतः यावत् ज्ञानविषयत्व का ज्ञान न हो तावत् इच्छा-विषयत्व का ज्ञान भी अशक्य है।

किञ्च जो उपेक्षा (औदासीन्य) को व्यवहार नहीं मानते उनके मत में "ग्रामं गच्छन् तृणं स्पृशति"—इस ज्ञान के विषय तृणस्पर्श में लक्षण की अव्याप्ति हो जायगी। यदि हान-उपादानरूप ज्ञान-फल के आधारत्व को ही विषयत्व कहें, तो हानउपादान के ज्ञान का (हान-

विषयत्वमस्तु । व्यवहारश्च यदि कराकर्षणादिः स न सार्वत्रिकः नान्तरीयकश्चान्यत्रापीत्यतिव्यापकं यदीच्छादिस्तदाधारत्वमात्मन इति घटाद्यव्याप्तिः तद्विषयत्वं च तद्विषयत्वमेवापेक्षते । यश्चोपेक्षां नाम व्यवहारं नानुमनुते कथं नोपेक्षाभेक्षामुपेक्षते । हानादिव्यवहारज्ञानानामेव च कथं न निर्विषयत्वं प्रसज्यते । अथ सर्वत्र हानादिव्यवहारोपगमः तदा व्यवहारज्ञानयोरनुपरम एव स्यात् ॥ ७ ॥

एतेन तत्सम्बन्धत्वं यदुच्यते यत्प्रतिबद्धव्यवहारानुकूलस्वभावं यद्विज्ञानं तत्तस्य विषयः तद्वत्त्वं विषयित्वमिति, तदपि प्रागुक्तयुक्तिं नातिवर्तते ।

अथोच्यते य एवार्थो यस्यां संविदि भासते तद्वेद्यः स पृथक् नेति वेद्यावेद्यस्य लक्षणमिति । तदपि न विद्मः, यस्यां संविदीति किं संविदधिकरणम्, अथ तद्विषयः, अथ सम्बन्धिमात्रम् । नाद्यः, घटादेस्तदधिकरणत्वानुपगमेनाऽव्यापनात् यथातथानिर्वचनीयज्ञानत्वाद्यतिव्याप्तेश्च । द्वितीयश्चाद्याप्यनिरूपितः कथं निरूपकः स्यात् वैपरीत्यापाताच्च । तृतीयश्चातिव्यापकः कारणादेरपि तत्सम्बन्धित्वात् ज्ञानान्तरेणावभासमान-

---

उपादान) विषय नहीं हो सकेगा; कारण कि जैसे घटादिज्ञान से हानउपादान होता है वैसे हानउपादानज्ञान से हानउपादान नहीं होता । और यदि हानादिज्ञान से हानादिव्यवहार मानलें, तो उस हानादि-व्यवहार से भी हानादि-व्यवहार मानने में अनवस्था हो जायगी । किञ्च हानादि-ज्ञान से हानादि-व्यवहार का असम्भव भी है ॥ ७ ॥

समर्थन—जो ज्ञान जिस वस्तु से प्रतिबद्ध व्यवहार के अनुकूल स्वभाव वाला हो, वह वस्तु उस ज्ञान का विषय है और उस व्यवहार का जनकत्व ही ज्ञान में विषयित्व है ।

खण्डन—व्यवहार से आनयनादि के ग्रहण करने पर पूर्वोक्त दोष हो जायगा ।

समर्थन—जो अर्थ जिस ज्ञान में भासता हो वह उससे भिन्न नहीं है, और जो ज्ञान का विषय नहीं है, वह उससे भिन्न है, यह विषय अविषय का लक्षण है ।

खण्डन—"यस्यां संविदि" इस सप्तमी का क्या अधिकरण अर्थ है, या विषय अर्थ है वा सम्बन्धित्वमात्र अर्थ है । प्रथम पक्षमें घट का संविद् अधिकरण नहीं है, अतः घट में लक्षण की अव्याप्ति हो जायगी । किञ्च किसी प्रकार से निर्वचनीय ज्ञानत्व में अतिव्याप्ति हो जायगी, कारण कि ज्ञानत्व का अधिकरण ज्ञान है, अद्यावधि विषयत्व की निरुक्ति न होने से विषयत्व सप्तम्यर्थ है—यह द्वितीय पक्ष भी अयुक्त ही है । किञ्च विषयविषयीभाव के अव्यवस्थित होने से संविद् ही विषय और घटादि ही विषयी क्यों न कहावें । तृतीय पक्ष में संविद् के कारणआदि भी संविद् के सम्बन्धी हैं, तथा ये अन्य ज्ञान से प्रकाशित होते हैं, अतः उनमें अतिव्याप्ति हो जायगी ।

समर्थन—जो जिस संविद् के सम्बन्धी हों तथा उसी संविद् से भासमान हों वे उस संविद् के विषय हैं ।

खण्डन—भासमानत्व विषयत्व का ही यह लक्षण है, और इसमें भासमानत्व का प्रवेश हुआ ,अतः आत्माश्रय हो जायगा ।

समर्थन—जिस संविद् के प्रकाशित होने पर जो वस्तु प्रकाशित हो, उस संविद् का वह विषय है ।

त्वात्। तयैव संविदा भासमानत्वमिति चेन्न, भासमानत्वस्यैव निरूप्यमाणत्वात्. तन्निरूप्यत्वात्तद्वत्त्वस्य। यस्यां संविदि प्रकाशमानायां यः प्रकाशत एवेति चेन्न, प्रकाशमानताया एव निरूप्यमाणत्वात्। सामान्यतो विषयत्वे सिद्धे विशेषतो विषयाभिधानमिति चेन्न, सर्वथा विशेषानुपपत्तिद्वारा सामान्यानुपपत्तौ तद्विषयप्रमात्वस्यापि सन्दिग्धत्वात् ॥ ८ ॥

ज्ञानाकारार्पणक्षमो हेतुरेव विषय इति चेन्न, आकार एव केनार्पित इति विनिगन्तुमशक्यत्वात्। न ह्याकारस्ततो ज्ञानस्वरूपादन्यः तत्र च तथोत्पन्नानि कारणानि प्रत्येकमेव समर्थानीति कथं तेषु विशेषं विनिगमयिष्यसि। यद्यपि सकलसमर्थहेत्वनुविधानमस्ति तथापि स्फुटन्तावद्घटस्यानुविधानमिति तदेव तदाकारप्रयोजकमिष्यते इति चेन्न, समस्तकारणान्तरानुविधानवद्घटानुविधानस्य प्रामाणिकत्वाविशेषेण किं स्फुटत्वास्फुटत्वाभ्यां स्यात्। स्फुटानुविधानमादायैव विषयनिरुक्तिं कुर्म्म इति चेन्न, सर्वहेत्वनुविधानस्य न्यायतः स्फुटत्वात्। दृश्यमानमनुविधानं यस्येति चेन्न, दत्तोत्तरत्वात्। दृश्यमानतैव च विषयताऽनिर्वचनान्न शक्योपदर्शना।

खण्डन—प्रकाशमानता विषयता ही का यह लक्षण हैं। अतः इस लक्षण में भी आत्माश्रय हो जायगा।

समर्थन—सामान्यरूप से विषयत्व सिद्ध है और यह लक्षण विशेषरूप से विषयत्व के ज्ञान का अर्थ है, अतः आत्माश्रय नहीं होगा।

खण्डन—निर्विशेष सामान्य नहीं होता है, अतः एक भी विशेष का ज्ञान न होने से सामान्य के सत्त्व में संदेह होने से सामान्य विषयक ज्ञान के प्रमात्व में संदेह है ॥ ८ ॥

समर्थन—ज्ञान में घटाद्याकार का जो अर्पण उसका हेतु विषय है।

खण्डन—ज्ञान में आकार किससे अर्पित होता है—यह ज्ञान ही अशक्य है, कारण कि आकार विज्ञान से भिन्न नहीं है किन्तु विज्ञानरूप ही है, अतः मिलित कारण ही ज्ञान के आकर के हेतु हैं। फिर उन हेतुओं में अमुक आकार का हेतु है—इस विशेष का निश्चय कैसे होगा।

समर्थन—यद्यपि ज्ञान के आकार में हेतुमात्र का अन्वय है तथापि घट का अन्वय स्फुट है, अतः घट ही आकार का प्रयोजक है।

खण्डन—यदि सम्पूर्ण कारणों का आकर में अन्वय प्रमाण से सिद्ध है, तो अमुक कारण का अन्वय स्फुट है और अमुक कारण का अन्वय स्फुट नहीं है—इस कथन से क्या लाभ है। यदि कहें, कि " स्फुट अभिधान " इस कथन का यह प्रयोजन है कि स्फुट लक्षण होता है, तो सब ही कारणों का अन्वय एक सा है, अतः युक्ति से सब ही का अन्वय स्फुट ही है।

समर्थन—जिसका अन्वय ज्ञान के आकार में प्रत्यक्ष है, वह विषय है।

खण्डन—जब सब ही कारण हैं, तो सब ही का अन्वय प्रत्यक्ष ही है। किञ्च प्रत्यक्षता विषयता ही है अतः आत्माश्रय हो जायगा।

समर्थन—ज्ञान का कर्म्म विषय है।

ज्ञानकर्म्मत्वमित्यपि न । ज्ञानेन कर्म्मणः सम्बन्धस्य निर्वक्तव्यत्वात् । तन्निरुक्तिभङ्गश्चेश्वराभिसन्धौ ज्ञाततावादे द्रष्टव्यः ॥ ९ ॥

विना सम्बन्धान्तरं यद्विशेषणज्ञानं स विषयः, तेन विना सम्बन्धान्तरं ज्ञानविशेष्यं विषयः, विशेष्यं चेदं यद्विशिष्टनामकं तत्वान्तरं यद्गतं धर्मं गृह्णातीति । अत्रोच्यते । यद्गतं धर्मं गृह्णातीत्येतावन्मात्रमेव विवक्षितं गृह्णातीत्येवेति वा, आद्ये दण्डस्यापि विशेष्यत्वापातः तद्गतस्यापि सत्वादेधर्मस्य ग्रहणात् । नापरः, भवति हि व्यभिचारिणो धूमस्याविच्छिन्नमूलत्वादि विशेषणं तद्विशिष्टं च तत्वान्तरम् । न च विशेष्यस्य धर्मं व्यभिचारितां गृह्णाति ॥ १० ॥

अथोर्ध्वाविरतगतिविशिष्टस्याविच्छिन्नमूलता विशेषणं न च तथाभूतस्य व्यभिचारिता धर्म इत्युच्यते । मैवम् । प्रथमविशिष्टः किं व्यभिचारी न वा, आद्ये स एव दोषः द्वितीये विशेषणान्तरान्तर्भाववैयर्थ्यं प्रथमविशिष्ट एव च तद्दोषावसरः । अथ यद्धर्मविशिष्टस्य तद्विशेषणं तद्धर्मं गृह्णाति न सर्वं न च व्यभिचारिताविशिष्टस्य तानि

खण्डन—ज्ञान के साथ कर्म्म के सम्बन्ध का निर्वचन के लक्षण का खण्डन ईश्वराभिसन्धि नाम ग्रन्थ के ज्ञाततावाद में देखना चाहिये ॥ ९ ॥

समर्थन—अन्य सम्बन्ध के विना ज्ञान जिसका विशेषण हो, वह विषय है। फलित यह हुआ, कि अन्य सम्बन्ध के विना ज्ञान का विशेष्य विषय है। और विशिष्टनामक पदार्थ जिसके धर्म का ग्रहण करे, वह विशेष्य है।

खण्डन—किसके धर्म्म का ग्रहण करे—इसका क्या अर्थ है। जिसके यत्किंचित् धर्म्म का ग्रहण करे—यह अर्थ है, वा जिसके सम्पूर्ण धर्म्मों का ग्रहण करे—यह अर्थ। प्रथम पक्ष में "दण्डी पुरुषः" यहां दण्ड भी विशेष्य हो जायगा, कारण कि विशिष्ट दण्ड में स्थित सत्वादि धर्म्म का ग्रहण करता है। द्वितीय पक्ष भी अयुक्त है, कारण कि वह्नि के व्यभिचारी धूम से अविच्छिन्नमूलत्वविशिष्ट धूम अन्य है और वह धूम के धर्म्म व्यभिचारित्व का ग्रहण नहीं करता है, अतः धूम में अव्याप्ति हो जायगी ॥ १० ॥

समर्थन—उर्ध्वाविरतगतिविशिष्ट धूम का अविच्छिन्नमूलत्व विशेषण है और उक्त विशेषणविशिष्ट धूम का व्यभिचारित्व धर्म्म नहीं है। अतः धूम में अव्याप्ति नहीं।

खण्डन—(उर्ध्वाविरतगतिविशिष्टरूप) विशेषण से विशिष्ट धूम व्यभिचारी है कि नहीं ! आद्य पक्षमें उर्द्ध्वाविरतगतिविशिष्ट धूम के व्यभिचारिता धर्म्म को अविच्छिन्नमूलत्व विशिष्ट नहीं ग्रहण करता है, अतः अव्याप्ति वैसी ही है। द्वितीय पक्ष में विशेषण व्यर्थ है । किंच उर्द्ध्वाविरतगतिविशिष्ट धूम व्यभिचारितारूप धर्म्म का ग्रहण नहीं करता है अतः धूम में अव्याप्ति पूर्ववत् है।

समर्थन—जिस धर्म्म से विशिष्ट विशेष्य का विशेषण हो तद्धर्मरूप जिसके धर्म्म का विशिष्ट ग्रहण करे सब धर्म्मों का नहीं वह विशेष्य है व्यभिचारिता विशिष्टधूम का अविच्छिन्नमूलत्व विशेषण है नहीं, अतः अव्याप्ति नहीं।

खण्डन—तब क्या धूममात्र व्यभिचारी नहीं है, यदि है, तो व्यभिचारिता विशिष्ट ही अविच्छिन्नमूलत्व धूम में विशेषण है, अतः पूर्ववत् अव्याप्ति है।

विशेषणानीति चेन्न, तत्किं धूममात्रं न व्यभिचारि। ततश्च व्यभिचारिताविशिष्टस्यैव तस्य तानि तथा भवतु व्यभिचारिता तद्विशेषणं परं सा न विशेष्यकोटिरिति चेन्न, अद्यापि विशेष्याज्ञानात् ॥ ११ ॥

किञ्च तद्विशेषणमिति तत्सम्बन्धिमात्रं वा विशेषणतया वा सम्बन्धि। आद्येऽतिप्रसङ्गः। द्वितीये तु तथैवान्योन्याश्रयादि। किञ्च विशेष्यलक्षणो यस्तद्गतो धर्म्मस्तं गृह्णाति न वा, आद्ये ऽतिव्याप्तिः द्वितीये गृह्णात्येवेति नियमोऽसिद्धः।

किञ्च मत्समवायो ज्ञानस्येत्यत्र भवति मत्समवायस्य ज्ञानं विशेषणं सम्बन्धान्तरमन्तरेणैव, नच विषयः। नच गुणगुण्यादिविशेष्यभावे यः सम्बन्धान्तरमन्तरेणेत्युक्त्या व्यवच्छेद्यतां नीतः स एवायं समवाय इति कथं न व्यवच्छेद्यतां प्रतिपत्स्यते, यतोऽत्र तस्यैव विशेषणविशेष्यभावत्वादन्तरत्वस्वासिद्धिरिति। तस्मात् सम्बन्धमन्तरेण ज्ञानं विशेषणं यस्येत्युक्तं तत्र ज्ञानसम्बन्धमनपेक्ष्य स्वभावत एव यथाऽर्थस्यविशेषणं तथा समवायस्यापीति न कश्चिद्विशेष इति साधूक्तं मत्समवायो ज्ञानस्येत्यत्र ज्ञानविषयता समवायस्य स्यादिति ॥ १२ ॥

समर्थन—जो धर्म्म विशेष्यता का अवच्छेदक हो तद्धर्म्मरूप जिस के तद्धर्म्म का विशिष्ट नाम तत्त्वान्तर ग्रहण करे, वह विशेष्य है।

खण्डन—विशेष्य का ही यह लक्षण है अतः अद्यपर्यन्त विशेष्य का ज्ञान न होने से आत्माश्रय हो जायगा ॥ ११ ॥

किंच यद्विशेषण शब्द जिसका सम्बन्धी हो—यह अर्थ है वा जिसका विशेषणतारूप से सम्बन्धी हो—यह अर्थ है। प्रथम पक्षमें उपलक्षण (उपरञ्जक) के भी सम्बन्धी होने से वह भी विशेषण हो जायगा। द्वितीय पक्ष में विषयत्व की निरुक्ति में विशेषणत्व का और विशेषणत्व की निरुक्ति में विषयत्व का प्रवेश होने से अन्योन्याश्रय हो जायगा, कारण कि ज्ञान की प्रकारतारूप विषयता ही विशेषणता है। किंच विशिष्टविशेष्यधूमगत विशेष्यत्वरूप धर्म का ग्रहण करता है या नहीं ? यदि ग्रहण करता है, तो विशिष्ट में उसमें विशेष्यत्व का प्रसङ्ग हो जायगा। और यदि नहीं ग्रहण करता है, तो सब धर्मों के ग्रहण न होने से धूम में भी असम्भव हो जायगा। किंच "मत्समवायो ज्ञानस्य" यहां समवाय में ज्ञान अन्य सम्बन्ध के विना ही विशेषण होता है, अतः समवाय भी ज्ञान का विषय हो जायगा।

समर्थन—समवाय सम्बन्ध से ज्ञान आत्मा का विशेषण है अतः ज्ञान को विषयत्व न हो, इस वास्ते सम्बन्धान्तर पद समवाय के व्यवच्छेद के अर्थ है। फिर उससे "मत्समवायो ज्ञानस्य" यहां भी समवाय का व्यवच्छेद क्यों न हो।

खण्डन—सम्बन्धान्तर पद का अर्थ अन्य सम्बन्ध है यहां अन्य से विशेष्यविशेषणभाव से अन्य का ग्रहण करते हैं और समवाय विशेष्य से अन्य नहीं हैं, अतः अन्यशब्द से समवाय का व्यवच्छेद नहीं होगा। तस्मात् ज्ञान अन्य सम्बन्ध के विना जिसका विशेषण हो, वह विषय है—इस लक्षण का जैसे ज्ञान सम्बन्ध के विना ही स्वरूप सम्बन्ध से अर्थका विशेषण है वैसे ही "मत्समवायो ज्ञानस्य" यहां समवाय का भी विशेषण दोनों स्थलों में कोई विशेष नहीं है, अतः उक्तस्थलमें समवाय के विषयत्व होने से अतिव्याप्ति हो जायगी यह ठीक ही कहा है ॥ १२ ॥

ज्ञानाभावे च प्रसङ्गात्। न च तत्र स एव समवायः सम्बन्धः, अत्रापि विशेषण-विशेष्यभावस्यैव सम्बन्धत्वात्। नासौ सम्बन्धिनोऽन्यस्तादृशश्च व्यवच्छेद्य इति चेन्न, समवायेऽपि तुल्यत्वात्। संयोगसमवायौ व्यवच्छिद्येते इति चेन्न, ज्ञानाभावे तथाऽपि प्रसङ्गात्। न तत्र ज्ञानं विशेषणं किन्तूपलक्षणमिति चेन्न, अतीतानागतयोरविषयत्वापत्तेः। भावे चिन्तेयमिति चेन्न, अभावस्याविषयत्वापातात्। ज्ञानादन्यत् ज्ञानीयश्च यत्कारणादि तत्रापि प्रसङ्गादिति किं विस्तरेण। न च ज्ञानाकारतायां गोचरस्य

"ज्ञानाभावोस्ति" यहां अभाव में ज्ञान स्वरूप से ही विशेषण होता है, अतः अभाव भी विषय हो जायगा।

समर्थन—"मत्समवायो ज्ञानस्य" यहां स्वरूप सम्बन्ध से ही समवाय में ज्ञान विशेषण है और वह स्वरूप समावायरूप ही है अतः सम्बन्धान्तर (समवाय) से ही विशेषण है उसके विना नहीं अतः अतिव्याप्ति नहीं है।

खण्डन—यदि ऐसा मानें, तो सर्वत्र असम्भव हो जायगा, कारण कि "ज्ञातो घटः" इत्यादि स्थलमें भी विशेषणविशेष्यभावरूप सम्बन्धान्तर से ही ज्ञान घट में विशेषण होता है।

समर्थन—सम्बन्धान्तर पद से सम्बन्धी से अन्य सम्बन्ध का ग्रहण होता है और विशेषणविशेष्यभाव सम्बन्धी से अन्य है नहीं, अतः सर्वत्र असम्भव नहीं होगा।

खण्डन—"मत्समवायो ज्ञानस्य" यहां भी समवाय सम्बन्धी ही है और वही उक्त स्थल में स्वरूप है, अतः सम्बन्धान्तर के विना ही ज्ञान के समवाय में विशेषण होने से अतिव्याप्ति युक्त ही है।

समर्थन—सम्बन्धान्तर पद से संयोग समवाय का व्यवच्छेद होता है और "मत्समवायोज्ञानस्य" यहां स्वरूप समवायरूप है, अतः उक्त स्थल में अतिव्याप्ति नहीं है।

खण्डन—ऐसा मानने पर भी "ज्ञानाभावः" यहां ज्ञान का विषय अभाव हो जायगा, कारण कि उक्त स्थल में संबन्धान्तर (समवाय) के विना ही ज्ञान अभाव का विशेषण होता है।

समर्थन—ज्ञान अभाव में विशेषण नहीं है किन्तु उपलक्षण है, अतः विशेषणघटित उक्त लक्षण की अतिव्याप्ति नहीं।

खण्डन—अतीत विषयक, अभूद्वृष्टिः भविष्यति वृष्टिः, ज्ञान स्थल में वृष्टि विषय न कहावेगी, कारण कि वर्तमान वस्तुओं में ही विशेषणविशेष्यभाव होता है। अतीत-विषय वर्तमान ज्ञान का विशेष्य नहीं हो सकता है। यदि विना सम्बन्धान्तर ज्ञान का भाव-रूप जो विशेष्य वह विषय है—ऐसा लक्षण करें, तो "घटोनास्ति" इस ज्ञानका अभाव विषय नहीं कहावेगा। किंच ज्ञान से भिन्न जो ज्ञान का सम्बन्धी कारणादि उनमें अतिव्याप्ति हो जायगी, कारण कि—ज्ञानस्य कारणम्—इत्यादि स्थल में भी विना सम्बन्धान्तर कारणादि ज्ञानका विशेष्य होता है। विज्ञों के लिये विषयविषयीभाव का खण्डन इतना ही बहुत है विस्तार व्यर्थ है।

समर्थन—विषय ज्ञान का स्वरूप ही है अतः ज्ञान और विषय में परस्पर भेद नहीं है, ज्ञानाभिन्नत्व ही ज्ञान-विषयत्व है।

खण्डन—ज्ञान और विषय में अभेद अनुभव से विरुद्ध है, भेद ही अनुभव से सिद्ध है। किंच यदि भेद न हो, तो "ज्ञानगोचरयोर्नास्ति भेदः" इस प्रकार से भेद का खण्डन भी

नास्त्येव ज्ञानगोचरयोर्भेदः, प्रतीतिविरोधात् । भेदमनिच्छता च स प्रतिषेद्धुमप्यनर्ह इति ॥ १३ ॥

वक्तव्यस्तर्हि कोऽसौ भेदो नाम ? स हि स्वरूपं वा स्यात्, इतरेतराभावो वा धर्मान्तरं वा । नाद्यः, भिन्नेऽभिन्नभ्रमानुपपत्तिप्रसङ्गात् । भ्रान्त्याऽपि धर्मिस्वरूपावगाहनात्, अन्यथा कस्याभेदं सा भ्रान्तिरुल्लिखेत् ।

ननु निःसम्बन्धित्वेन व्यवस्थिते तरुदारुप्रभृतिषु नानाधारोऽवयव्यन्य एवाऽऽरोप्यते येषु त्वारोप्यते तेऽभेदे नैव भान्ति किन्त्वनारब्धावयविषु तेष्वारब्धावयवितया विभ्रम्यते । मैवम्, तेषामनुदाहरणीयत्वात् । अतस्मिन् स एवायमिति प्रत्यभिज्ञाभासार्थानां दृष्टान्तत्वेनेष्टत्वात्, तत्रापि धर्मान्तरारोपाभ्युपगमे तादात्म्याभावस्य संसर्गाभावप्रवेशापत्तेः । न चैवमप्येष्टव्यमेव तथापि स्वरूपभेदग्रहे तत्राभेदस्य धर्मस्याप्यशक्यारोपत्वात् ॥१४॥

नहीं हो सकेगा, कारण कि एक देश अथवा काल में जो रहता है उसी का निषेध अन्य देश अथवा काल में होता है । सर्वथा असत् शशशृङ्ग का निषेध नहीं होता है ॥ १३ ॥

इति विषयविषयीभावखण्डनानुवाद ।

अथ भेद-खण्डनानुवाद

किंच भेद क्या वस्तु है—यह भी वक्तव्य है क्या स्वरूप ही भेद है । अन्योन्याभाव या वैधर्म्य भेद हैं ? इनमें प्रथम पक्ष को यदि मानें, तो अभेद भ्रम नहीं होगा, कारण कि स्वरूप ही भेद है और भेदग्रह अभेदभ्रम का विरोधी है और भ्रम भी स्वरूप को विषय करता ही है, यदि स्वरूप को विषय न करे, तो किसमें अभेद को विषय करेगा ।

समर्थन—परस्पर-सम्बन्ध-रहित भेद से विद्यमान दूरस्थ अनेक वृक्षदारुप्रभृति में एक का अभेद भ्रम नहीं होता है किन्तु नाना अवयव वाला जो अन्य अवयवी (वृक्ष, तत्त्व) का भ्रम होता है ।

खण्डन—जहां दूरत्व दोष से अनेक वृक्षों में एक वृक्षत्व का भ्रम होता है उस स्थल में दोष हमने नहीं दिया है किन्तु जहां भिन्न में "स एवायम्" ऐसा प्रत्यभिज्ञारूप भ्रम होता है उस उदाहरण में दोष दिये हैं ।

समर्थन—प्रत्यभिज्ञारूप भ्रम में भी तादात्म्यरूप धर्म का ही भ्रम होता है धर्मी के अभेद का नहीं होता है ।

खण्डन—यदि ऐसा मानें, तो अन्योन्याभाव का संसर्गाभाव में अन्तर्भाव हो जायगा, कारण कि "नायं चैत्रः" इस विशेष-दर्शन को यदि भेदविषयक मानें, तो धर्म्मारोप की इससे निवृत्ति नहीं होगी, अतः धर्म्मारोपवादी उक्त विशेष-दर्शन को अवश्य धर्म्म-संसर्गाभाव-विषयक मानेंगे । और आप अन्योन्याभाव का अस्वीकार नहीं कर सकते हैं, कारण कि उसीके निरूपण में प्रवृत्त हैं । किंच स्वरूपरूप भेद के ग्रह होने पर तादात्म्यरूप धर्म्म का भी आरोप नहीं हो सकता, कारण कि तादात्म्य भी अभेदरूप ही है और भेद-ग्रह होने पर अभेद-भ्रम नहीं हो सकता ॥ १४ ॥

नापि द्वितीयः, प्रतीतावन्योन्याश्रयप्रसङ्गात् । प्रतियोगिरूपत्वेनाप्रतीतावधिकरण-प्रतीतिः, अधिकरणस्वभावत्वेनास्मृतौ प्रतियोगिस्मृतिश्च तद्ग्रहणकारणमतः केतरेतराश्रय इति चेत्, मैवम्, एवं हि सति कुम्भः पटो न भवतीत्यत्र यथैव तस्याभावस्य प्रतियोगितया पटो निषिध्यते तथा कुम्भोऽपीति सोऽपि कुम्भात्मतया निषिद्धः प्रसज्येत ।

वस्तुतोऽन्योन्याभावस्य कुम्भप्रतियोगित्वेऽपि कुम्भस्यापटत्वनिरूपणकाले कुम्भस्य प्रतियोगिता नापेक्ष्यते किन्त्वाश्रयतैवेति कुम्भाप्रतिक्षेपः । पटस्य तु प्रतियोगितैवापेक्ष्यते नत्वाश्रयतेति कुम्भवत् पटस्यापि न सङ्ग्रहापत्तिः । यद्यप्यन्योन्याभावस्योभयप्रतियोगिता तथाप्यन्या कुम्भाश्रयता, अन्या पटाश्रयता, अन्या कुम्भप्रतियोगिता, तेनान्योन्याभावस्योभयप्रतियोगिकत्वे चोभयाश्रितत्वे च नोभयोरपि सङ्ग्रहप्रतिक्षेपविरोधापत्तिः । नापि च प्रतियोगित्वस्यानुयोगिनो भेदोपजीवनेऽन्योन्याश्रयोऽनुपजीवने च स्वस्मादपि भेदग्रहापत्तिः प्रसज्येत । यतः स्मर्यमाणस्य प्रतियोगिता अनुभूयमानस्य चाश्रयतेत्येतावन्मात्र एवोक्ते स्वस्मादपि भेदग्रहाना-

---

द्वितीय पक्ष में अन्योन्याश्रय हो जायगा, कारण कि प्रतियोगिस्वरूप से प्रतियोगी का ज्ञान अन्योन्याभाव के ज्ञान में कारण है, और अभावरूपत्व ही प्रतियोगित्व है अतः यावत् अभाव ज्ञान न हो तावत् अभावाभावत्वरूप प्रतियोगित्व का ज्ञान नहीं होगा।

समर्थन—प्रतियोगित्व से अप्रतीति के काल में अधिकरण की प्रतीति तथा अधिकरणत्वरूप से अस्मृति काल में प्रतियोगी की स्मृति अन्योन्याभाव के ग्रह में कारण है अतः अन्योन्याश्रय नहीं है।

खण्डन—ऐसा मानने पर "कुम्भः पटो न भवति" यहाँ जैसे उस अभाव के प्रतियोगित्वरूप से पट निषिद्ध होता है वैसे ही कुम्भ भी निषिद्ध होता है, अतः उस काल में कुम्भत्वरूप से कुम्भ का निषेध हो जायगा। वस्तुतः अन्योन्याभाव के कुम्भ में प्रतियोगित्व होने पर भी कुम्भ में पट के निषेध के काल में कुम्भ की प्रतियोगिता अपेक्षित नहीं है किन्तु आश्रयता ही अपेक्षित है, अतः उस काल में कुम्भ का निषेध नहीं होता है। और पट की प्रतियोगिता ही अपेक्षित है आश्रयता नहीं, अतः कुम्भ के तुल्य पट का अधिकरणरूप से संग्रह नहीं होता है।

समर्थन—यद्यपि अन्योन्याभाव के दोनों प्रतियोगी और दोनों अधिकरण हैं तथापि कुम्भनिष्ठ आश्रयता अन्य है, और पटनिष्ठ आश्रयता अन्य है, तथा कुम्भनिष्ठ प्रतियोगिता अन्य है, पटनिष्ठ प्रतियोगिता अन्य है—इससे दोनों के प्रतियोगित्व और आश्रयत्व होने पर भी दोनों का निषेध या संग्रह सर्वत्र नहीं होता है। किन्तु जिस काल में जिसमें प्रतियोगित्व की विवक्षा होती है उसका निषेध और अन्य का संग्रह होता है। यदि अनुयोगिनिष्ठ भेद—प्रतियोगित्व ज्ञान की अपेक्षा करता है, तो प्रतियोगित्व के अभावाभावरूप होने से अन्योन्याश्रय हो जायगा, और यदि अपेक्षा नहीं करता है, तो स्व से स्व में भेदग्रह हो जायगा—यह शङ्का भी युक्त नहीं है, कारण कि स्मृति का विषय प्रतियोगी होता है, और अनुभव का विषय अधिकरण होता है—इस कथन से ही स्व में स्व के भेद का ग्रह नहीं होगा।

पत्तिः । नचैवं स एवायमित्यत्रापि भेदग्रहप्रसङ्गः, वास्तवतत्सत्त्वासत्त्वाभ्यां विशेषात् ॥ १५ ॥

मैवम्, तथाहि किमधिकरणप्रतीतिरधिकरणतया प्रतीतिः उत वस्तुगत्याऽधिकरणस्य स्वरूपेण विवक्षिता । आद्ये कीमीयाऽधिकरणतया पटादेः प्रतीतिस्तस्य कारणं स्यात् । न तावदन्योन्याभावाधिकरणतया दण्डाद्यप्रतीतौ दण्डाधिकरणताया इव तदप्रतीतौ तदधिकरणतायाः प्रत्येतुं पूर्वमशक्यत्वात् विशिष्टप्रतीत्या विशेषणस्यावश्योल्लेख्यत्वात् विशिष्टस्य च विशेषणघटितमूर्तित्वात् । नापि यस्य कस्यचिदधिकरणतया प्रतीतिस्तत्कारणं यत्र भिन्नेऽभेदभ्रमस्तत्र धर्मिणः सत्त्वाद्याधारतया प्रतीतावपि तदनुत्पत्तेः ।

न तन्मात्रात्तदुत्पत्तिः, अपि तु प्रतियोगिस्मृतिसहितात्, सा च तदा नास्तीति तदनुत्पत्तिरिति चेन्न, प्रतियोगिस्मृतिरपि किं प्रतियोगितया स्मृतिः, उत वस्तुगत्या प्रतियोगिनः स्वरूपेणेति—विकल्प्यत्वात् । आद्ये किमन्योन्याभावप्रतियोगितया यस्य कस्यचित् प्रतियोगितया वा । नाद्यः, अन्योन्याभावाप्रतीतौ तदनुपपत्तेः पूर्ववत् । नापि

स एवायम्—यहाँ स्मृत-तच्छब्दार्थ-प्रतियोगिक भेदग्रह क्यों न हो—यह शङ्का भी युक्त नहीं है, कारण कि प्रतियोगी के स्मृत होने पर भी वास्तव भेद के न होने से भेद-प्रतीति नहीं होती है। अर्थात् वास्तविक भेद के सत्व असत्वकृत प्रतीति में विशेष होता है ॥१५॥

खण्डन—अधिकरण की प्रतीति से क्या अधिकरणत्वरूप से अधिकरण की प्रतीति विवक्षित है, अथवा वस्तुतः जो अधिकरण है, उसकी स्वरूप से प्रतीति विवक्षित है। आद्य पक्ष में किसकी अधिकरणता से पटादि की प्रतीति भेद-प्रत्यय का कारण है। अन्योन्याभाव की अधिकरणतारूप से अधिकरणता-प्रतीति तो कारण है नहीं, कारण कि दण्ड के अप्रतीतिकाल में दण्डाधिकरणता के तुल्य अभाव के अप्रतीतिकाल में अन्योन्याभाव की अधिकरणता की प्रतीति अशक्य है। विशिष्ट के विशेषण-घटित होने से विशिष्ट की प्रतीति में विशेषण का अवश्य उल्लेख होता है जिस किसी की अधिकरणतारूप से अधिकरण की प्रतीति भेदग्रह का कारण नहीं है, कारण कि जहाँ भिन्न में अभेद-भ्रम होता है वहाँ भी धर्मी की (सत्व के आधारत्वरूप से) प्रतीति है अतः भेद-प्रत्यय हो जायगा।

समर्थन—केवल अधिकरणत्वरूप से अधिकरण की प्रतीतिमात्र कारण नहीं है किन्तु प्रतियोगी की स्मृति से युक्त कारण है और भ्रमस्थल में प्रतियोगी की स्मृति नहीं है, अतः भेद-ग्रह नहीं होता है।

खण्डन—प्रतियोगी की स्मृति भी प्रतियोगित्वरूप से स्मृति वा वस्तुतः जो प्रतियोगी हो उसकी स्वरूप से स्मृति कारण है? आद्य पक्ष में अन्योन्याभाव के प्रतियोगित्वरूप से प्रतीति कारण है वा जिस किसी के प्रतियोगित्वरूप से प्रतीति कारण है? आद्य पक्ष में अन्योन्याभाव की अप्रतीति काल में अन्योन्याभाव की प्रतियोगितारूप से प्रतीति पूर्वोक्त प्रकार से हो नहीं सकती, फिर वह कारण कैसे हो सकती है। द्वितीय पक्ष भी युक्त

द्वितीयः, तस्य वस्तुगत्या भिन्नस्याभिन्नतया भ्रमविषयीकृतस्य स्वदेशेतरदेशादावसत्त्वेन प्रतीयमानत्वे स्वाभावप्रतियोगितया प्रतीतावन्योन्याभावप्रतीत्यनुपपत्तेः ॥१६॥

प्रतियोग्यनुभूतिः सा न स्मृतिरिति चेन्न, स्मृतित्वस्याप्रयोजकत्वात्। अन्यथाऽनुभूयमानयोरन्योन्याभावाप्रतीतिप्रसङ्गात्। अत्रान्तराले स्मृतिकल्पनया नान्योन्यात्मानाविमावित्यनुभवबाधितया प्रयोजकत्वेऽपि वा स्मृतित्वस्य योऽसौ तत्र नासीत् सोऽयमिति स्मर्यमाणाभावप्रतियोगिकत्वेऽपि वस्तुगत्या भिन्नस्याभिन्नतया भ्रमेणोल्लिख्यमानस्यान्योन्याभावप्रतीत्यनुदयात्। दोषाभावोऽपि हेतुः स भ्रमोदाहरणे नास्तीति चेन्न, पूर्वदृष्टे स्मृतिमतो वस्तुगत्याऽन्यस्यैवानन्तरदृष्टस्य पूर्वदृष्टात् भिन्नमभिन्नंवेत्यनिरूपितस्यापि सम्भवेन तत्रेतरेतराभावबुद्ध्यापत्तेः। बुद्ध्यत एवेति चेन्न, पश्चात्तत्संशयदर्शनात्। विशेषधीरपि तत्र हेतुरिति चेन्न, विशेषत्वस्यान्योन्याभावनिरूपणं विना दुर्निरूपत्वात्। एतेन वस्तुगत्या प्रतियोगिनः स्वरूपेण स्मृतिः

नहीं है, कारण कि जिस काल में अन्य देश-(आपण) निष्ठ अभाव का प्रतियोगित्व-ग्रह है उस काल में वस्तुतः भिन्न में जो अभेद भ्रम होता है वहाँ भेद-ग्रह हो जायगा ॥१६॥

समर्थन—प्रतियोगी की स्मृति भेद-ग्रह का कारण है और यहां प्रतियोगी की अनुभूति है, स्मृति नहीं है, अतः भेद-ग्रह नहीं होता है।

खण्डन—"इमौ न अन्योन्यात्मानौ" इस स्थल में जहां प्रतियोगी का अनुभव है, स्मृति नहीं है। वहां भेद-ग्रह होने से उसमें प्रतियोगी की स्मृति प्रयोजक नहीं है। किंच "इमा न अन्योन्यात्मानौ" यहां अनुभव से बाधित होने से भेद-ग्रह में प्रतियोगी स्मृति के प्रयोजकत्व की कल्पना व्यर्थ है। किंच "योऽसौ तत्र नासीत् सोऽयम्" इस स्थल में जहां स्मृति विषय अभाव प्रतियोगी है वहां वस्तुतः भिन्न में अभिन्न-भ्रम होता है। और प्रतियोगी स्मृति के प्रयोजकत्व को मानें, तो उक्त स्थल में भेद-ग्रह हो जायगा।

समर्थन—भेदज्ञान में दोषाभाव भी हेतु है और वह अभेद-भ्रमस्थल में है नहीं, अतः वहां भेद-ग्रह नहीं होता है।

खण्डन—जहाँ पूर्वदृष्ट की स्मृति हो और उससे वस्तुतः भिन्न का ही अनन्तर प्रत्यक्ष हुआ हो परन्तु ,यह पूर्व दृष्टसे भिन्न है, या अभिन्न है—ऐसा निश्चय नहीं हो, वहां दोषाभाव भी है, अतः भेद-ग्रह हो जायगा। वहां भेद-ग्रह होता ही है—यह नहीं कह सकते, कारण कि पीछे संदेह देखा जाता है, यदि भेद का ग्रह होता तो संदेह कैसे होता।

समर्थन—भेद-ग्रह में विशेष का दर्शन भी कारण है, और अभेद भ्रमस्थल में विशेष का दर्शन है नहीं, अतः भेद-ग्रह नहीं होता है।

कारण से कृत संशय में विशेष है यह द्वितीय पक्ष भी युक्त नहीं है, कारण कि वह कारणविशेष-सामग्री है या सामग्री का एक देश है। यदि सामग्री कहें, तो सामग्री के अप्रत्यक्षत्व से उक्त लक्षण से युक्त संशय का भी प्रत्यक्ष नहीं होगा और वह सामग्री—लिङ्ग के न होने से—अनुमेय भी नहीं है।

समर्थन—कार्य-विशेष [संशय] ही लिङ्ग है।

खण्डन—संशयगत विशेष का ही विचार हो रहा है और अद्यपर्यंत कुछ निश्चित नहीं हुआ है। संशयत्व जाति है इस पक्ष को आगे दूषित करेंगे। सामग्री के एक देश से कृत संशय में विशेष है—यह द्वितीय पक्ष भी अयुक्त है, कारण कि संशय का दृश्य कारण साधारण धर्म का दर्शन या विशेषद्वय का स्मरण है। वे दोनों स्वप्रत्यक्ष [अनुव्यवसाय] के भी कारण हैं, अतः यदि वे संशयत्व व्यवहार के कारण हों, तो उनके अनुव्यवसाय में संशयत्व व्यवहार हो जायगा अदृश्य सामग्री के एक देश में कुछ प्रमाण नहीं है, अतः उससे कार्य [संशय] में विशेष के आधान का त्याग कीजिये। किंच सामग्री वा उसका अदृश्य एक देश अप्रत्यक्ष हैं अतः वे दोनों [अनुव्यवसाय है साक्षी जिसका ऐसे] संशयगत विशेष के कारण नहीं हो सकते॥ ५७॥

विषय अथवा करण से अन्य प्रकार से कृत भी संशय में विशेष नहीं है, कारण कि उसे दिखा नहीं सकते, संशय में अनुभवसिद्ध संशयत्व जाति है उससे कृत संशय में निश्चय से भेद है—यह द्वितीय कल्प भी अयुक्त है, कारण कि संशयत्व जाति को मानें, तो धर्मी भी उसका विषय है, अतः उस अंश में भी वह ज्ञान संशय हो जायगा। और धर्मी अंश में वह ज्ञान संशय है नहीं, कारण कि "स्थाणु है वा पुरुष" इस संशय-काल में 'इदं' शब्द से परामृष्ट ऊर्द्धत्व शाली धर्मी के स्वरूप सत्वमें "स्वरूप है या नहीं" ऐसा अभिमान या व्यवहार किसी को नहीं होता है, किन्तु स्वरूप अंश में वह ज्ञान निश्चय ही है। यदि कहें, धर्मी अंश में उक्त ज्ञान के निश्चय होने से क्या हुआ? तो यह हुआ, कि एक ज्ञान में निश्चयत्व संशयत्व दोनों जाति के शङ्कर होने से संशयत्व जाति सिद्ध नहीं हुई। यदि कहें कि गुण जाति में

प्रामाण्याप्रामाण्यवद्भविष्यतीति चेन्न, अत एव हि तयोरपि जातित्वानङ्गीकारः, किंनाम ? तथाभूताऽतथाभूतार्थतालक्षणोपाधिद्वयरूपतास्वीकार एव तयोः। यदा च संशयत्वनिश्चयत्वलक्षणजातिद्वयसम्भिन्नं तद्विज्ञानमास्थीयते तदा कञ्चिद्विषयमपेक्ष्य संशयत्वं कञ्चिदपेक्ष्य निश्चयत्वमित्यापेक्षिकी जातिव्यवस्थितिरित्यपूर्वः पन्थाः। ईदृशस्य पथः पान्थेनापि भवता किंनियामकमभिधेयं येन धर्मिणि तस्य निश्चयत्वं व्यवतिष्ठते। विशेषद्वये च संशयत्वं विशेषदर्शनादर्शने इति चेत्। तर्हि भवति स्थाणोः स्थाणुत्वं पुरुषत्वं पुरुषस्य विशेषः प्रतीयते चासाविति विशेषदर्शनात्तत्राऽपि निश्चयप्रसङ्गः॥ ५८॥

संशयात्पूर्वं नास्ति विशेषदर्शनमिति युक्तस्तत्रापि संशय इति चेन्न, धर्मिधियः पूर्वं तर्हि कथं तद्गतविशेषदर्शनं स्यात्। संशयकाले चाऽस्ति विशेषदर्शनमित्यनन्तरं तर्हि संशयाऽननुवृत्तिप्रसङ्गोऽपि युक्त एव। तदीयविषयाद्विशेषाद्व्यतिरिक्तस्य विशेषस्य दर्शनं विवक्षितमिति चेन्न, स्थाणुर्वा पुरुषो वेति संशयानन्तरं दारुमयो मांसमयो वाऽयमिति संशयो नोपपद्येत, तदुभयमयत्वातिरिक्तयोः स्थाणुत्वपुरुषत्वयोर्विशेषयोः पूर्वज्ञानेनोल्लिखितत्वात्। अन्यतरविशेषदर्शनं संशयप्रतिरोधकं संशयेन तूभयोरुपदर्शनमतो नोक्तदोषप्रसङ्ग इति चेत्, तर्हि स्थाणुः पुरुषश्चेति कुतोऽपि विभ्रमे जाते दारुमयो वा मांस-

---

संकर दोष नहीं होता है, अतः प्रमात्व अप्रमात्व के तुल्य निश्चयत्व संशयत्व दोनों के एक ही ज्ञान में रहने में हानि क्या है, तो सङ्कर दोष होने से ही प्रमात्व अप्रमात्व को भी जाति नहीं मानते हैं किन्तु तथा भूतार्थत्व तो प्रमात्व है और अतथाभूतार्थत्व अप्रमात्व है ऐसा मानते हैं। यदि एक ही ज्ञानमें किसी विषय की अपेक्षा संशयत्व जाति को और किसी विषय की अपेक्षा निश्चयत्व जाति को मानें, तो इस अपेक्षा से जाति व्यवस्थारूप अपूर्व पन्था का स्वीकार आपने किया—इस अपूर्व पथ के पान्थ होकर भी आप किसको नियामक कहेंगे। जिससे धर्मी-अंश में उस ज्ञान के निश्चयत्व और विशेषद्वय-अंश में संशयत्व व्यवस्थित हो।

समर्थन—निश्चयत्व का विशेष-दर्शन और संशयत्व का विशेष-दर्शन प्रयोजक है।

खण्डन—तब तो स्थाणु में स्थाणुत्वरूप विशेष है और पुरुष में पुरुषत्वरूप विशेष है और उसको प्रतीति भी होती है, अतः विशेष-दर्शन होने से विशेषद्वय-अंश में भी निश्चयत्व हो जायगा॥५८॥

समर्थन—संशय से पूर्वकाल में विशेषदर्शन नहीं है, अतः उस अंश में संशयत्व युक्त ही है।

खण्डन—तब तो धर्मी-अंश में भी उक्त ज्ञान में निश्चयत्व न होना चाहिये, कारण कि उस ज्ञान से पूर्वकाल में विशेष-दर्शन नहीं है। किञ्च संशयरूप विशेष-दर्शन होने से संशय से उत्तरकाल में संशय-धारा की अनुवृत्ति नहीं होनी चाहिये।

समर्थन—संशयविषय जो कोटिद्वयरूप विशेष उससे अन्य विशेष का दर्शन संशय का प्रतिबन्धक है, अतः संशय-धारा की अनुवृत्ति में कोई प्रतिबन्धक नहीं है।

मयो वेति संशयप्रतिरोधो न स्यात् पूर्वज्ञानेन विशेषद्वयोपदर्शनस्य कृतत्वात्। विशेष-दर्शनं हि विशेषनिश्चयो विवक्षितो नतु विशेषज्ञानमात्रं येन संशयोपनीतादपि विशेषात्संशयप्रतिरोधः प्रसज्येतेति चेत्, मैवम्, संशयेन यावुपदर्शितौ विशेषौ तत्र न संशयस्य निश्चयत्वमिति व्यवस्थायां सिद्धायामुपदर्शितनियामकसिद्धिर्भवति, सिद्धे चाऽस्मिन्नियामके संशयस्य विशेषद्वयं प्रति निश्चयत्वं नास्तीति सिद्ध्येदित्यन्योन्याश्रयापत्तेः को वारयिता ॥ ५८ ॥

स्यादेतत् संशयज्ञानस्य धर्मिविषयत्वेऽभ्युपगम्यमानेऽर्द्धवैशसमापद्येत तच्च तदनभ्युपगम एव निवर्तते तेन धर्मिज्ञानं निश्चयात्मकमन्यदेव स्थाणुर्वा पुरुषो वेति चान्यदेव संशयज्ञानमित्यभ्युपैष्याम इति चेत्, मैवम्, एकधर्मिसम्बन्धोपनयनव्यतिरेकेण स्थाणुत्वपुरुषत्वयोर्विरोध एव नास्तीति स्थाणु र्वा पुरुषो वेत्येतदेव न स्यान्नहि यस्य कस्यचित्स्थाणुत्वेन यस्य कस्यचित्पुरुषत्वं विरुद्ध्यते। एकधर्मिसम्बन्धमनन्तर्भा-

---

खण्डन—तब "स्थाणु है वा पुरुष" इस संशय के अनन्तर "दारुमय है वा मांसमय है" यह संशय नहीं होगा, कारण कि दारुमयत्व मांसमयत्वरूप जो उस संशय का विषय उससे अन्य स्थाणुत्व पुरुषत्वरूप विशेष का दर्शन पूर्वकाल में हो चुका है।

समर्थन—एक विशेष का दर्शन संशय का प्रतिबन्धक है और संशय में दोनों विशेषों का दर्शन है, अतः संशय के बाद उक्त संशय का प्रतिरोध नहीं होता है।

खण्डन—तब किसी कारण से "स्थाणुः पुरुषश्च" ऐसा भ्रम होनेपर "दारुमयो वा मांसमयो वा, इस संशय का प्रतिरोध नहीं होगा, कारण कि पूर्वज्ञान का एक विषय नहीं है, किन्तु दो विषय हैं।

समर्थन—विशेष-दर्शन शब्द से विशेष-निश्चय विवक्षित है, ज्ञानमात्र नहीं है, अतः संशयोपनीत विशेषविषय से संशय का प्रतिरोध नहीं होता है।

खण्डन—संशय के विशेषद्वय अंश में निश्चयत्व नहीं है—इस व्यवस्था की सिद्धि होने पर विशेष-निश्चय संशय का प्रतिबन्धक है—यह नियम सिद्ध होगा, और इस नियम की सिद्धि होनेपर उक्त "स्थाणुः पुरुषो वा" यह ज्ञान विशेषद्वय-अंश में संशय है—यह सिद्ध होगा इस प्रकार से अन्योन्याश्रय हो जायगा उस अन्योन्याश्रय का वारण कौन करेगा ॥५८॥

समर्थन—यदि संशय को धर्मी-अंश में निश्चय मानें, तो एक ही ज्ञान में अंशभेद से संशयत्व निश्चयत्व के होने से संकर हो जायगा। वह संशय में निश्चयत्व के अस्वीकार से निवृत होता है, अतः धर्मी का निश्चयरूप ज्ञान अन्य ही है और स्थाणु वा पुरुषो वा इत्याकारक धर्म्म-अंश में संशय-ज्ञान अन्य नहीं है ऐसा मानेंगे।

खण्डन—यावत् एक धर्मी में सम्बन्ध की प्रतीति न हो तावत् स्थाणुत्व पुरुषत्व का विरोध ही नहीं है, अतः "स्थाणुर्वा पुरुषो वा" यह आकार ही नहीं होगा, कारण कि जिस किसी के स्थाणुत्व से जिस किसी का पुरुषत्व विरुद्ध नहीं है। यदि एक धर्मी के सम्बन्ध के बिना भी विरोध हो, तो अन्योन्य के नाश करनेवाले उन दोनों का जगत् में असत्व हो जायगा। अथवा उस धर्मी में पुरुषत्व निश्चय से जैसे संशय की निवृति वा अनुत्पत्ति

न्य विरोधे जगति तयोरन्योन्यस्य व्यतिघ्नतोरसत्त्वमेव प्रसज्येत । तस्य धर्मिणो वा पुरुषत्वनिश्चयाद्यथा संशयो निवर्तते नोत्पद्यते वा तथा स्वात्मनः पुरुषत्वनिर्णयात्संशयो निवर्तेत नोत्पद्येत वा, विशेषाभावाद्यथाऽयं द्रष्टुर्न स्वशरीरविषयः संशयः तथैव पुरोवर्तिविषयोऽपि नासौ । कथं चेदमर्थेन सामानाधिकरण्याभिमानः योऽयमूर्ध्वताधर्मा स किं स्थाणुरुत पुरुष इति । कस्माद्वा प्रत्यभिज्ञानादयोऽप्येकं ज्ञानमङ्गीकृता इत्युच्छिन्ना विशिष्टविज्ञानसङ्कथा । सञ्ज्ञातश्च गौरश्वः पुरुष इतिवद्विशकलितो विज्ञानसंसार इत्यास्तां विस्तराभिनिवेशः ।

नन्वस्ति तावदयं स्थाणु र्वा पुरुषो वेति परस्परविरुद्धार्थावगाही प्रत्ययः स स्वविषयं तथाभूतमुपस्थापयिष्यति । न, उक्तबाधकैः सर्वप्रकारखण्डने परिशेषासम्भवात् ॥ ६० ॥

यच्च स्वरूपमादाय विरुद्धार्थत्वमभिधीयते तदपि निर्वक्तुं न शक्यते । तथाहि—भावतदभावयोः को विरोधः । सहानवस्थानमिति चेन्न, देशभेदेन सहाप्यवस्थानात् । देशाभेदेनेति चेन्न, संयोगाद्यव्यापकत्वं यद्यभ्युपैपि तथाऽप्यनुपपत्तिः प्रकारभेदेन तथाभावस्याभ्युपगमात् । तस्य पक्षे एकेन प्रकारेणैकस्मिन् सहानवस्थानं विरोधः,

---

होती है, वैसे ही अपने आत्मा में पुरुषत्व निश्चय से भी संशय की निवृत्ति वा अनुत्पत्ति हो जायगी, कारण कि जैसे यह संशय द्रष्टा के शरीर-विषयक नहीं है, वैसे ही यह संशय पुरोवर्ती-विषयक भी नहीं है । किञ्च यदि संशय धर्मी-विषयक नहीं है, तो जो यह ऊर्ध्व है, वह स्थाणु है वा पुरुष, ऐसा इदं अर्थ के साथ सामानाधिकरण्य का अभिमान कैसे होता है । प्रत्यभिज्ञा को भी एक ज्ञान मानते हैं इस प्रकार से दो ज्ञानों को मानने में विशिष्टज्ञान का नाम उच्छिन्न हो जायगा । गौ, अश्व, पुरुष जैसे भिन्न २ हैं ऐसे ही विज्ञान संसार भी विशकलित हो जायगा । बस, इतना ही संशय का खण्डन पूर्ण है अतः विस्तार का आग्रह रहे ।

समर्थन—"स्थाणुर्वा पुरुषो वा" इत्याकारक परस्पर-विरुद्ध अर्थ का अवगाहन करने वाला ज्ञान होता है वह ज्ञान परस्पर विरुद्ध स्वविषय में प्रमाण होगा ।

खण्डन—विषय से कृत, वा कारण से कृत, वा जाति से कृत, संशय में विशेष के उक्त प्रकार से खण्डित होने से संशय और उसका विषय अनिर्वचनीय है ॥ ६० ॥

इतिसंशयलक्षणखण्डन

॥ भावाभावविरोधनिर्वचनखण्डन ॥

किञ्च भाव अभाव के स्वरूप को ग्रहण कर विरुद्धार्थत्व [संशय में विरुद्ध-धर्म विषयत्व] का आपने जो अभिधान किया है उसका निर्वचन भी अशक्य है । कहिये—भाव अभाव का क्या विरोध है ।

निर्वचन—सहअनवस्थान विरोध है ।

संयोगाद्यव्यापकत्वानभ्युपगन्तृपक्षे च देशाभेदेन सहानवस्थानं स इति चेन्न, तद्धि तदुभयावस्थानसाहित्यनिषेधो वा तदुभयावस्थाननिषेधसाहित्यं वा स्यादाद्येऽप्रसिद्धप्रतियोगिकत्वं, तदुभयावस्थानसाहित्यस्य क्वचिदप्यप्रमितेः शशविषाणनिषेधादेश्च शशके विषाणनिषेधादिरूपत्वाङ्गीकारेण प्रसिद्धप्रतियोगिकत्वाभ्युपगमात्।

यदाहैको " वस्तुनः प्रतियोगिते " ति।

अन्यश्च—

"लब्धरूपं क्वचित्किञ्चित्तादृगेव निषिद्ध्यते" इति ॥ ६१ ॥

द्वितीये तु तदुभयावस्थानसाहित्यस्वीकार एव स्यात्तदुभयनिषेधयोस्तदुभयतयैवाङ्गीकारात्। परस्परप्रतिक्षेपकत्वं विरोध इति चेन्न, तद्धि परस्परप्रतिक्षेपं प्रति कारणत्वं वा तादात्म्यं वा, न प्रथमः, प्रमाणाभावेन तथाविधतत्कार्यानङ्गीकारात्। न द्वितीयः, प्रतिक्षेपशब्दार्थस्योभयानुगतस्यानिर्वचनात्। यत्रैकस्य सत्त्वं तत्रापरस्यासत्त्वं नियमेन यत्स विरोधस्तयोरिति चेन्न, सत्त्वासत्त्वयोरेकापराश्रयत्वे वैयधिकरण्यात्। सम्बन्धस्य तद्व्यतिरिक्तत्वे एकसत्त्वस्यैव चापरासत्त्वात्मकतया स्वीकारेण यत्रैकस्य

खण्डन—यह युक्त नहीं है कारण कि देश-भेद से भाव तदभाव के साथ [एक काल में] अवस्थान होता है।

समर्थन—एक देश में सहअनवस्थान विरोध है।

खण्डन—यह भी युक्त नहीं है कारण कि जो आचार्य संयोग तदभाव को अव्याप्यवृत्ति मानते हैं उनके मत में मूलशाखाप्रकार-भेद से संयोग और तदभाव का वृक्षादिरूप एक देश में भी अवस्थान होता है।

समर्थन—जो संयोगादि को अव्याप्यवृत्ति मानते हैं, उनके मत में एक प्रकार से एक देश में सहअनवस्थान विरोध है और जो संयोगादि को अव्याप्य वृत्ति नहीं मानते है, उनके मतमें एक देश में सहअनवस्थान विरोध है।

खण्डन—सहअनवस्थान शब्द का उभय के अवस्थान के साहित्य का निषेध अर्थ है ? वा उभय के अवस्थान के निषेध का साहित्य अर्थ है ? प्रथम कल्प में उभयावस्थान साहित्यरूप प्रतियोगी को अप्रसिद्धि से सहअनवस्थान भी अप्रसिद्ध है। शशविषाण का निषेध भी शश में विषाण का निषेधरूप होने से ,प्रसिद्धप्रतियोगिक ही है। वस्तु प्रसिद्ध-निषेध का प्रतियोगी होता है–यह एक आचार्य का वचन है और अन्य आचार्य का वचन है कि जो कहीं लब्धरूप होता है उसी का अन्यत्र निषेध होता है ॥ ६१ ॥

द्वितीय पक्ष में उभय के अवस्थान के साहित्य का ही स्वीकार होगा, कारण कि भाव का निषेध अभावरूप और अभाव का निषेध भावरूप ही होता है।

समर्थन—परस्पर प्रतिक्षेपकत्व विरोध है।

खण्डन—परस्पर प्रतिक्षेपकत्व शब्द का परस्पर प्रतिक्षेप [निषेध] का कारणत्व अर्थ है ? वा परस्पर के प्रतिक्षेप का तादात्म्य अर्थ है ? प्रथम पक्ष अयुक्त है कारण कि घट का कार्य घटाभाव है और घटाभाव का कार्य घट है—इसमें कुछ प्रमाण नहीं है।

द्वितीय पक्ष भी अयुक्त ही है, कारण कि उभय [भावाभाव] में अनुगत प्रतिक्षेप

सत्त्वं तत्रैकस्य सत्त्वमितिवचनार्थप्रसङ्गेन पौनरुक्त्याद्यापातात्। यत्र घटाभाव इत्यत्र खल्वयमर्थो यन्नाम? यस्याऽऽधेयतया सम्बन्धी घटाभावस्तत्र घटो नास्तीत्यस्याप्यय- मर्थः तस्याधेयतया सम्बन्धी घटाभाव इति, यत्र घट इत्यस्य कोऽर्थः यस्याधेयतया सम्बन्धी घटः तत्र घटाभावो नास्तीति कोऽर्थः तस्याधेयतया सम्बन्धी घटाभावसम्ब- न्धनिषेधः घटाभावसम्बन्धस्य घटाभावात्मकतया घटाभावनिषेधस्यापि घटात्मकतेति। तस्मात्तस्याधेयतया सम्बन्धी घट इत्येवार्थः, अतो घटतदभावयोर्भेदं मनसिकृत्यापि न विप्रतिपत्तव्यमिति ॥ ६२ ॥

यत्रैकस्यावस्थानं तत्रैकस्यैवेति नियमाभिप्रायेण न पौनरुक्त्यादिरिति चेन्न, नियमस्य यत्किञ्चिदन्यव्यवच्छेदकत्वेऽसिद्धत्वापातात्। विरोधिव्यवच्छेदकत्वस्य च विरोधानिर्वचनेऽनिर्वचनात्। अभावपक्षे भावव्यवच्छेदो भावपक्षे चाभावव्यवच्छेदो नियमार्थ इति चेन्न, एकरूपानभिधानेऽनुगतविरोधानिर्वचनात्। किंच भावाभावव्यव-

---

का निर्वचन नहीं हो सकता है, अर्थात् भाव के प्रतिक्षेप का तादात्म्य अभावरूप है और अभाव के प्रतिक्षेप का तादात्म्य भावरूप है, अतः उभयानुगत [एकरूप] प्रतिक्षेप का निर्वचन हो नहीं सकता है।

समर्थन—जहां एक [भाव या अभाव] का सत्व हो वहां अपर [अभाव या भाव] का नियम से जो असत्व है वह भावाभाव का विरोध है।

खण्डन—सत्व तो एक में रहेगा और असत्व अन्य में, अतः सत्व असत्व के सामानाधिकरण्य के न होने से असम्भव हो जायगा। और यदि सत्वशब्द का अर्थ सम्बन्ध करें, और उसको सम्बन्धी से भिन्न मानें, तो एक का जो सत्व है वहीं अपर का असत्व है उक्त वाक्य का अर्थ यह हुआ, अतः पुनरुक्ति दोष हो जायगा। देखिये "जहां घटा- भाव है" इसका अर्थ यह है कि जिसका आधेयरूप से सम्बन्धी घटाभाव है और 'वहां घट नहीं है" इस वाक्य का अर्थ यह है कि उसका आधेयरूप से सम्बन्धी घटाभाव है और "जहां घट है" इसका क्या अर्थ है जिसका आधेयरूप से सम्बन्धी घट है और वहां घटाभाव नहीं है इसका क्या अर्थ है, कि उसका आधेयरूप से सम्बन्धी घटाभाव सम्बन्ध का निषेध है और घटाभाव का सम्बन्ध घटाभावरूप है और घटाभाव का निषेध घटरूप है, अतः उसका आधेयरूप से सम्बन्धी घट है यही अर्थ हुआ फिर घट तद- भाव के भेद के हृदय में रहते भी उन दोनों के विरोध के [पुनरुक्तिआदि दोष होने से] लक्षण के न होने से विरोध के असत्व में विप्रतिपत्ति को न कर असत्व ही मान लेना चाहिये ॥६२॥

समर्थन—जहां एक का सत्व हो वहां एक का ही सत्व हो ऐसे नियम के अभिप्राय से पुनरुक्ति नहीं है।

खण्डन—नियम से यदि यत्किंचित् अन्य धर्म का व्यवच्छेद करें, तो कहीं भी विरोध की सिद्धि नहीं होगी, कारण कि भूतलादि सर्वत्र ही प्रतियोगी या अभाव से अतिरिक्त भूतलत्वादि धर्म विद्यमान है। और नियम से विरोधी धर्म के व्यवच्छेद को मान नहीं सकते हैं, कारण कि अद्यावधि विरोध का निर्वचन नहीं हुआ है।

च्छेदयोरभावभावविधानातिरिक्तयोरनभ्युपगमे पुनरपि च यत्र भावस्तत्र भावो यत्राभावस्तत्राभाव इत्युद्देश्यविधेयभावानुपपत्तिरभेदादिति पौनरुक्त्याधिक्यफलाभाव एव ॥६३॥

स्यादेतत् भावाभावयोः स्वरूपमेव विरोधः, नचैवं सत्यविरुद्धतापत्तिः यथा सत्ता भावरूपैव सती स्वात्मनि सदिति भवितृव्यवहारं करोति तथा भावाभावौ विरोधात्मानावेव स्वात्मनि विरुद्धरूपं भवितृव्यवहार कुर्वाते, कस्यैतौ विरोध इति चानुयोगे स्वाश्रयस्येत्युत्तरं, किं तत्र विरोधफलमिति प्रश्ने भेदव्यवस्थानमित्यभिधेयम् । यदाह—"अयमेव हि भेदो भेदहेतुर्वा यद्विरुद्धधर्माध्यासः कारणभेदश्चेति" ॥६४॥

तदेतदनुपपन्नम् । एतयोर्विरोधत्वं प्रत्येकं वा स्यान्मिलितयोर्वा । नाद्यः, प्रत्येकमेवाश्रयैकत्वभङ्गप्रसङ्गात् । नैकत्वाभावो भेदोऽभिमतः किन्त्वन्योन्याश्रयापेक्षभेदरूपधर्मवत्त्वमिति चेन्न, तस्याभावात् । कालभेदेनैकस्यभावाभावाश्रयत्वाभ्युपगमात्तदभेद

समर्थन—जहां एक शब्द से भाव का अभिधान हो वहां अभाव व्यवच्छेद्य है और जहां एक शब्द से अभाव का अभिधान हो वहां भाव व्यवच्छेद्य है, अतः विरोध के अनिर्वचन से आत्माश्रय नहीं है।

खण्डन—भाव अभाव उभय-स्थल साधारण एक लक्षण के न होने से अनुगम नहीं होगा।

किञ्च जहां एक भाव का सत्व हो वहां एक भाव का ही सत्व हो अभाव का सत्व न हो यहां व्यवच्छेद्य अभाव का सत्व न हो इसके भाव का सत्व हो इस अर्थ में पर्य्यवसान होने से उद्देश्यविधेयभाव की अनुपपत्ति तथा पुनरुक्ति दोष वैसा ही है ॥६३॥

समर्थन—भाव अभाव का स्वरूप ही विरोध है। यदि कहें, कि भाव अभाव का स्वरूप विरोध है, तो भाव अभाव में विरोध तो है नहीं, फिर उनमें अविरुद्धत्व व्यवहार क्यों नहीं हो, तो जैसे सत्ता, स्व में अन्य सत्ता के न होने पर भी सत् ऐसा व्यवहार कराती है वैसे ही भाव अभाव दोनों स्व में [अन्य विरोध के न होने पर भी] विरोध व्यवहार कराते हैं। यह विरोध किसका है ? इस प्रश्न में अपने आश्रय का है—यह उत्तर है और विरोध का फल क्या है ? इस प्रश्न में भेद की व्यवस्था—यह उत्तर है। आचार्य्य ने यह बात कही भी है कि जो विरुद्ध धर्म का अवस्थान है, वा कारण का भेद है, वही भेद वा भेद का हेतु है ॥६४॥

खण्डन—यह मत युक्त नहीं, कारण कि भाव और अभाव प्रत्येक विरोध हैं, वा मिलित ? इनमें प्रथम पक्ष अयुक्त है, कारण कि प्रत्येक के आश्रय में एकत्व का भंग हो जायगा।

समर्थन—एकत्व का अभाव भेदरूप नहीं है, किन्तु अन्योन्य [भाव और अभाव का आश्रय] है प्रतियोगी जिसका ऐसा भेदरूप जो धर्म तद्वत्व ही है, अतः प्रत्येक के आश्रय का भेद नहीं है।

खण्डन—काल के भेद से एक ही घट में रक्तरूप और उसका अभाव रहता है और आश्रयभेद नहीं है, अतः अन्योन्य का जो आश्रय तत्प्रतियोगिक भेद विरोध का फल नहीं है।

समर्थन—एक काल में अन्योन्य [भाव अभाव] का जो आश्रय तत्प्रतियोगिक भेद विरोध का फल है, अतः घट रक्त स्थल में कालभेद से भाव अभाव दोनों के होने पर भी आश्रय का भेद नहीं होता है।

इति चेन्न, तदभेदस्य स्वाभाविकस्य विवक्षितत्वे विशेषणवैयर्थ्यात्। एकोपाध्यवच्छिन्नस्य विवक्षितत्वे कालभेदाभिमतेऽपि सम्भवात्। भिन्नोपाध्यनवच्छिन्नत्वस्य विवक्षितत्वेऽसम्भवात्। असहावस्थितभिन्नोपाध्यनवच्छिन्नत्वस्य वाञ्छितत्वे सहत्वस्यैककालरूपत्वेन तत्रापि कालाभेदविकल्पानुवृत्त्यापत्तेः ॥ ६५ ॥

मिलितत्वं चानयोरेकदेशत्वं वाऽभिमतमेककालत्वं वा, एकप्रकारेण वृत्तिर्वा, वृत्तिप्रकारान्यैकोपाध्यवच्छेदो वा। नाद्यः, भावात्यन्ताभावयोस्तदभावात् न द्वितीयः, भावस्य प्रध्वंसप्रागभावाभ्यां तदनुपपत्तेः। न तृतीयः, संयोगाद्यव्याप्यवृत्तितावादिपक्षे गगनादौ संयोगभावाभावयोस्तदभावात्। अव्याप्यवृत्तिधर्मानभ्युपगन्तृपक्षे भावाभावयोर्वृत्तौ प्रकारान्तराभावे प्रमाणाभावात् ॥ ६६ ॥

खण्डन—काल का अभेद (एकत्व) स्वाभाविक है अथवा औपाधिक? यदि स्वाभाविक है, तो विशेषण व्यर्थ है, कारण कि स्वाभाविक काल का भेद तो है नहीं, फिर किसकी व्यावृत्ति के लिये लक्षण में अभेद का निवेश है। और यदि औपाधिक काल का अभेद है, तो यह अर्थ हुआ कि एक उपाधि से अवच्छिन्न काल में रक्त और उसका अभाव नहीं रहता है, अतः आश्रय-भेद नहीं है, तो यह भी युक्त नहीं है, कारण कि एक ही दिनरूप उपाधि से अवच्छिन्न काल में मुहूर्त प्रहरआदि उपाधि के भेद से घट में रक्त उसके अभाव के होने से घटरूप आश्रय का भेद हो जायगा।

समर्थन—भिन्न उपाधि से अनवच्छिन्न काल में विद्यमान भाव तदभाव का अन्योन्य-आश्रयप्रतियोगिक भेद विरोध का फल है उक्तस्थल में मुहूर्त और प्रहर उपाधि-भेद होने से दोष नहीं है।

खण्डन—सूर्य चन्द्र परिस्पंद, कालयंत्र [घड़ी] परिस्पन्दआदि से एक ही काल के अवच्छिन्न होने से भिन्न उपाधि से अनवच्छिन्नत्व की अप्रसिद्धि से असम्भव हो जायगा।

समर्थन—असहअवस्थित जो भिन्न उपाधि उससे अनवच्छिन्न काल में भाव तद्भाव के अन्योन्यआश्रयप्रतियोगिक-भेद विरोध का फल है चन्द्रसूर्य-परिस्पन्दआदि सहअवस्थित हैं, अतः असम्भव नहीं है।

खण्डन—इस लक्षण में सहशब्द का अर्थ एक काल ही है। उसमें भी काल का एकत्व स्वाभाविक है, वा औपाधिक? ऐसा विकल्प करने से पूर्वोक्त दोष हो जायेंगे ॥ ६५ ॥

भाव अभाव दोनों मिलित विरोध हैं—यह कल्प भी युक्त नहीं है, कारण कि भाव अभाव का मिलितत्व एक देश में वृत्तित्व है? या एक काल में वृत्तित्व है? या एक प्रकार से वृत्तित्व है? या इनसे भिन्न उपाधि से अवच्छिन्नत्व है? इन में प्रथम कल्प में भाव और अत्यन्ताभाव को मिलितत्व नहीं होगा। द्वितीय कल्प में भाव और तत्प्रागभाव तत्प्रध्वंस को मिलितत्व नहीं होगा। तृतीय कल्प में भी संयोगादि को जो अव्याप्यवृत्ति मानते हैं, उनके मत में भी आकाशआदि में अवच्छेद [देश] भेद से ही संयोग तदभाव रहते हैं, अतः भाव और तदभाव का मिलितत्व अप्रसिद्ध है और जो संयोगादि को व्याप्यवृत्ति मानते हैं, उनके मत में भाव तदभाव के वृत्तित्व में प्रकारान्तर [अवच्छेदक भेद] के सद्भाव में प्रमाण के न होने से प्रकार में एक विशेषण व्यर्थ है ॥ ६६ ॥

नाऽपि चतुर्थः, स हि यदि निर्देष्टुं शक्यते तदाऽपि भावप्रागभावयोर्भावप्रध्वंसयो र्वैकदाऽनभ्युपगमेन तद्विशेषितयोरप्येकदाऽवश्यमनभ्युपगन्तव्यतया कदा विरोधस्य तदाश्रयतेति वक्तुमशक्यत्वात्। किञ्च भावप्रागभावयोर्भावप्रध्वंसयोर्वा यदि तथाभावोऽभ्युपगम्यते तदाश्रयभेदप्रसङ्गः, अभावान्तरेऽपि सावकाशत्वात् न परस्परप्रतिक्षेपात्मकत्वं, परस्परप्रतिक्षेपात्मकत्वं हि भावात्यन्ताभावयोरेव। अथ नाऽभ्युपगम्यते तदा भावप्रागभावयोर्भावप्रध्वंसयोश्चाविरोधापत्तिः। तदसत्त्वमात्रयोर्विरोधो न तु तत्तदसत्त्वविशेषयोरिति चेन्न, विशेषस्य तथाऽप्यविरोधात्कदाऽपि सहावस्थितियोग्यतापत्तेः। नियमेन तथात्वे च विरोधव्याघातात्। मात्रशब्देन च यदि विशेषशून्यत्वमसत्त्वस्योच्यते तदा तदनभ्युपगम एव प्रमाणाभावात् नहि निर्विशेषासत्त्वमात्रसद्भावे प्रमाणमभिधातुं शक्यते। अथ मात्रशब्दोपादानं सत्यपि विशेषेऽसत्वस्य साधारणरूपपुरस्कारेण विरोधव्यवस्थितिप्रदर्शनार्थं तदा भावप्रध्वंसयोस्तादृगेव दोषापत्तिः। प्रध्वं-

चतुर्थ कल्प का तो कथन ही नहीं हो सकता है। यदि किसी प्रकार से कथन हो भी तो युक्त नहीं है, कारण कि भाव, तद्प्रागभाव तथा भाव, तत्प्रध्वंसाभाव एक काल में नहीं रहते हैं, फिर प्रकार से भिन्न उपाधि से युक्त भाव तत्प्रागभाव एक काल में कैसे रहेंगे? और यदि एक काल में रहते नहीं हैं, तो विरोध के आश्रय या स्वरूप वे कैसे और कब होंगे? किञ्च यदि भाव, तत्प्रागभाव और भाव, तत्प्रध्वंस के विरोध को मानें, तो रक्तरूप और तत्प्रागभाव के अधिकरण घट का भेद हो जायगा। किञ्च घट तत्प्रागभाव और घट तत्प्रध्वंसाभाव परस्पर निषेधरूप भी नहीं हैं, कारण कि घट ध्वंसाभाव का निषेधरूप भी है तथा घटप्रागभाव घटध्वंस का निषेधरूप भी है।

समर्थन—भाव और तदत्यन्ताभाव ही परस्पर निषेधरूप हैं।

खण्डन—यदि भाव और तद्ध्वंसाभाव को तथा भाव और प्रागभाव के परस्पर विरोध को न मानें, तो इन दोनों की—अविरोध होने से एक काल में तथा एक अधिकरण-में--प्रतीति हो जायगी।

समर्थन—केवल भाव और सामान्य से अभाव का विरोध है, भाव और विशेषरूप से अभाव का विरोध नहीं है।

खण्डन—ऐसा मानने पर विशेष प्रागभावादि के साथ अविरोध होने से कदाचित् सहअवस्थिति हो जायगी यदि कहें, घट तत्प्रागभाव तथा तत्प्रध्वंस का स्वभाव है कि ये नियम से साथ नहीं रहते हैं, तो इनमें विरोध नहीं है, इस कथन से व्याघात हो जायगा।

किञ्च, यदि मात्र शब्दार्थ के बल से सामान्य में विशेषशून्यत्व का प्रतिपादन करें, तो प्रमाण के अभाव से सामान्य असत्व का अभाव हो जायगा, कारण कि निर्विशेष सामान्य असत्व में प्रमाण का अभिधान नहीं कर सकते हैं। और यदि मात्रशब्द का उपादान, विशेष के होने पर भी असत्व के सामान्यधर्म के पुरस्कार से विरोध के प्रदर्शन के अर्थ है, तो भाव और प्रध्वंस के भी सामान्यरूप से विरोध होने से अधिकरण का भेद हो जायगा, कारण

सादौ विशेषे सामान्यरूपस्यावश्याभ्युपगम्यत्वात्तदादायैव विशेषे विरोधपर्यवसानात् ॥ ६७ ॥

भावाभावयोर्विरोधानभ्युपगमे तवाऽप्यनिष्टापत्तिरिति चेत् केयमापत्तिः। तर्कभेद इति चेत्, अथ कस्तर्कः? अभ्युपगतव्याप्यं प्रति व्यापकप्रसञ्जनं सः तत्प्रसंजनं च स्वीकारार्हताबोधनमिति चेन्न, अव्याप्तेः। अस्ति ह्यप्रसङ्गोऽपि सम्भावना नाम तर्कः। तद्यथा—यदि जलं सहकारिभिः सम्पत्स्यते तदा मे तृषं शमयिष्यतीति, इष्टापादनेऽपि गतत्वाच्च। अनभ्युपगतव्यापकमित्यपीति चेन्न, तथाभूतमपि प्रत्यव्याप्याद्व्यापकप्रसञ्जने गतत्वात्। व्याप्येनेत्यपिकार्यमिति चेन्न, विकल्पासहत्वात्। किं परमार्थतो व्याप्यव्यापकभावव्यवस्थितयोः, स्वरूपेणेष्टानिष्टत्वमुत व्याप्यव्यापकयोर्भावेन तत्।

कि प्रध्वंसआदि विशेष में सामान्यरूप के अवश्य होने से उस सामान्यरूप का ग्रहण कर ही विशेष [प्रध्वंसादि] में विरोध का पर्य्यवसान हो जायगा ॥ ६७ ॥

इति भावअभाव का विरोधनिर्वचनखण्डन।

अथ तर्कलक्षणखण्डन

भाव और अभाव के विरोध को न मानने पर आपके प्रति भी अनिष्ट की आपत्ति हो जायगी। अद्वैत से द्वैत का प्रतिक्षेप नहीं होगा, क्योंकि इनमें विरोध न रहा।

प्रश्न—आपत्ति क्या वस्तु है? यदि तर्कभेद है, तो तर्क ही क्या वस्तु है?

निर्वचन—जो व्याप्य का स्वीकार करते हों उनके प्रति व्यापक का प्रसञ्जन तर्क है, और व्यापक की स्वीकारार्हता का बोध ही व्यापक का प्रसञ्जन है।

खण्डन—इस लक्षण की "यदि जल सहकारी से सम्पन्न (पीत) होगा, तो मेरी पिपासा की निवृत्ति करेगा, इस प्रसङ्गरूप सम्भावना तर्क में अव्याप्ति हो जायगी। यदि कहें, कि प्रसङ्गरूप तर्क का ही यह लक्षण है सम्भावना तर्क का लक्षण नहीं है, अतः सम्भावना के लक्ष्य न होने से उसमें अव्याप्ति नहीं है, तो जहां व्यापक वह्नि इष्ट (प्रथम से सिद्ध) है वहां "यदि धूम है, तो वह्नि अवश्य है" इत्यादि इष्टापादनरूप तर्काभासस्थल में अतिव्याप्ति हो जायगी।

समर्थन—जो व्याप्य का स्वीकार करता और व्यापक का स्वीकार न करता हो ऐसे पुरुष के प्रति व्यापक का प्रसञ्जन तर्क है।

खण्डन—उस पुरुष के प्रति भी "यदि इन्धन है, तो वह्नि अवश्य है" इस स्थल में (जहां अव्याप्य से व्यापक का प्रसञ्जन है) अतिव्याप्ति हो जायगी।

समर्थन—उक्त लक्षण में व्याप्य से व्यापक का प्रसञ्जन तर्क है, ऐसा निवेश करने से उक्त स्थल में अतिव्याप्ति नहीं।

खण्डन—यह लक्षण भी विकल्प के असमर्थ होने से अयुक्त है। देखिये—क्या वस्तुभूत व्याप्यव्यापकभाव जिनमें हो उनका स्वरूप से अभ्युपगम अनभ्युपगम लक्षण का घटक है? अथवा व्याप्यत्वरूप से व्यापकत्वरूपसे अभ्युपगम अनभ्युगम लक्षण में प्रविष्ट है? इनमें प्रथम पक्ष युक्त नहीं है, कारण कि जहां धूम और वह्नि का वस्तुतः विद्यमान भी व्याप्य-

नाद्यः, तथात्वाज्ञानेन वैपरीत्येनेष्टेनापि प्रसञ्जने प्रसङ्गात्। अन्यथा परैस्तथात्वेनानङ्गीकृतेन स्वयमपि परान्प्रति तथात्वेन व्युत्पादयितुमशक्तेन परमार्थतस्तथाभूतेन प्रसञ्जने जयप्रसङ्गात् ॥ ६८ ॥

न द्वितीयः, स्वयमपि तथेष्टानिष्टतायां सत्यां कृते तादृशि प्रसङ्गे "यत्रोभयो" रित्यादिना दोषेण सत्प्रसङ्गतयाऽनिष्टेऽपि गततयाऽतिव्यापकत्वात्। स्वयं व्याप्यतयाऽनिष्टेनेत्यपि विशेषणीयमितिचेन्न, स्वयमपि व्याप्यतयेष्टेन स्वमात्रेष्टव्यापके विषये

व्यापकभाव ज्ञात नहीं है वहां भी धूम से वह्नि का प्रसञ्जन तर्क हो जायगा। और अन्यतर के प्रति व्याप्ति की असिद्धि से शिथिल मूल होने से वह तर्काऽऽभास है। तर्क नहीं है, अतः उक्त स्थल में अतिव्याप्ति हो जायगी। किञ्च जहां धूम में ही व्यापकत्व का तथा वह्नि में व्याप्यत्व का भ्रम है वहां भी वस्तुतः धूम के व्याप्य होने से धूम के अभ्युगम से वह्नि का प्रसञ्जन तर्क हो जायगा। किञ्च यदि वस्तुभूत ही व्याप्यत्व व्यापकत्व को प्रसङ्ग का मूल मानें, तो वादी जहां व्याप्यव्यापकभाव को नहीं मानता है और वादी के सामने स्वयं भी व्याप्यव्यापकभाव का प्रतिपादन नहीं कर सकता है वस्तुतः व्याप्यव्यापकभाव है। वहां भी व्याप्य से व्यापक के प्रसङ्ग से प्रतिवादी का विजय हो जायगा। किन्तु होता है वहां पराजय ॥६८॥

द्वितीय कल्प भी युक्त नहीं है कारण कि (यहां वादी के तुल्य आप भी) व्याप्य का अभ्युपगम और व्यापक का अनभ्युपगम करता हो वहां "यदि सत्ता सद्व्यवहार विषय हो तो सत्तावती हो जायगी। इस प्रसङ्ग में अतिव्याप्ति हो जायगी। और स्वमत में भी सत्ता में सत्ता के अनिष्ट होने से यह तर्काभास है तर्क है नहीं, कारण कि "यत्रोभयोः समो दोषः" इस न्याय के अनुसार जो दोष दोनों मत में है उसका एक मत में आपादन कर नहीं सकते।

समर्थन—जिस पुरुष ने व्याप्य का स्वीकार किया हो और वही व्यापक का अस्वीकार करता हो उसके प्रति स्व से अस्वीकृत व्याप्य से व्यापक का प्रसञ्जन तर्क और यदि सत्ता सद्व्यवहार विषय हो, तो सत्तावती हो जायगी। इस स्थल में सत्ता में सद्व्यवहार विषयत्वरूप व्याप्य स्व से इष्ट ही है, अनिष्ट नहीं है, अतः अतिव्याप्ति नहीं।

खण्डन—स्व से व्याप्यत्वरूप से इष्ट प्रमेयत्व से स्वमात्र से [ईश्वरादि प्रत्यक्ष विषय होने से] इष्ट प्रत्यक्षरूप व्यापक का जहां अदृष्ट में मीमांसक के प्रति नैयायिक "यदि अदृष्ट प्रमेय हो तो प्रत्यक्ष हो जायगा" ऐसा प्रसञ्जन करता हो वहां अव्याप्ति हो जायगी, कारण कि उक्त स्थल में व्याप्य स्व से अनिष्ट नहीं है, अतः उक्त लक्षण का समन्वय नहीं होता है।

समर्थन—स्व से अनिष्ट व्यापक का स्व से इष्ट व्याप्य से जो प्रसञ्जन उससे भिन्न [अनभ्युपगत है व्यापक जिस पुरुष से उसके प्रति पर से अभ्युपगत व्याप्य से व्यापक का] प्रसञ्जन तर्क है। और "यदि सत्ता सद्व्यवहार विषय हो, तो सत्तावती हो जायगी" इस असत् प्रसङ्ग में स्व से भी अनिष्ट व्यापक के स्व से इष्ट व्याप्य से प्रसङ्ग होने से भिन्न पर्य्यन्त निवेश से अतिव्याप्ति नहीं होगी। "स्व से अस्वीकृत व्याप्य से" इस अंश के त्याग से "यदि अदृष्ट प्रमेय हो, तो प्रत्यक्ष हो जायगा" इस सत्प्रसङ्ग में अव्याप्ति नहीं होगी।

प्रसङ्गस्याऽव्यापनात्। अथ स्वयमनिष्टव्यापके स्वयं व्याप्यतयेष्टेन यत्र भवति तत्रानभ्युपगतव्यापकं परं प्रति पराभ्युपगतेन व्याप्येन व्यापकप्रसञ्जनं तर्कः, एवं सति हि स्वानिष्टव्यापके स्वयमिष्टव्याप्येन यत्र प्रसङ्गस्तत्रगमनादतिव्याप्तिर्या या च स्वमात्रेष्टव्यापके स्वयमपि व्याप्यतयेष्टेन प्रसङ्गस्याव्याप्तिस्ते निरस्ते भवत इति चेन्न, यद्यत्र सत्तयाऽपि घटोऽभविष्यत्तदाऽद्रक्ष्यदित्याद्यव्यापना तत्र स्वयमनिष्टदर्शनरूपव्यापके स्वयं व्याप्यतयेष्टेनैवहि दर्शनयोग्येन घटसत्त्वेनाऽप्रसङ्गः। अथ तत्र सत्तयाऽपि स्वयमिष्टेनेति निषेध्यकोटौ प्रविश्य निषेधोऽभिधीयते, एवं यत्र भवतीति। तदपि न। एवम्भूते एव विपर्ययापर्यवसायिनि गततयाऽतिव्यापकत्वात्। विपर्ययपर्यवसायिनेत्यपि प्रक्षेप्यमिति चेन्न, केवलपरपक्षदूषणाय परमात्राभ्युपगम्यगानव्याप्यत्वेनैवं क्षमस्य परं प्रति व्यापकप्रसञ्जनस्याव्यापनात्। तत्र स्वयं व्याप्त्यनभ्युपगमेन विपर्ययपर्यवसायित्वाऽसम्भवात् ॥ ६६ ॥

स प्रसङ्ग एव न भवति विरोधमात्रं तदिति चेन्न, अनिष्टं व्याप्याभ्युपगमबलेन परं प्रत्यापाद्यत इत्येवम्भूतस्यार्थस्योभयत्राऽपि तुल्यत्वात्। तुल्यत्वेपि लक्षणकरणासामर्थ्याद्यदि विपर्ययपर्यवसायिन्येव प्रसङ्गत्वं त्वया परिभाष्येत तर्हि मया

कारण कि स्व (नैयायिक) से अदृष्ट में या व्यापक (प्रत्यक्ष) के इष्ट होने से भिन्नान्त लक्षण भी समन्वित हो जायगा।

खण्डन—"यदि यहां घट विद्यमान होता तो दीखता" इस प्रसङ्ग में अव्याप्ति हो जायगी, कारण कि यहां स्व से इष्ट वह सत्त्वरूप व्याप्य से ही स्व से अनिष्ट दर्शनरूप व्यापक का प्रसञ्जन होने से भिन्नान्त लक्षणभाग समन्वित नहीं होता है।

समर्थन—स्व से अनिष्ट व्यापक का स्व से सत्त्वरूप से तथा व्याप्यत्वरूप से जो इष्ट उससे जो प्रसञ्जन उससे भिन्न का लक्षण में निवेश होने से उक्त स्थल में अव्याप्ति नहीं होगी, कारण कि उक्त स्थल में स्व से सत्त्वरूप से घट के इष्ट न होने से भिन्नान्त का समन्वय नहीं होता है।

खण्डन—ऐसा निवेश होने पर "यदि ब्रह्म वेदैकगम्य हो, तो अग्निहोत्र के तुल्य अस्वप्रकाश हो जायगा" इस [विपर्य्यय में अपर्य्यवसान से] असत्प्रसङ्ग में अतिव्याप्ति हो जायगी।

समर्थन—उक्त लक्षण के विशेष्य दल में विपर्ययपर्य्यवसायी ऐसा विशेषण देने से अतिव्याप्ति नहीं होगी।

खण्डन—उक्त विशेषण देने पर केवल परपक्ष के दूषण के अर्थ पर से अभ्युपगत-व्याप्य से परपक्ष के दूषण में क्षम [व्यापक का पर के प्रति] प्रसञ्जन में अव्याप्ति हो जायगी। अर्थात् यदि ब्रह्म को जगत् का उपादान मानें, तो मट्टी के तुल्य विकारी हो जायगा, इस सत्प्रसङ्ग में अव्याप्ति हो जायगी, कारण कि नैयायिक के मत में निर्विकार आकाश के उपादान होनेसे यहां विपर्य्य में पर्य्यवसान नहीं है ॥ ६६ ॥

समर्थन—यदि ब्रह्म को उपादान मानें, तो विकारी हो जायगा, ऐसा प्रसञ्जन उक्त स्थल में (विपर्य्यय में अपर्य्यवसान होने से) नहीं करते किन्तु उपादानत्वरूप व्याप्य ब्रह्म में

परबाधमात्र एव प्रसङ्गताया विपर्ययपर्यवसायिनि तु तत्र विरोधतायाः परिभाषितुं शक्यत्वादन्यथा विरोधत्वमेवोभयोरपि स्यात् । प्रत्यवस्थानवैचित्री चेत्तत्र विरोधाद्विशेषः साऽत्रापि तुल्यैव । अतएव सम्भावनाऽपि तर्कादन्यैवेति निरस्तम् । आरोपादपि व्याप्यतानिमित्तव्यापकाभ्युपगमाविशेषात् । अतएव परप्रमितेनेति विशिष्य परानिष्टापादनमात्ररूपविपर्ययापर्यवसायितर्कता निरस्येति निरस्तम् । परमार्थतो व्याप्त्यभावेऽपि पराभ्युपगममादाय प्रसङ्गप्रवृत्तेरुपपत्तेः । कथं हि परेण व्याप्यतयाऽनुमतात्त्वं प्रति व्यापकानुमत्या नापतितव्यं, नहि प्रसङ्गो वास्तवत्वं व्याप्तेरवलम्बते । किं नाम ? अभ्युपगममात्रम् । अनभ्युपगतौ वस्तुगत्या स्थितेनाऽपि तेनापादनाप्रवृत्तेः । अत एव परस्य प्रमाणेन व्याप्यानुमतिमुत्पाद्याप्यापादनं क्रियते ॥ ७० ॥

है, तो व्यापक (विकारित्व) न होने में विरोध होगा, इस रीति से केवल विरोध का उद्भावन ही करते हैं ।

खण्डन—व्याप्य के अभ्युपगम से पर के प्रति अनिष्ट (व्यापक) का प्रतिपादनरूप अर्थ दोनों स्थलों में तुल्य है । दोनों स्थलों में तुल्य प्रसङ्ग होने पर भी लक्षणकरण में असामर्थ्य से यदि विपर्य्यय में, पर्य्यवसान स्थल में ही प्रसङ्गत्व का व्यवस्थापन आप करें, तो हम भी केवल जहां परपक्ष का बाध है वहां प्रसङ्गत्व का और जहां विपर्य्य में पर्य्यवसान है वहां विरोध की परिभाषा (संकेत) कर सकते हैं । अन्यथा (यदि हमारी परिभाषा को न मानें) तो दोनों स्थल में विरोध को ही मानिये । यदि कहें, कि विपर्य्यय में पर्य्यवसानरूप [विरोध से] विशेष वहां है, तो पराभ्युपगत व्याप्य से अनिष्ट व्यापक के प्रसञ्जन के दोनों स्थलों में तुल्य होने से उक्त वैचित्र्य अकिञ्चित्कर है ऐसा हम भी कह सकते हैं । यदि " जलसहकारी से सम्पन्न हो तो तृषा की शान्ति करे " यह सम्भावना प्रसङ्ग रूप न होने से तर्क नहीं है, यह कथन भी युक्त नहीं है, कारण कि सम्भावना के आरोपरूप होने पर भी व्याप्य के अभ्युपगम से व्यापक के अभ्युपगम में दोनों स्थलों में कोई विशेष नहीं है । "पराभ्युपगत व्याप्य से" इसके स्थान में "परप्रमित व्याप्य" ऐसा निवेश कर पर के प्रति अनिष्ट का जहां आपादन है, विपर्य्यय में पर्यवसान नहीं है, वहां तर्कलक्षण की अतिव्याप्ति का निरास करना चाहिये—यह कथन भी अयुक्त है, कारण कि जहां विपर्य्यय में अपर्यवसान है वहां परमार्थ से व्याप्ति न होने पर भी पर के अभ्युपगममात्र से यदि अनिष्ट का प्रसङ्ग है तब उसको अलक्ष्य जानना अयुक्त है । जब उक्तस्थल में परव्याप्य का अभ्युपगम करता है तब पर के प्रति व्यापक का आपादन क्यों न हो, कारण कि प्रसङ्ग, व्याप्ति के वास्तवत्व की अपेक्षा नहीं करता है किन्तु व्याप्ति के अभ्युपगम मात्र की अपेक्षा करता है, कारण कि यदि व्याप्ति का अभ्युपगम न हो, तो वस्तुतः स्थित व्याप्ति से भी प्रसङ्ग नहीं होता है । इसी से जहां वादी विशिष्ट व्याप्ति को नहीं मानता है वहां पर के प्रति व्याप्य की अनुमिति कर व्यापक का आपादन किया जाता है ।

समर्थन—वस्तुतः व्याप्ति और व्याप्ति का अभ्युपगम दोनों प्रसङ्ग के कारण हैं, अतः जहां वस्तुतः व्याप्ति नहीं है वहां विरोधमात्र है, प्रसङ्ग नहीं है ॥७०॥

वस्तुगत्या व्याप्यत्वं तथात्वेनाभ्युपगतत्वं च द्वयमपि प्रसङ्गस्याङ्गमिति चेन्न, तथात्त्वेनाभ्युपगमस्यावश्यं प्रसङ्गाङ्गतया मन्तव्यस्य परानपेक्षस्यैव समर्थत्वे वास्तवव्याप्तत्वस्यापि प्रवेशने प्रमाणाभावात्। तस्माद्यः प्रसङ्गः स्वपक्षसिद्ध्यङ्गं तस्य विपर्ययापर्यवसायिता दोषायैव स्यात्। प्रसङ्गस्य तस्य विपर्ययपर्यवसानदार्ढ्यार्थं दण्डतयोपन्यासात्। सौगतानां सत्त्वक्षणिकत्वव्याप्तिसाधकविपर्ययान्यथाभावदण्डप्रसङ्गवत् तामन्तरेण तस्य स्वपक्षसाधनाक्षमत्वात्तस्य च व्याप्तिवास्तवत्वमपि मन्तव्यमन्यथा विपर्ययेऽपि व्याप्त्यभावेन स्वपक्षसाधनाक्षमत्वादेव। यस्तु प्रसङ्गः परपक्षबाधनाङ्गं तत्र पराभ्युपगममात्रं प्रयोजकं तावतैव परपक्षप्रतिक्षेपसत्वेन वास्तवव्याप्तिविपर्ययपर्यवसानपर्यन्तानानुसारित्वादिति युक्तं पश्यामः, तथा च सति कथितलक्षणासङ्गतिस्तदवस्थैव ॥७१॥

अथ व्याप्याभ्युपगमेनानिष्टस्य व्यापकस्य प्रतीतिस्तर्क इति चेन्न, इष्टार्थसम्भावनायामव्याप्तेः। तेन व्यापकस्य प्रतीतिः स इति चेन्न, इष्टापादनेऽपि गतत्वात्।

खण्डन—व्याप्यत्वरूप से व्याप्य के अभ्युपगम को अवश्य प्रसङ्ग का कारण मानेंगे, फिर जब पर की अनपेक्षा से वह प्रसङ्ग में समर्थ है तब वास्तव व्याप्ति को प्रसङ्ग के कारण मानने में कुछ प्रमाण नहीं है। तस्मात् जो प्रसङ्ग स्व पक्ष की सिद्धि का अङ्ग है उस प्रसङ्ग के विपर्य्यय में अपर्य्यवसान दोष ही है; कारण कि उस प्रसङ्ग का [विपर्य्यय में पर्यवसानरूप स्वपक्ष की दृढ़ता के अर्थ विपक्ष के बाधनार्थ दण्डरूप से] उपन्यास है। बौद्धों के मत में सत्व में क्षणिकत्व की व्याप्ति के साधन के अर्थ सत्व रहे क्षणिकत्व न रहे" इस व्यभिचार की शङ्का के बाधन के लिये यदि क्षणिकत्व न हो, तो सत्व भी नहीं रहेगा" इस प्रसङ्ग के तुल्य। कारण कि यावत् विपर्यय में पर्यवसान न हो तावत् वह प्रसङ्ग स्व पक्ष के साधन में समर्थ नहीं हो सकता है। और वहां वास्तव व्याप्ति को भी मानना चाहिये। अन्यथा विपर्य्यय में भी न होने से स्वपक्ष का साधन भी नहीं होगा। और जो प्रसङ्ग परपक्ष के बाधन के कारण हैं उन प्रसङ्गों का पर का [व्यापत्व रूप से व्याप्य का] अभ्युगममात्र कारण है। कारण कि पर के अभ्युपगम मात्र से ही परपक्ष के खण्डन होने से वास्तविक व्याप्ति और विपर्य्ययपर्य्यवसान के अनुसरण में कुछ फल न होने से व्याप्तिआदि के अननुसरण ही को युक्त देखते हैं। और ऐसा मानने पर तर्कलक्षण में विपर्य्ययपर्य्यवसायी यह विशेषण यदि दें, तो "यदि ब्रह्म उपादान हो तो विकारी हो जायगा" इस स्थल में [जहां विपर्य्यय में पर्य्यवसान नहीं है वहां] अव्याप्ति हो जायगी ॥७१॥

समर्थन—व्याप्य के अभ्युपगम से अनिष्ट व्यापक को प्रतीति तर्क है।

खण्डन—"यदि जल सहकारी से सम्पन्न हो, तो तृषा की शान्ति करे" यहां अव्याप्ति हो जायगी। यदि "अनिष्ट" इस विशेषण का उपादान न करें, तब भी जहां इष्ट वह्नि का धूम से आपादन है वहां अतिव्याप्ति हो जायगी।

समर्थन—व्याप्य के अभ्युपगम से अप्रमित व्यापक की प्रतीति तर्क है।

खण्डन—धूम से वह्नि की प्रथम अनुमिति में अतिव्याप्ति हो जायगी, कारण कि वह्नि अनुमिति से पूर्व अप्रमित ही है।

समर्थन—अनुमान स्थल में धूम की प्रमा से वह्नि की अनुमिति होती है अभ्युपगम से नहीं होती है और लक्षण में अभ्युपगम का निवेश है, अतः अतिव्याप्ति नहीं होगी।

अप्रमितस्य तथेति चेन्न, प्रथमानुमानेऽपि गतत्वात्। अनुमाने व्याप्यस्य प्रमया तथात्वानभ्युपगमेनेति चेन्न, वस्तुगत्या व्याप्यस्य प्रमयाऽपि प्रतिवाद्यसिद्धस्य व्यापकानुमानासम्भवेन तत्राप्यभ्युपगमपर्यन्तं गन्तव्यत्वादेव। नन्वेमन्यतरासिद्धिं व्याप्यं प्रसाध्यानुमानव्यवस्थापनमुच्छिन्नं तदप्रसाधनेऽन्यतरासिद्ध्या तत्प्रसाधने परस्याभ्युपगन्तुरपसिद्धान्तादपसिद्धान्तमनुद्भाव्य वादिना प्रसाधितात् व्याप्यात् व्यापकसाधने पर्यनुयोज्योपेक्षणादिति किं तत्र तथा न स्यात्किमत्राप्रस्तुतया तच्चिन्तया। अन्यतरासिद्धस्य तावद्व्याप्यस्याभ्युपगमं परेणाकारयित्वैव न व्यापकसाधनमुपेयं तस्याऽप्रमा स इति चेन्न, मिथो विरुद्धादौ तर्काभासेऽपि गतत्वात्। आश्रयासिद्ध्यादिव्यतिरेके सतीति चेन्न, सन्दिग्धधूमदर्शनात्। यद्यत्र धूमस्तदाऽग्निमानिति सम्भावनायाः परमार्थतस्तथार्थावस्थानात्। प्रमात्वं त्यक्तुमपारयन्त्या अव्यापनात्। तत्कालं प्रमात्वेनाप्रमीयमाण

खण्डन—वस्तुतः जहां व्याप्ति की प्रमा तो है परन्तु प्रतिवादी व्याप्य का अभ्युपगम नहीं करता हो वहां अनुमान नहीं होता है, अतः अनुमिति में भी व्याप्य के अभ्युपगम को ही कारण मानना चाहिये।

समर्थन—यदि अनुमिति में व्याप्ति के अभ्युपगम को कारण मानें, तो अन्यतर के प्रति असिद्ध व्याप्य का प्रसाधन कर अनुमिति के साधन की रीति का उच्छेद हो जायगा। कारण कि यदि व्याप्य का साधन न करें, तो व्याप्य को अन्यतर के प्रति असिद्धि होने से अनुमिति नहीं होगी और यदि साधन करें, तो पर के व्याप्य के अभ्युपगम से अपसिद्धान्त हो जायगा। अतः अपसिद्धान्त को छोड़ कर वादी से साधित व्याप्य से व्यापक के साधन में पर्य्यनुयोज्य अपसिद्धान्त का उपेक्षणरूप निग्रह हो जायगा।

खण्डन—अन्यतरासिद्ध व्याप्यस्थल में उक्त प्रकार से अनुमान का उच्छेद अवश्य हो जायगा। परन्तु उस अप्रस्तुत की चिन्ता से यहां क्या लाभ है। अन्यतर के प्रति असिद्ध व्याप्य का अभ्युपगम के विना कराये व्यापक का साधन स्वीकर्तव्य नहीं है, अतः उस अनुमिति में तर्कलक्षण की अव्याप्ति हो जायगी।

समर्थन—व्याप्य के अभ्युपगम से अप्रमित व्यापक की अप्रमा तर्क है।

खण्डन—मिथोविरुद्धआदि तर्काभास में अतिव्याप्ति हो जायगी। अर्थात् यदि शुक्ति रूप्य की प्रतीति हो, तो वह सत् हो जायगा और सत् होने पर भी यदि बाध मानें, तो असत् हो जायगा। इस सत् असत् के मिथो विरोधरूप तर्काभास में अतिव्याप्ति हो जायगी।

समर्थन—मिथोविरुद्धादि भिन्नत्व के निवेश से उक्त स्थल में अतिव्याप्ति नहीं होगी।

खण्डन—संदिग्ध धूम दर्शन से जहां "यदि यहां धूम है तो अग्नि भी है" ऐसी सम्भावना होती है। वस्तुतः वह्नि होने से प्रमारूप उस सम्भावना में अव्याप्ति हो जायगी।

समर्थन—व्याप्य के अभ्युपगम से व्यापक की [उस काल में प्रमात्वरूप से अप्रमीयमाण] प्रतीति तर्क है।

खण्डन—यह लक्षण भी उस शब्द से घटित होने से अननुगतत्वरूप दोष से तथा वादी से प्रमितत्वरूप से अप्रमीयमाण वा प्रतिवादी से इस विकल्प से कवलित होने से असङ्गत है। किञ्च जहां सत्ता में दोनों के व्यापक (सत्ता) अनिष्ट है और व्याप्य इष्ट है

इत्यपीति चेन्न, बहुशो दत्तोत्तरत्वात्। सर्वस्य चाऽस्य पूर्वोक्तोभयानिष्टव्यापकेष्टव्याप्योदाहरणे गतत्वेनातिव्यापकत्वात्। तद्व्यवच्छेदार्थमारोपितस्य व्याप्यस्याभ्युपगमेनेति करणे च सिद्धेन व्याप्येन प्रसङ्गस्याव्यापनात्। तद्यथा कार्यत्वात् यद्यदृष्टसृष्टमङ्कुरादि मीमांसकः शंसति तदानीमविशेषणकर्तृकार्यमपि पर्यवस्येत् अस्य तदिति॥ ७२॥

अपि चात्माश्रयोऽन्योन्याश्रयश्चक्रकं व्याघातोऽनवस्था प्रतिबन्दी चेत्यापाद्यभिद्यमाना षट्तर्कीष्यते। स्वरूपं चैषां स्वस्याव्यवहितस्वापेक्षणमात्माश्रयः अन्योन्यस्याऽव्यवहितान्योन्यापेक्षित्वमन्योन्याश्रयः, अन्तरितस्य तदेव द्वयमात्माश्रयोऽन्योन्याश्रयश्चक्रकं, विरुद्धः समुच्चयो व्याघातः, उपपाद्योपपादकप्रवाहोऽनवधिरनवस्था, स्वाभ्युपगतदोषतुल्यता प्रतिबन्दी॥ ७३॥

तत्राऽऽत्माश्रयस्य सम्बन्धद्वारभेदादाभासत्वं, यथा प्रमेयत्वस्यात्मनि वृत्तौ, क्वचिन्नैवमपि यथाऽऽनेककालस्थस्य घटस्य पूर्वकालवृत्त्यात्मन उत्तरकालवृत्त्यात्मानं प्रति

वहां (यदि सत्ता सद् व्यवहार विषय हो, तो सात्तावती हो जायगी) इस असत्प्रसङ्ग में अतिव्याप्ति हो जायगी।

समर्थन—आरोपित व्याप्य के अभ्युपगम से व्यापक की प्रतीति तर्क है और उक्त स्थल में व्याप्य का आरोप नहीं है, किन्तु विद्यमानता है, अतः अतिव्याप्ति नहीं।

खण्डन—यदि उक्त लक्षण में आरोपितत्व व्यापक विशेषण दें, तो जहाँ मीमांसक के प्रति नैयायिक अंकुरादि में विद्यमान कार्य्यत्वरूप व्याप्य से कर्तृसृष्टत्वरूप व्यापक का (यदि अङ्कुरादि कार्य्य है तो अदृष्ट सृष्ट के तुल्य कर्तृजन्य भी है) ऐसा प्रसङ्ग करता है उस में अव्याप्ति हो जायगी॥७२॥

किञ्च—आत्माश्रय, अन्योन्याश्रय, चक्रक, व्याघात [अनवस्था प्रतिबन्दी, आपाद्य विषय के भेद से भिन्नरूप] षट्तर्क इष्ट है इनमें आत्माश्रय स्व से अव्यवधान से स्व की अपेक्षारूप है। अन्योन्याश्रय अन्योन्य से अव्यवधान से अन्योन्य की अपेक्षा रूप है। व्यवधान से स्व से स्व की अपेक्षा वा व्यवधान से अन्योन्य से अन्योन्य की अपेक्षारूप चक्रक है। विरुद्ध दो धर्मों का एक धर्मी में समुच्चय व्याघात है। अवधि से रहित उपपाद्य उपपादक का प्रवाह अनवस्था है। स्व (वादी) से दत्त दोष की वादी के मत में तुल्यता प्रतिबन्दी है॥ ७३॥

-उनमें सम्बन्धरूप द्वार के भेद से आत्माश्रयदोष आभास है जैसे प्रमेयत्व में प्रमेयत्व के वृत्तित्व में अर्थात् घट में प्रमेयत्व घट प्रमाविषयत्वरूप है और प्रमेयत्व में प्रमेयत्वप्रकारक प्रमाविषयत्वरूप है अतः घटप्रमा प्रमेयत्वप्रमा-रूप द्वार के भेद से आत्माश्रय दोष नहीं होता है। और कहीं कहीं आत्माश्रय आभास नहीं होता है, किन्तु दोष होता है, जैसे अनेककालवृत्तिघट की पूर्वकालवृत्ति आत्मा (स्व) के [उत्तरकालवृत्ति आत्मा के कारणत्व में] व्यक्ति-भेद से अन्योन्याश्रय भी कहीं कहीं आभास होता है जैसे ज्ञान से संस्कार की उत्पत्ति और संस्कार से ज्ञान की उत्पत्ति में। यहां अनुभवरूप ज्ञान से संस्कार उत्पन्न होता है और स्मरणरूप ज्ञान को उत्पन्न करता है, अतः व्यक्ति भेद होने से अन्योन्याश्रय दोष नहीं होता है किन्तु आभास है। चक्रक भी व्यक्ति-भेद से आभास होता है, जैसे बीज

कारणत्वे । अन्योन्याश्रयस्य व्यक्तिभेदात्, यथा-ज्ञानेन संस्कारस्य तेन च ज्ञानस्य जनने । चक्रकस्यापि तस्मात्, यथा-बीजेनाङ्कुरस्तेन स्तम्बः तेन बीजं जन्यत इत्यत्र । व्याघातस्योपाधिभेदात्, यथा-कालभेदादिना जननाजननादौ । अनवस्थायाः क्रियायै परस्परानन्त्यानपेक्षणात्, यथा सामग्र्या कार्यजननाय स्वसामग्र्यानन्त्यानपेक्षणे । तामेतामधोधावन्तीमनवस्थामाचक्षते । क्वचिन्नैवमपि, यथा-स्वाश्रये भिन्नबुद्धिजननाय स्वगतभेदानुपजीवनादपि भेदस्यानन्त्ये प्राग्लोपादिदोषात् । तामेतामूर्ध्वं धावन्तीमनवस्थामाचक्षते । प्रतिबन्ध्या विशेषात्, यथा धूमानुमानेऽप्युपाधिशङ्काप्रतिबन्द्यां तर्कानुकूलत्वादिति । तदेषामापादनानि तर्काभासाः कथमुक्तलक्षणेन न सङ्ग्राह्याः सत्यपि व्याप्याश्रदोषे प्रसङ्गस्थानगतेन तेन विशेषणेनाभासीभूतत्वात् ॥ ७४ ॥

से अङ्कुर और अङ्कुर से स्तम्ब और स्तम्ब से बीज की उत्पत्ति में । यहां बीजादि व्यक्ति का भेद है । व्याघात भी देश-कालरूप निमित्त भेद से आभास होता है जैसे कुशूल (कोठिला) में स्थित बीज में अजनकत्व और क्षेत्रस्थ बीज में जनकत्वरूप विरुद्ध दो धर्म्म, देश और कालभेद से रहते हैं । अथवा समान देश काल में भी अपेक्षा से एक ही पुरुष में जन्यत्व और जनकत्व विरुद्ध धर्म्म हैं । अतः ऐसे स्थान में व्याघात आभास है । अनवस्था भी कार्य्योत्पत्ति स्थल में आभास होती है । जैसे कार्य्य, सामग्री से और वह सामग्री भी स्वसाम ी से ही उत्पन्न होती है । कारण कि वह कादाचित्क है और जो कादाचित्क होता है वह जन्य होता है । इस प्रकार से एक से एक के जन्य होने से कार्य्य कारण की अनवधि धारा होने पर भी सामग्री के कार्य्य जनन में स्व की अपेक्षा (सहकार) न होने से यह अनवस्था आभास है । इस अनवस्था को नीचे दौड़ने वाली अनवस्था पण्डित लोग कहते हैं । कहीं अनवस्था आभास नहीं भी होती है जैसे स्वाश्रय में स्व से भेद के भेदजनन में अन्य भेद की अपेक्षा और अन्य भेद के स्वाश्रय से भेद जनन में उससे भी अन्य भेद की एवं भेद परम्परा की अपेक्षा में । यदि वस्तुतः भेद के आनन्त्य को मानें, तो प्राग्लोप, अविनिगम्यत्व, प्रमाणाभाव ये तीन दोष हो जायेंगे । अतः यहां अनवस्था दोष अनाभास है और अनवस्था दोष होने से भेदानन्त्य अप्रामाणिक है । अर्थात् प्रथम भेद से ही (स्वाश्रय में भेदान्तर के बिना ही) भेद-बुद्धि उत्पन्न होती है जैसे सत्ता में अन्य सत्ता के बिना भी सत् बुद्धि होती है । इस अनवस्था को उर्द्ध दौड़ने वाली अनवस्था पण्डित लोग कहते हैं । प्रतिबन्दी एक पक्ष में अनुकूल तर्क के रहने से आभास होती है । जैसे "अनित्यः शब्दः कृतकत्वात्" यह अनुमिति [उपाधि शङ्का होने से मीमांसक के मत में] संदिग्धोपाधि है । यदि नैयायिक यहां "यदि संदिग्धोपाधित्वं दोषः स्यात्तदाधूमानुमितावपि स्यात्" इस प्रकार से प्रतिबन्दी दे, तो मीमांसक कह सकता है कि धूमानुमिति में कार्य्यकारणभावरूप विशेष (तर्क) है, अतः यह प्रतिबन्दी आभास है। इन [आत्माश्रय आदि के] आभासों में उक्त तर्कलक्षण की अतिव्याप्ति हो जायगी। जो वस्तु है वह स्वाश्रय नहीं है । और परस्परापत्तिसिद्धिक भी नहीं है इत्यादि व्याप्ति होने से ये सब तर्क ही हैं, ऐसा नहीं कह सकते हैं, कारण कि सम्बन्धद्वारआदि भेद से उक्त व्याप्ति के आभासत्व का प्रतिपादन कर आये हैं ॥ ७४ ॥

प्रसङ्गस्थाने तावतां विशेषणानामभावेनाऽपि लक्षणं विशेषणीयमिति चेन्न, अन्योन्याश्रयाभासत्वप्रयोजकस्य व्यक्तिभेदस्याभावो नानवस्थाया, मैवमात्माश्रयाभासत्त्वप्रयोजकस्य द्वारभेदस्याभावो नात्माश्रयान्तरादाविति व्यक्तमव्यापकत्वापत्तेः। अपि चापसिद्धान्तविरोधादिष्वपि तर्कलक्षणं गच्छत्कथङ्कारं वारणीयं, यत्रैवं निग्रहे तर्कान्तराणामन्तर्भावः तत्रैवानयोरपीति पृथक्निग्रहत्त्वानुपपत्तेः ॥ ७५ ॥

आत्माश्रयादेश्च मूलव्याप्तौ प्रमाणोपगमश्चेत्तर्हि प्रामाणिकत्वान्नदोषत्वं न चेन्मूलशैथिल्यमित्युभयतः पाशबन्धः कथं मोचनीयः। अथोच्येत यदेतदाश्रयत्त्वमाश्रयित्त्वं च तद्भेदे दृष्टं तद्यदि विवादाध्यासिते त्वयोपेयते तदा भेदः स्यादित्याकारेणाऽऽ-

समर्थन—आभासत्व के कारण विशेषणों का जहां अभाव हो, वहां आरोपित व्याप्य से व्यापक का प्रसञ्जनतर्क है, ऐसा निवेश करने से उक्त आभास स्थल में अतिव्याप्ति नहीं होगी।

खण्डन—यदि ऐसा निवेश करें, तो आत्माश्रय के आभासत्व का प्रयोजकसम्बन्ध द्वारभेद ही अन्योन्याश्रय अथवा चक्रक में है उसका अभाव नहीं है, अतः अन्योन्याश्रय आदि में अव्याप्ति हो जायगी। इसी प्रकार से आत्माश्रय का आभासत्वप्रयोजक द्वार (भेद) का अभाव अन्य आत्माश्रय में नहीं है, अतः वहां भी अव्याप्ति हो जायगी।

किंच "यदि संस्कारस्थिरत्वं स्वीकृतं बौद्धेन तदा अपसिद्धान्तः स्यात्" इस अपसिद्धान्त के आपादन में तथा "यदि अस्थिरत्वं कथयित्वा स्थिरत्वं कथ्यते बौद्धेन तदा वचनविरोधःस्यात्" इस वचन विरोध के आपादन में अतिव्याप्ति हो जायगी। यदि उनको तर्क मान लें, तो तर्क में ही आत्माश्रयादि के तुल्य इनकी भी गणना होनी चाहिये। और तर्क होने पर भी यदि इनकी निग्रहस्थान में गणना करें, तो आत्माश्रयादि तर्क की भी निग्रह में ही गणना होनी चाहिये। यदि आत्माश्रयादि का किसी निग्रह में अन्तर्भाव हो तो उस निग्रह में ही अपसिद्धान्त आदि का भी अन्तर्भाव होना चाहिये, पृथक् गणना सर्वथा व्यर्थ है ॥७५॥

किंच आत्माश्रयादि तर्क के मूलव्याप्ति में प्रमाण है कि नहीं? यदि प्रमाण है, तो प्रामाणिक होने से आत्माश्रय को दोष न कहना चाहिये। और यदि व्याप्ति में प्रमाण नहीं है तो मूल के शैथिल्य से वह तर्क ही नहीं है, इस उभयतः पाश (दो तरफा दोष) से पिण्ड कैसे छुड़ायेंगे।

समर्थन—जो आश्रयआश्रयिभाव है, वह भेद में देखा गया है। यदि वह विवादविषय में हो तो भेद हो जायगा—इस प्रकार से यदि आत्माश्रय का आपादन करें, तो उक्त दोष नहीं होगा।

खण्डन—एक ही घट में रूप की अपेक्षा से आश्रयत्व और भूतल की अपेक्षा से आश्रितत्व दोनों के समावेश होने से उक्त प्रकार से आपादन नहीं हो सकता है।

समर्थन—तदाश्रयत्व और तदाश्रितत्व, भेद से नियत हैं, अतः यदि वे विवादविषय में हों तो भेद हो जायगा। इसप्रकार से आपादन में उक्त घटस्थल में व्यभिचार नहीं है।

खण्डन—यह कथन भी लक्षण में तत् और मिथः शब्द के प्रवेश होने से खण्डित है। अर्थात् आत्माश्रयस्थलीय वस्तुमात्र में अनुगत कोई रूप धर्म नहीं है, जिस रूप के पुरस्कार से वस्तुमात्र को तद्शब्द कहें, यदि कथञ्चित् वस्तुमात्र को कहें भी तो उक्त घटस्थल में व्यभिचार

पादने नोक्तदोषापत्तिरिति । मैवम् । एकत्र द्वयस्यापि दृष्टत्वात् । तदाश्रयत्वं तदाश्रितत्वं च मिथो भेदनियतमिति चेन्न, तन्मिथःशब्दाभ्यां चारीकृतत्वात् ॥ ७६ ॥

एतदाश्रयत्वादेतदाश्रितत्वाद्वा नैकत्वं स्यादिति वचनभङ्ग्याऽऽपाद्यमिति चेन्मैवम् । यद्येतदेतदाश्रयादि स्याच्चदैतन्न स्यादिति ह्यापाद्यं, नचैतद्युक्तं धर्म्याऽऽपाद्ययो र्व्याहतत्वात् । नच वाच्यमापाद्यस्य प्रमाणबाध्यताऽनुकूलैवेति व्याघातादपि सा सम्भवन्ती न दोषमर्हतीति, यत आपाद्यापादकयोः सामानाधिकरण्यानादरेऽतिप्रसङ्गः स्यादतो विपर्ययाऽपर्यवसायित्वमेवं स्यात्, एवं हि विपर्ययो वक्तव्यो, यन्नाम ? भवति चैतदेतत्तस्मान्नैतदाश्रय इति । नचैतदेतद्भवितुं शक्नोति एतदित्युद्दिष्टे धर्मिण्येतत्त्वविधानासम्भवादुद्देश्यविधेययोः प्रकारभेदस्याभावात् । न च प्रसङ्गमात्रमेतद्बाधायैवास्तु कृतमस्य विपर्ययपर्यवसानेनेति युक्तम् । स्वयमपि प्रसङ्गमूलस्य व्याप्तेरिष्टतया प्रसञ्जितनिषेधे तद्व्यतिरेकप्रामाणिकत्वस्यावश्यमन्तव्यत्वापत्तेः ॥७७॥

वैसा ही है। और यदि तद् शब्द को एक व्यक्ति परक मानें, तो लक्षण का अनुगम नहीं होगा। एवं मिथः शब्द को यदि एकपरस्परक-व्यक्तिपरक मानें, तो अननुगम हो जायगा ॥७६॥

समर्थन—यदि इसमें एतदाश्रयत्व एतदाश्रितत्व दोनों हों, तो एकत्व न होगा इस प्रकार से आपादन है, अर्थात तद्वा एतद् शब्द एक व्यक्तिपरक ही है तथा लक्ष्य व्यक्ति के भेद से लक्षण का भेद इष्ट ही है। कारण कि लक्षण के भेद होने पर भी लक्ष्य का ज्ञानरूप लक्षण का प्रयोजन सिद्ध हो ही जाता है।

खण्डन—यदि एतत् एतदाश्रय हो तो एतत् एतत् न होगा—यह आप का आपादान हुआ। वह युक्त नहीं है, कारण कि एतत् एतत् न होगा इस कथन में धर्मी (एतत्) और आपाद्य (विधेय) एतद् न इन दोनों में व्याघात हो जायगा।

समर्थन—आत्माश्रयादि जो तर्क परपक्ष के दूषण के लिये ही हैं उनमें आपाद्य के—व्याघातआदि से बाध दोष नहीं है किन्तु गुण है।

खण्डन—एतदाश्रयत्व एतदाश्रितत्व तो आपादक हैं, और अनेकत्व आपाद्य है, इन दोनों के सामाधिकरण्य का यदि अनादर करें, तो एकत्व से अभिमत वस्तुमात्र के एकत्व का भङ्ग हो जायगा। कारण कि अन्यत्र स्थित उक्त आपादक से सर्वत्र भेद का आपादन हो सकेगा। और यदि सामानाधिकरण्य का आदर करें तो विपर्यय में पर्यवसान नहीं होगा। कारण कि विपर्यय में पर्य्यवसान इस प्रकार से करेंगे कि होता है "यह यह" इससे एतदाश्रय नहीं है, और यह हो नहीं सकता है कारण कि एतद् धर्मी में एतत्व का विधान नहीं हो सकता है क्योंकि सर्वत्र उद्देश्य विधेय में प्रकारभेद का नियम है। और यहाँ प्रकार भेद है नहीं।

समर्थन—आत्माश्रयादि केवल परपक्ष के बाध के अर्थ हैं, अतः इनमें विपर्य्यय पर्य्यवसान व्यर्थ है।

खण्डन—आत्माश्रयादि के प्रसङ्ग का मूल व्याप्ति स्व को भी इष्ट है। अतः प्रसञ्जित (अनेकत्व) का निषेध (एकत्व) में तद्व्यतिरेक (व्यतिरेकव्याप्ति) को प्रामाणिक अवश्य मानना चाहिये, कारण कि अन्वयव्याप्ति व्यतिरेकव्याप्ति की व्यापिका होती है और विपर्य्यय पर्य्यवसान के बिना व्यतिरेक व्याप्ति का ग्रह होगा नहीं ॥ ७७ ॥

अतएवैतदन्यत्स्यादित्यपि न शक्यप्रसञ्जनमेतदन्यत्वस्यैतत्स्वरूपभेदमादायैव प्रतीतिपर्यवसायितया प्रसङ्गे व्याघातादेव । विपर्ययोऽप्येतद्विशेषितान्यविशेषितान्यत्व-विधायिनो विशेषणविशेषणताप्रविष्टमात्मानमात्मनि विधीयमानं;न क्षमते-एतदनन्यत्वस्यै-तदन्यान्यत्वस्यैतत्त्वादेव, अन्यत्वावधेरात्मन उपलक्षणत्वे चान्यत्वमात्रमुपलक्ष्यमाण-मन्यस्मादप्यन्यत्वमादाय पर्यवस्येत् । स्वरूपत एव विलक्षणमन्यत्वविशेषमवधिरात्मो-पलक्षयतीति च न घटते यतोऽन्यत्वमात्रमेवावधिविशेषैरुपधीयमानं तदन्यत्वप्रत्यय-व्यवहारोपपादकं भवदन्यत्वव्यक्तिभेदपर्यन्तगमनं प्रमाणस्य न सहते । यदि चान्यत्व-व्यक्तिभेदोऽपि स्यात्तथाऽपि प्रसङ्गमूलभूताव्याप्तिः सामान्याकारपुरस्कारित्वादेतेनैवोप-धीयमानानामन्यत्वव्यक्तीनामैक्यमादाय प्रवृत्ता तथैव प्रसङ्गे विपर्यये चोपनयन्ती स्या-देवोक्तदोषालङ्घनायेति ॥ ७८ ॥

समर्थन—"यदि आश्रयत्व आश्रितत्व दोनों इसमें हों, तो यह इससे अन्य हो जायगा" इस प्रकारसे आत्माश्रय के आपादन में कोई हानि नहीं है।

खण्डन—यह आपादन का प्रकार युक्त नहीं है, कारण कि एतदन्यत्व का भी एतत् स्वरूप के भेद में ही पर्य्यवसान होने से "एतत् एतदन्यत् स्यात्" इस प्रसङ्ग में भी धर्मी और आपाद्य में व्याघात वैसा ही है। और विपर्य्यय में पर्य्यवसान भी, "एतत् एतदन्यत् न" इत्याकारक का एतत् में एतदन्यान्यत्व, विधान करने वाला, विशेषण के विशेषणरूप से प्रविष्ट आत्मा के भी विधीयमानत्व,को नहीं सह सकता है।

समर्थन—"एतत् एतदन्यत् न भवति" इस विपर्य्यय में अन्यत्व में एतत्त्व यदि विशेषण हो तब तो उक्त कथन युक्त न हो परन्तु एतत्त्व उपलक्षण है, अतः उक्त कथन युक्त ही है।

खण्डन—यदि एतद् के अर्थ घट को अन्यत्व में उपलक्षण मानें, तो उद्देश्य घट में पट से अन्यत्व के होने से फिर भी एतत् अन्यत् न इस प्रकार से विपर्य्यय में पर्य्यवसान न होगा।

समर्थन—एतत् अन्यत्वमात्र का उपलक्षण नहीं है किन्तु अन्यत्व विशेष अर्थात् स्वप्रतियोगिक भेद का उपलक्षण है और स्व प्रतियोगिक अन्यत्व के अन्यत्व के—एतत् पद के वाच्य उद्देश्य में—होने से विपर्य्यय में पर्य्यवसान हो जायगा।

खण्डन—तब यह कथन होता यदि प्रतियोगी भेद से अन्यत्व का भेद होता, परन्तु अन्यत्व का भेद है नहीं, कारण कि आकाश के तुल्य अन्यत्व के एक होने पर भी घट पट प्रतियोगीरूप उपाधि के भेद होने से घटाकाश-मठाकाश के तुल्य "घटो न" "मठो न" इत्यादि प्रतीति के भेद की उपपत्ति हो सकती है, फिर प्रतियोगी भेद से अन्यत्व का भेद क्यों मानें, और यदि अन्यत्व व्यक्ति के भेद को किसी प्रकार से मान भी लें, तब भी उपलक्षण कल्प में निर्वाह नहीं है, कारण कि उक्त प्रसङ्ग का मूल (कारण) व्याप्ति सामान्यरूप से अनन्त अन्यत्वव्यक्ति के ऐक्य का ग्रहण कर प्रवृत्त होती है। अतः वह एतत्त्व से उपलक्षित अन्यत्वरूप से प्रसङ्ग तथा विपर्य्यय में प्राप्त होगी, ही होगी, अतः एतत्त्व से उपलक्षित अनन्त अन्यत्व के घट में रहने से प्रसङ्ग अतः उक्त दोष का लंघन नहीं हो सकता। अर्थात् पट के अन्यत्व के घट में रहने से प्रसङ्ग नहीं होगा ॥ ७८ ॥

एवंप्रकारता चाऽऽश्रयाश्रयिभाववत्प्रकारान्तराश्रयेष्वप्यात्माश्रयोदाहरणेऽन्वतिदिश्यते। अन्योन्याश्रयो यथाभेदेनावगताद्भेदज्ञानोपगमे, सोऽपि त्वया कथङ्कारमुपन्यसनीयः। न तावद्यद्येतदेतद्बोधाधीनबोधं स्यात्तदा न बुद्ध्येतेति, तथासति व्याप्त्यसिद्धेः एतद्बोधाधीनबोधं यत्तद्बोधाधीनबोधस्य तस्यैवादृष्टचरत्वात्। क्वचन व्याप्यव्यापकभेदकल्पनया व्यभिचाराप्रतीतचरत्वयो र्वारणेऽप्यतथाभावशङ्काखण्डकदण्डदुर्लभत्वात्। एवमन्योन्याश्रयान्तरेऽपि। चक्रकं च मध्ये परमन्तर्भाव्याऽऽत्माश्रयान्योन्याश्रयावेव विपरिणमत इति तद्दोषं नातिक्रामति ॥ ७९ ॥

व्याघातस्तु यथा सन्नास्तीत्यत्र। तमपि कथं प्रयोक्ष्यसे, यदि यद्ययं सन्न स्यात्तदानीमसन् त्स्यादिति। तर्ह्यसन्न स्यादित्यस्यापि सन्त्स्यादित्यस्मिन्नेवार्थे पर्यवसानादभेदेन व्याप्यव्यापकभावस्यैवाऽसिद्ध्यापत्तिः। स्वभावविरुद्धोपजीविनी च विरुद्धा-

इसी प्रकार से "स्वस्मात् स्वं जायते" इत्यादि आत्माश्रय प्रकार में भी दोष को जानना चाहिये, कारण कि यहां भी "स्व से स्व यदि उत्पन्न हो तो स्व से अन्य हो जायगा ऐसा ही उपपादन प्रकार के होने से व्याघात और विपर्य्यय में पर्य्यवसान नहीं होगा। अन्योन्याश्रय भी [अभाव भाव का प्रतियोगी रूप होने से तथा प्रतियोगी से अनालिङ्गित अभाव की प्रतीति के न होने से भेद के ज्ञान से जात प्रतियोगी के ज्ञान से भेद का ज्ञान और प्रतियोगी के ज्ञान से जात भेद के ज्ञान से प्रतियोगी के ज्ञानस्थल में] है उसका भी उपन्यास आप कैसे करेंगे। यदि भेद, भेद के ज्ञान के अधीन जो प्रतियोगी का ज्ञान उसके अधीन ज्ञान का विषय होता तो ज्ञान का विषय न होता इस प्रकार से प्रसञ्जन तो हो नहीं सकता है। कारण कि प्रतियोगी ज्ञानाधीन ज्ञान विषय भेद अन्यत्र दृष्ट है वा नहीं? यदि दृष्ट है "तो" न बुध्यते, इस आपाद्य (व्यापक) के वहां न होने से व्यभिचार है और यदि नहीं दृष्ट है तो धर्म्मी के अज्ञान से आपाद्य (ज्ञानाविषयत्व) तथा आपादक भेद ज्ञान के अधीन जो प्रतियोगी ज्ञान उसके अधीन ज्ञान के विषयत्व" दोनों के सामानाधिकरण्य न होने से व्याप्ति का ग्रहण नहीं होगा।

समर्थन—जो वस्तु होता है वह परस्पराधीन सिद्धिक नहीं होता है। जैसे घट द्रव्य। इस प्रकार से सामान्यरूप के पुरस्कार से व्याप्ति दृष्ट है। अतः विशेषरूप से भेद के अज्ञान की दशा में भी व्याप्ति का ग्रह हो जायगा और व्यभिचार भी नहीं होगा।

खण्डन—यह भी आपादन का प्रकार युक्त नहीं है। कारण कि "वस्तुत्व रहे और परस्परायत्तबोधत्व का अभाव न रहे हानि क्या है" इस प्रकार से व्यभिचार की शङ्का होने पर उसका निवर्त्तक अनुकूल तर्क नहीं है। इसी प्रकार से अन्य अन्योन्याश्रय में भी दोष को जानना चाहिये। मध्य में अन्य को देकर आत्माश्रय तथा अन्योन्याश्रय ही चक्ररूप से परिणत होता है, अतः चक्रक भी उन दोनों के दोष का उल्लंघन नहीं कर सकता ॥ ७९ ॥

व्याघात भी "सन् नास्ति" इस स्थल में है उसका भी प्रसञ्जन कैसे होगा "यदि यह सत् है तो असत् नहीं है" इस प्रकार से प्रसञ्जन तो हो नहीं सकता है, कारण कि "असन् न" इसका भी फलित अर्थ सत्, यही है और अभेद में व्याप्यव्यापकभाव या उद्देश्यविधेयभाव होता नहीं है। स्वभाव से ही विरुद्ध सत् असत्, के उपजीवन करने वाले अन्य विरुद्धों के खण्डन को सत् असत् के व्याघात के खण्डन से ही जानना चाहिये।

न्तरे तद्व्याघातनिरासादेव निरस्तप्राये । गौर्महिषः ततो न भवति, अगवात्मतानियता यतो महिषात्मतेति, एष हि तयो र्विरोधः । अनवस्था तु यथा सत्तायामपि सत्तान्तरमित्यनवधौ सत्ताप्रवाहे इष्यमाणे, तत्र कथं प्रत्यवस्थेयं, न तावद्यदि सत्तायां सत्ता स्यात्तदा न विश्रान्तिः स्यादिति, सत्तायां सत्ताभ्युपगमस्य विश्रान्त्यभावेन सह व्याप्तिसिद्ध्यसिद्ध्योर्दोषग्रस्तत्वात् । प्रतिबन्दी च खण्डितैव ॥ ८० ॥

किञ्च प्रमेयत्वाभिधेयत्वव्यवहार्यत्वसन्निकर्षवत्त्वाभावप्रतियोगित्वादीनामात्माश्रितत्वदर्शनात् कथमात्माश्रयताखण्डिका व्याप्तिः सव्यभिचारा न स्यात् । द्वारव्यक्तिभेदस्याऽपि व्यभिचारिव्यतिरेकत्वात् । स्वप्रकाशवादिना स्वयमेव स्वज्ञानत्वस्य, एवमभावेऽप्यन्यमभावमस्वीकुर्वता स्वयमेव स्वाभावत्त्वस्य, एवं तदेव ग्राह्यं ग्राहकं चात्मप्रतीतौ, एवं तदेव ज्ञाप्यं ज्ञप्तिकारणं च शब्दो वाचक इत्यत्र, एवं तदेव नाश्यं नाशकं च प्रध्वंसिनि, एवं तदेव सम्बन्धि सम्बन्धश्च स्वभावसम्बन्धोपगमे, इत्यादि बहुलमुपगमादात्माश्रयतदाभासविवेकाय किं नियामकमुपेयम् । अन्योन्याश्रये चान्त्यो-

---

जैसे "गौर्महिषः" यह व्याघात भी इस रीति से प्रवृत्त होता है कि जिस कारण से अगवात्मता से नियत महिषात्मता है अतः गौ महिष नहीं है इस से "अमहिषः महिषः" इस सत् असत् के व्याघात में ही "गौः महिषः" इस व्याघात का भी पर्य्यवसान जानना चाहिये। यदि सत्ता में सत्ता के (अवधि से रहित) प्रवाह को मानें, तो अनवस्था होती है । उस में भी अनिष्ट प्रसञ्जन कैसे होगा । "यदि सत्ता में सत्ता हो तो विश्रान्ति नहीं होगी। इस प्रकार से प्रसञ्जन तो हो नहीं सकता है। कारण कि यदि सत्ता में सत्ता के भ्युपगमरूप आपादक और विश्रान्तिरूप आपाद्य की व्याप्ति को प्रमित मानें, तो प्रमित होने से ही अविश्रान्ति दोष नहीं है और यदि व्याप्ति को अप्रमित मानें, तो प्रमाण के न होने से आपादन नहीं होगा। प्रतिबन्दी का खण्डन द्वितीय परिच्छेद में ही हो चुका है ॥ ८० ॥

किञ्च प्रमेयत्व अभिधेयत्व (वाच्यत्व) व्यवहार्य्यत्व सन्निकर्षवत्व अभावप्रतियोगित्व—आदि धर्म्म आत्माश्रित देखे जाते हैं फिर आत्माश्रय का खण्डन करने वाली व्याप्ति में व्यभिचार क्यों न हो।

समर्थन—प्रमेयत्वआदि स्थल में द्वार-भेद है। अर्थात् घट में घटप्रमाविषयत्वरूप प्रमेयत्व है, अतः आत्माश्रय-खण्डक व्याप्ति में व्यभिचार नहीं है।

खण्डन—वक्ष्यमाण (स्वप्रकाश ज्ञानादि) स्थल में व्यक्ति-भेद के व्यतिरेक (अभाव) के व्यभिचरित होने से अर्थात् न होने से और आत्माश्रय के होने से व्यक्ति के ऐक्य में भी आत्माश्रय के अदोषत्व के देखने से व्यक्ति-भेद भी आत्माश्रय में आभासत्व का प्रयोजक नहीं है।

स्वप्रकाशवादी के मत में स्वज्ञान में स्वविषयकज्ञानत्व के इसी प्रकार से जो अभाव में अन्य अभाव को नहीं मानते हैं उनके मत में अभाव में स्वनिष्ठाभावत्व के तथा आत्मविषयक प्रतीतिस्थल में आत्मा में ही ज्ञाप्यत्व ज्ञापकत्व के तथा "शब्दो वाचकः" इस शब्द से जात बोधस्थल में शब्द में ही ज्ञान के विषयत्व तथा करणत्व के तथा क्षणिकवादी के मत में उसी पदार्थ में नाश्यत्व तथा नाशकत्व के तथा स्वरूप को सम्बन्ध मानने वालों

पान्त्यशब्दयोरन्योन्यनाशकतायां, समव्याप्तिकयोश्चान्योन्यव्याप्यव्यापकतायां, एककार्यकारिणां चान्योन्यसहकारितायां, एवमन्यस्मिन्नपि तत्र तत्र दर्शनात्कथं न व्याप्तिभङ्गः। कश्च विशेषो यद्व्यतिरेको विशेषणमुपादीयेत। तत्रतत्राविरोधान्नैवमितिचेत्, न। अन्यत्र तथाभावादर्शनस्य विरोधाभ्युपगममूलस्याविशेषात्। तत्र तत्र तथात्वे प्रमाणसद्भाव एव विशेष इति चेत्। तर्हि सर्वत्रानभ्युपगममूलं तथात्त्वे प्रमाणाभाव एवोपजीव्यो दूषणमिष्यतां कृतमन्योन्याश्रयेण व्यभिचरितदोषत्वेनेति ॥ ८१ ॥

चक्रकेऽपि दुःखजन्मादिसूत्रोक्तादिषु व्यभिचारदर्शनादव्याप्तिः विशेषव्यतिरेकदर्शनदुःशक्यत्त्वं च। कार्यकारणभावस्य तज्जातीयतया नियतत्त्वेन व्यक्तिभेदस्य

के मत में उसी को सम्बन्धी तथा सम्बन्ध के अभ्युपगम होने से इस स्थल में आत्माश्रय अनाभास है, और इस स्थल में आभास है, इस निश्चय का कारण क्या माना जायगा।

अन्योन्याश्रय स्थल में अन्त्य शब्द का नाशक उपान्त्य शब्द होता है तथा उपान्त्य शब्द का नाशक अन्त्य शब्द होता है, अतः परस्पर नाशकता में तथा गन्ध-पृथिवीत्व-आदि समव्याप्तसाध्यहेतु स्थल में परस्पर व्याप्यव्यापकभाव में तथा घटादि एक कार्य्य के कारण दण्ड-चक्र आदि के परस्पर सहकारित्व में एवं अन्यत्र भी अन्योन्याश्रय दोष में व्यभिचार देखने से अन्योन्याश्रय के खण्डन करने वाली व्याप्ति का भङ्ग क्यों न माना जाय। ज्ञान, संस्कार स्थल में व्यक्ति-भेद विशेष है, अतः अन्योन्याश्रय को आभास मानते हैं, परन्तु उक्त शब्दादि स्थल में व्यक्ति-भेदरूप विशेष भी नहीं है, फिर क्या विशेष है? जिसके होने से अन्योन्याश्रय का आभासत्व तथा उस विशेष के व्यतिरेक (अभाव) को लक्षण में विशेषण देकर अन्योन्याश्रय के अनाभासत्व की व्यवस्था हो।

समर्थन—अन्त्य उपान्त्य शब्द स्थल में परस्पराश्रयत्व में विरोध नहीं है और प्रतियोगी तथा भेदस्थल में परस्परश्रयत्व विरोध है, अतः अन्योन्याश्रय में विरोध तथा अविरोध ही विशेष है।

खण्डन—विरोध के अभ्युपगम (स्वीकार) का मूल, विरोध का अदर्शन है उस में कोई विशेष अन्यत्र (प्रतियोगी, भेद स्थल में) भी नहीं है। अर्थात् यदि अन्त्य उपान्त्य शब्द स्थल में परस्पराश्रय में विरोध के अदर्शन से अविरोध (विरोध को अदुष्ट) मानें, तो प्रतियोगीभेदस्थल में भी परस्पराश्रय में विरोध के अदर्शन से (परस्पराश्रित प्रतीति होने से) विरोध का अभ्युपगम करना चाहिये।

समर्थन—अन्त्य उपान्त्य शब्दादि स्थल में अन्योन्याश्रय को अनाभास मानने में प्रमाण का सद्भाव ही विशेष है।

खण्डन—तब तो सर्वत्र अन्योन्याश्रय को दोष मानने का कारण प्रमाण का अभाव ही हुआ अतः उपजीव्य होने से प्रमाणाभाव को ही दोष मानिये जिसमें दोषत्व व्यभिचरित है ऐसे अन्योन्याश्रय को दोष मानना व्यर्थ है ॥ ८१ ॥

चक्रक का भी—"दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः" इस सूत्रोक्त दुःखादि में व्यवधान से परस्पर जन्यजनकभाव होने से—व्यभिचार है, अतः लक्षण की अव्याप्ति हो जायगी। यदि कहें कि अन्य जन्म व्यक्ति अन्य दुःख व्यक्ति की जनिका है, तथा व्यवधान से अन्य दुःख व्यक्ति से जन्य है, अतः व्यक्ति-

चक्रकानन्तर्भूतत्वात् । व्याघातेऽप्येकस्यैव जनकत्वाजनकत्वे तथा । नच कालभेदादिविशेषो घटतत्प्रध्वंसादौ कालभेदेऽपि तादात्म्यव्याघातोपगमादेव ॥८२॥

सत्प्रतिपक्षजात्योश्च को विशेषो व्याघाते, येन पूर्वत्र बाध्यबाधकयोर्द्वयोरप्याभासत्वमुत्तरत्र तूत्तरस्य परं तथोपेयत इति गुरवः । यद्यपि प्रतिपक्षहेतुः साध्यान्तरसाधक इत्यस्ति तस्य जात्युत्तरवैधर्म्यं तथाऽपि त्वद्धेतुरसाधकः समबलप्रतिपक्षप्रतिहतत्वादित्यस्य दूषणत्वार्थमवश्यापेक्षस्य द्वारात्मव्याघातकत्वात्साक्षाद्वाऽवश्योपस्थाप्यद्वारेण वा स्वव्याघातकतायामनुपयुक्तविशेषाभावः । नच तत्राऽऽस्तामेव व्याघातः सत्प्रतिपक्षता तु निरवद्यैवेति शक्यं वक्तुम् । यतः शब्दादेर्नित्यत्वमेकस्मादनित्यत्वं चापरस्मादनुमानात्तथा सति किं न स्यात् । तयोर्विरोधग्राहिणः प्रमाणस्य बलादितिचेन्न ।

भेद चक्रक का आभासत्व का तथा व्यक्ति-भेद का (अभाव) अनाभासत्व का प्रयोजक है तो यह कथन भी चक्रक में व्यक्ति-भेद के व्यतिरेक के ज्ञान के अशक्य होने से असङ्गत है, कारण कि कार्यकारणभाव दुःखादि जातीय में नियत है, अतः व्यवधान से परस्पर कार्यकारणभावरूप चक्रक के लक्षण में व्यक्तिविषय का अप्रवेश है। एक ही बीज में अङ्कुर के जनकत्व तथा अजनकत्व को प्रामाणिक होने से व्याघात भी आभास है।

समर्थन—जिस काल में जनकत्व हो उसी काल में अजनकत्व का होना व्याघात है अतः बीज में काल-भेद होने से व्याघात नहीं है।

खण्डन—जो आचार्य प्रागभाव तथा प्रध्वंसाभाव को प्रतियोगीरूप मानते हैं, उनके प्रति-काल भेद के होने पर भी "यदि घटः प्रागभावात्मकः प्रध्वंसाभावात्मको वा स्यात् तदा व्याघातः स्यात्" इस प्रकार से व्याघात का प्रसञ्जन आप करते है, अतः लक्षण में काल के अभेद का निवेश हो नहीं सकता है ॥ ८२ ॥

सत्प्रतिपक्ष तथा जाति दोनों में एकसा व्याघात होने पर भी क्या विशेष है, जिस से सत्प्रतिपक्ष में बाध्यबाधक दोनों आभास होते हैं और जाति में केवल उत्तर ही आभास होता है—ऐसा गुरु (प्रभाकर) ने कहा है।

समर्थन—सत्प्रतिपक्षस्थल में हेतु—व्याप्ति होने से साध्य का—साधक होता है। और जाति स्थल हेतु—व्याप्ति न होने से साध्य का—असाधक होता है—यह दोनों में भेद है।

खण्डन—यह भेद अकिञ्चितकर है कारण कि दोष देने के लिये अवश्य अपेक्षणीय "तुम्हारा हेतु, सम बल प्रतिपक्ष से पराहत होने से असाधक है।" इस अनुमितिरूप द्वार से आत्म व्याघात दोनों स्थलों में तुल्य है। भेद यह है कि सब "सत् है" अर्थ क्रियाकारी होने से, नैयायिक के यह कहनेपर "सर्व असत् है, ज्ञेयत्व होने से" इस जातिरूप बौद्ध के उत्तर में ज्ञेयत्व हेतु [स्व के भी ज्ञेय होने से स्व के स्वरूप रूप जो प्रतिपक्ष उससे साक्षात् ही] व्याहत है और "शब्द अनित्य है कृतक होने से" इस नैयायिक के अनुमान में शब्द नित्य है केवल आकाश के गुण होने से" इस सत्प्रतिपक्ष स्थल में प्रथम हेतु में समबल प्रतिपक्ष अकाशैकगुणत्व से पराहतत्व से असाधकत्व के साधन द्वारा आकाशैकगुणत्व हेतु स्व का भी व्याघातक है। अर्थात् जैसे पर के नाश के लिये स्व से उत्थापित भूत पर का नाशकर स्व के नाश का भी कारण होता है वैसे ही स्थापना हेतु के बाधन के अर्थ आकाशैक

यथा नित्यत्वमनित्यत्वमित्युभयमास्तामित्याचक्ष्महे तथा विरुद्धमविरुद्धं चास्तामित्यपि ब्रुवतोऽस्मान्कथं निवारयिष्यसि। स्यादप्येवं यदि सत्प्रतिपक्षत्वमेव तत्र दोषो न स्यादिति चेत्तर्हि मन्तव्यं प्रथमस्य हेतोः समानबलप्रतिपक्षप्रतिहतत्वादसाधकत्वमित्युक्तमावर्तते ॥ ८३ ॥

अनवस्थायां च यस्यां यस्यां सत्तायामपरापरसत्ता यायात्तस्यास्तस्याः प्रमाणेन सिद्धौ नानवस्था दोषः स्यादसिद्धौ चाश्रयासिद्धविषयमापादनमिति। यदि चाऽऽत्माश्रयादिषु सर्वत्र विशेषोऽयमभिधीयते प्रमाणसिद्धत्वात्तत्र तथोपेयत इति तह्यापादनस्थाने तथाऽभ्युपगमाय प्रमाणं नास्तीत्युक्तं भवति तथाच तत्र प्रमाणप्रश्नस्यावसरा न प्रसङ्गस्येति ॥ ८४ ॥

अपरेऽपि विषयभेदात्तर्कभेदा आत्माश्रयादिवन्मन्तुमुचिताः। तद्यथा अविनिगमः उत्सर्गः, कल्पनागौरवलाघवे, चानौचित्यं चेति। विकल्पेनाऽन्वयावगमयोग्ये एक-

---

गुणत्व हेतु से उत्थापित समबलप्रतिपक्ष पराहतत्वरूप हेतु स्व के नाश का भी कारण होता है।

समर्थन—व्याघात तुल्य होनेपर भी व्याप्ति होने से सत्प्रतिपक्ष सत् उत्तर है तथा व्याप्ति न होने से जाति असत् उत्तर है।

खण्डन—यदि सत्प्रतिपक्ष स्थल में दोनों हेतुओं में व्याप्ति को मानें, तो दोनों हेतुओं के बल से नित्यत्व, अनित्यत्व इन दोनों विरुद्ध धर्मों का एकत्र ज्ञान होना चाहिये।

समर्थन—नित्यत्व, अनित्यत्व दोनों धर्मों के विरोध को विषय करने वाले प्रमाण के बल से दोनों का एकत्र ज्ञान नहीं होगा।

खण्डन—जैसे दोनों हेतुओं में व्याप्ति के बल से नित्यत्व का एकत्र आपादन हम करते हैं वैसे ही यदि उक्त व्याप्ति के बल से नित्यत्व अनित्यत्व कहीं विरुद्ध तथा कहीं अविरुद्ध हैं—ऐसा आपादन करें, तो कौन हमें निवारण करेगा।

समर्थन—व्याप्ति के बल से साध्य की सिद्धि—सत्प्रतिपक्षरूप दोष के न होने पर होती है यहां सत्प्रति पक्ष दोष है, अतः नित्यत्व, अनित्यरूप विरुद्ध धर्मों का अध्यास एकत्र नहीं होता है।

खण्डन—तब यह मानना चाहिये कि प्रथम हेतु समानबल प्रतिपक्ष पराहत होने से असाधक है और यदि ऐसा मान लें, तो उक्त वेताल-न्याय से स्व व्याघातक होने से जाति से सत्प्रतिपक्ष में कुछ विशेष नहीं रहा ॥ ८३ ॥

किञ्च अनवस्था स्थल में जिस २ सत्ता में अपर २ सत्ता का आपादन करते हैं उस २ सत्ता में यदि प्रमाण है तो प्रामाणिक होने से अनवस्था दोष नहीं है। और यदि प्रमाण नहीं है, तो आश्रय की प्रसिद्धि होने से अनवस्था का अपादान हो ही नहीं सकता है। यदि च आत्माश्रयादि सब स्थलों में यह विशेष कहा जाय कि अमुक स्थल में प्रमाण सिद्ध होने से आत्माश्रयादि दोष नहीं है, तो आपादन के स्थान में अमुक आत्माश्रयआदि मानने में प्रमाण नहीं है यह कथित होता है, अतः प्रमाण प्रश्न का यह स्थल है प्रसङ्ग का स्थल नहीं है ॥ ८४ ॥

विषय के भेद से आत्माश्रयादि के तुल्य के अविनिगम, उत्सर्ग, कल्पना-गौरव, कल्पना-लाघव और अनौचित्य ये पांच अन्य मानने योग्य तर्क हैं।

स्मिन्नभ्युपगते तदेकदेशान्वयनियमनिर्द्धारणाऽशक्यत्वमविनिगमः, सत्प्रतिपक्षहेत्वोरिव निर्द्धारयितुमशक्यान्वययोः परस्परप्रतिक्षेप एव पर्यवसानात् । नन्वन्यतरमादायाऽपि प्रकृतस्योपपत्तिसम्भवेनाविनिगमस्य दोषत्वमेवाऽनुपपन्नं केवलं पुंसस्तत्र यदि संशयः स्यात्स च किं न स्यादिति चेन्न, भावानवबोधात् प्रमाणासम्भवेन क्वचिदपि विशेषः कथमभ्युपगन्तुं शक्यो यमादाय वस्तुगत्याऽप्येकस्याऽन्वयः स्यात् । नन्वेवं प्रमाणाभाव एव दोषः स्यान्नाविनिगम इति चेन्न, तस्याविनिगमोन्नेयत्वेनाविनिगमस्यैव प्रथमोत्पन्नस्योपन्यासौचित्यात् । नन्वेवमनुमाने व्यक्त्यविनिगमो दोषः स्यादिति चेन्न, तत्रानेकव्यक्तीनामभ्युपगमसिद्ध्यभावात्सामान्योपसंहारस्यैकामेव व्यक्तिमाक्षेप्तुं सामर्थ्यादविनिगमस्य चानेकाभ्युपगमे सत्युपस्थानादिति ॥ ८५ ॥

बाहुल्यदृष्टमपेक्ष्य बाहुल्यदृष्टतया दुर्बलस्योपगमार्हतोत्सर्गः, तद्यथा—स्वस्थस्य

विकल्प से अन्वय के योग्य अनेक के मध्य में एक के अन्वय का जो नियम उसके निश्चय का अशक्यत्व अविनिगम है। जैसे भूतत्व, मूर्तत्व दोनों में जातित्व के अन्वय की योग्यता है और दोनों को जाति मानने में साङ्कर्य दोष होगा, अतः एक ही को जाति मानना चाहिये वहां अनुगत प्रतीतिरूप जातित्व साधक प्रमाण के दोनों स्थलों में तुल्य होने से यह विकल्प होता है कि भूतत्व जाति है? वा मूर्तत्व? उन दोनों के मध्य में एक में भी जातित्व का अन्वय अशक्य नहीं है यही अविनिगमन है। यहांपर सत्प्रतिपक्ष हेतु के तुल्य एक के जातित्व की ग्राहकसामग्री, इतर के जातित्व की प्रतिबन्धिका है।

खण्डन—एक भूतत्व को जाति मानने से सङ्कर दोष का परिहार होता है अतः विनिगम दोष नहीं है। केवल अविनिगम स्थल में पुरुष को सन्देह होता है उसकी भी निवृत्ति हो सकती है।

समर्थन—आपने मेरे भाव को नहीं जाना। भूतत्व मूर्तत्व दोनों के मध्य एक में कोई विशेष (जातित्वसाधक अतिशय) को मानने में प्रमाण है फिर किस के बल से एक में जातित्व का अन्वय करें। अर्थात्, अनुगत प्रतीतिरूप प्रमाण दोनों में तुल्य है और इससे अन्य विशेष में प्रमाण का अभाव है।

खण्डन—यदि ऐसा है तो प्रमाणाभाव ही को दोष मानिये, अविनिगम को दोष मानना व्यर्थ है।

समर्थन—विशेष में प्रमाण (अतीन्द्रिय होने से अविनिगम से) अनुमेय है, अतः प्रथम उपस्थित होने से अविनिगम ही दोष है प्रमाणाभाव नहीं है।

खण्डन—यदि अविनिगम को दोष मानें, तो धूम से पर्वत में तार्णवा पार्णवा काष्ठज वह्नि के मध्य में एक के भी अन्वय के अशक्यत्व होने से अनुमिति स्थल में अविनिगम के दोष होने से अनुमितिमात्र का उच्छेद हो जायगा।

समर्थन—अनुमितिस्थल में अनेक व्यक्ति का विकल्प नहीं होता है, कारण कि सामान्यवह्नि के सम्बन्ध का [एक व्यक्ति के आक्षेप में ही] सामर्थ्य है और अविनिगम का अनेक व्यक्ति के विकल होने पर उपस्थान होता है ॥ ८५ ॥

लोक में अतिप्रसिद्ध की अपेक्षा से अप्रसिद्ध दुर्बल है उनके अस्वीकार की योग्यता उत्सर्ग है। जैसे स्वस्थ जाग्रत् मनुष्य के ज्ञान को [प्रामाण्य अप्रामाण्य निर्णय में

जाग्रतो ज्ञानं प्रामाण्याप्रामाण्यनिर्द्धारकप्रमाणानुपनिपाताविशेषेऽपि विना बाधमप्रामाण्यमभ्युपगच्छन्तं प्रति स्यात् न तु प्रामाण्यं, यं तर्कमेतमालम्ब्याहुः—

"तस्माद्बोधात्मकत्वेन प्राप्ता बुद्धेः प्रमाणता ।
अर्थान्यथात्वहेतूत्थदोषज्ञानादपोद्यत इति"

द्रष्टव्योदाहरणं चैतदीश्वराभिसन्धौ वेदप्रामाण्ये तथा, यथा न सौगतोऽपि विप्रतिपत्तुमर्हति । ननु बलवदेककोटिकः संशय एवोत्सर्गस्तत्कथं तर्कः स्यादिति चेन्न, उत्सर्गस्य सम्भावनायाः स्वार्थस्थित्यनुकूलतयाऽवलम्ब्यत्वात्संशयस्य त्वनेवम्भावात् उत्सर्गस्यैककोटिनिष्ठत्वात्संशयस्य च कोटिद्वयावगाहित्वात् । एतेन संशयस्यैवैका बलवती या कोटिः सैवोत्सर्ग इति निरस्तम् । निर्णयोऽपि संशयस्यैव वस्तुनियतकारणजत्वरूपबलवती कोटिः स्यात् । स्यादप्येवं यद्युत्सर्गवन्निर्णयेऽपि संशयस्यानुस्यूतिः स्यात् इति चेन्न, उत्सर्गोदाहरणे उत्सर्गमाद्रियमाणैः संशयोच्छेदानुमतेरेव बाधाभावं सहकारिणमपेक्ष्योत्सर्गेणार्थैक्याभाव एव प्रमाणीभवनात् । तस्माद्यथाऽनवस्थादयो बाधाद् दूषणत्वं त्यजन्तस्तदभावे दूषणानि भवन्ति तथोत्सर्गेपि तथैवेति ॥ ८६ ॥

प्रमाण की विद्यमानतारूप विशेष के न होने पर भी बाध के अभावकाल में] जो अप्रमाण मानते हैं, उनके प्रति उत्सर्ग दोष होता है, जो उक्त ज्ञान को प्रमाण मानते हैं उनके प्रति उत्सर्ग दोष नहीं होता है । जिस उत्सर्गरूप तर्क का अवलम्बन कर भट्टपाद ने कहा है कि बोधरूप होने से ही बुद्धि को प्रामाण्य प्राप्त हो जाता है, किन्तु वह प्रामाण्य कहीं कहीं अर्थ के अभाव से अर्थ वा चक्षुरादिनिष्ठ दोष से बाधित भी हो जाता है । ईश्वराभिसन्धि के वेदप्रामाण्य नाम प्रकरण में उत्सर्ग का उदाहरण उस प्रकार से हमने दिखाया है जिसमें बौद्ध भी विप्रतिपत्ति नहीं कर सकते हैं ।

प्रश्न—प्रायशः ज्ञानं प्रमैव स्यात् इत्याकारक बलवत् एक कोटिवाला सम्भावनारूप सन्देह ही उत्सर्ग रहे, उसको तर्क क्यों मानें ।

उत्तर—सम्भावनारूप उत्सर्ग स्वप्रयोजन (ज्ञान प्रामाण्य) का साधक है और संशय उभय कोटिक होने से प्रयोजन का साधन नहीं हो सकता है, अतः उत्सर्ग सन्देह नहीं है किन्तु तर्क है इससे "संशय की ही एक बलवती कोटि उत्सर्ग है" यह कथन खण्डित न जानना चाहिये (अन्यथा प्रयोजन के साधक होने पर भी उत्सर्ग को यदि सन्देह मानें, तो निश्चय भी वस्तु से नियत भी सन्निकर्षरूप कारण से जन्यरूप, सन्देह की ही बलवती कोटि क्यों न मानी जाय ।

प्रश्न—उत्सर्ग के उदाहरण में संशय की स्फूर्ति होती है और निश्चय में संशय की स्फूर्ति है नहीं, अतः निश्चय सन्देह की बलवती कोटि नहीं है ।

उत्तर—जो उत्सर्ग का आदर करते हैं वे उत्सर्ग के उदाहरण में संशय की स्फूर्ति नहीं किन्तु संशय का उच्छेद ही मानते हैं, कारण कि बाधाभाव से सहकृत होकर उत्सर्ग ज्ञान के प्रामाण्य में प्रमाण होता है तस्मात् जैसे अनवस्थाआदि बाध होने पर दूषणत्व को त्याग कर भी बाध के अभावस्थल में दूषण होते हैं वैसे ही उत्सर्ग भी बाध के अभाव में प्रमाण होता है ॥ ८६ ॥

सुगमासुगमयोरसुगमदुर्बलत्त्वं कल्पनागौरवं, दृष्टजातीयमपेक्ष्यादृष्टजातीयं दुःखेन प्रमीयते स्वल्पमपेक्ष्य च बह्विति अखिलजनानुभवसिद्धमेतत् । दर्शितं च विविच्येद-मीश्वराभिसन्धौ यथा नैयायिकादिकं प्रति क्षित्यादिषु प्रतिकार्यं कर्तॄणां भिन्नानाम-भ्युपगमापादके, तथाच सौगतं प्रति प्रत्येकं कारणानां समर्थानामनेकसमानदेशकाला-नेकनीलादिव्यक्त्युत्पादापादके चेति दूषणानुकूलमिदम् । तद्व्यतिरेकेण कल्पनालाघवं साधनानुकूलम् ॥ ८७ ॥

प्रामाणिकाव्यवहार्यत्वमसमाधेयजातीयमनौचित्यं वैयात्यनामकं, तस्य भेदाः प्रश्नवैयात्यादयः । प्रश्नविषयमप्रमिण्वतां प्रष्टरि प्रश्नानौचित्यं प्रश्नवैयात्यं, यथाऽवस्तु-नि विधिनिषेधयोः किमिच्छसीति पृच्छति प्रमाणव्यवहारिणां सौगते । अतएवात्रा-नौचित्यापरनामकं वैयात्यं परस्य दोषं मनसि कृत्वैके ब्रुवते अत्र सहृदयानां मूकतैवो-चितेति । अपरे च नह्यप्रतीते देवदत्तादौ स किं गौरः कृष्णो वेति वैयात्यं विना प्रश्नः स्यादिति । यदि चेदमनौचित्यं नाम दोषो नाभ्युपेयते तदानीमर्थान्तरेण प्रकृतमर्थं

सुबोध और दुर्बोध के मध्य में दुर्बोध की दुर्बलत्वकल्पना गौरव है। दृष्टजातीय की अपेक्षा से अदृष्टजातीय, तथा स्वल्प की अपेक्षा से बहु, दुःख से ज्ञात होता है—यह बात अनुभव सिद्ध है। इस कल्पना गौरव का उदाहरण ईश्वराभिसंधि नामक ग्रन्थ में बड़े विवेक से दिखाया गया है। जैसे नैयायिक के कार्यत्व से क्षित्यादि में कर्तृजन्यत्व का साधन करने पर क्षित्यादि कार्य के अनेक होने से अनेक कर्तृसिद्धि क्यों नहीं हो। वादी की इस शंका की निवृत्ति कल्पनागौरवरूप तर्क से होती है। तथा बौद्धमत में प्रत्येक समर्थ कारणों के समान देशकालवाले अनेक नीलादि कार्यकारित्व क्यों न हो" इस शंका की निवृत्ति कल्पना गौरवरूप तर्क से होती है। कल्पना-गौरव प्रतिवादी से कथित दूषण के अनुकूल है। और कल्पनागौरव का अभावरूप कल्पनालाघव, स्वपक्ष के साधन के अनुकूल है ॥८७॥

प्रामाणिकों के व्यहार का अविषय तथा समाधान के अयोग्य, अनौचित्य है। अनौचित्य का ही नाम वैजात्य है, अनौचित्य के भेद प्रश्नवैजात्यआदि हैं। जो पण्डित प्रश्न के विषय को नहीं मानते हैं उनके प्रति उस विषय में विशेष के ज्ञानार्थ प्रश्न, प्रश्ना-नौचित्य है। जैसे प्रमाणव्यवहारी नैयायिकआदि के प्रति आप जगत् को अवस्तु [असत्] तो मानते ही हैं। परन्तु उस असत्व को भावरूप अथवा अभावरूप मानते हैं—इस सौगत के प्रश्न में प्रश्नानौचित्य है। इसी से पर के ऐसे प्रश्न में प्रश्न वैजात्य नाम दोष को अङ्गीकार कर एक आचार्य ने कहा है, कि ऐसे प्रश्न पर सहृदय पण्डितों के लिये मूकता ही उचित है। और आचार्य ने कहा है कि अज्ञात देवदत्त के विषय में देवदत्त कृष्ण है वा गौर—यह प्रश्न धृष्टता के बिना हो नहीं सकता है। यदि अनौचित्यरूप दोष को स्वीकार न करें, तब "शब्दोऽनित्यः कृतकत्वात्" इस प्रकृत अर्थ के अर्थान्तर से अर्थात् शब्द को—विभु होने से—कृतक कहना अज्ञान है इस प्रकार से परिहार करने पर यह परिहार [समाधान] अर्थान्तर है ऐसा कहने पर "अर्थान्तर ही क्या है? यह कहता हुआ प्रश्न पर-म्परा का आलम्बनकारी वादी अनौचित्य से अन्य किस निग्रह से पराजित होगा। अर्थात्

निरस्यार्थान्तरस्यार्थान्तरेण परिहारात् तत्परम्परामालम्बितुकामः केन दोषेणार्थान्तरपरिहाराभासत्ववादिनि अर्थान्तरेणैव तत्परिहरणमनुचितमित्यतोऽन्येन जीयेत। अर्थान्तरनिग्रहतायां विप्रतिपन्नोऽपि प्रश्नपरम्परामालम्ब्य स्वभङ्गभयात्कथाऽवसानमनिच्छन्तं कथं जयेत। नचाऽनवस्थया अयतीति वाच्यम्। यावदुत्तरमर्थान्तरेण परिहरणे प्रश्नान्तरेण वा द्वयोरप्यनवस्थासाम्यात्।

"दोषं व्यक्तिविवेकेऽधुं कविलोकविलोचने।
काव्यमीमांसिषु प्राप्तमहिमा महिमाऽऽद्दत" ॥ ८८ ॥

ननु कथमत्र प्रामाणिकाव्यवहार्यत्वमिति पृष्टेन यदि मूकत्वमालम्ब्य तथात्वं वादिनि न व्युत्पाद्यते तदानीमप्रतिभाऽऽपतेत्, अथ तथात्वं व्युत्पाद्यते प्रश्नार्थादेः प्रमाणाविषयत्वमुपन्यस्य, तदाऽत्यन्तासद्व्यवहार्यता स्वीकृतैव स्यादिति चेत्, अत्र ब्रुवते। मूकतैवात्र विजयायेति। नचाप्रतिभैवं प्रसज्येत, उत्तरस्याऽप्रतिपत्तिरुत्तराऽर्हस्येति तल्लक्षणात्। यदि चायं नियमो वादिना इष्यते यदभ्रान्त्यैव तेन व्यवहर्तव्यमनुवादादन्य-

---

अर्थान्तर होने से परिहार को आभास कहने वाले के प्रति फिर भी अर्थान्तर से ही परिहार अनुचित है इस प्रकार से अनौचित्य से ही उक्त वादी निगृहीत होता है। किञ्च जो स्वयं अर्थान्तर को निग्रह स्थान नहीं मानते हैं वह पराजय के भय से, प्रश्न परम्परा के भय से, प्रश्न परम्परा का अवलम्बन कर शास्त्रार्थ की समाप्ति न चाहने वाले को, अनौचित्य से अन्य किस निग्रह से परास्त करेंगे। तस्मात् अनौचित्य अवश्य मानना चाहिये।

प्रश्न०—स्वपराजय के भय से प्रश्न परम्परा का अवलम्बन करने वाले पुरुष को अनवस्था से पराजय कर सकते हैं।

उत्तर—अनवस्था ही क्या है ऐसा प्रश्न होने से प्रश्न उत्तर दोनों पक्ष में अनवस्था सम है।

काव्यमीमांसाशाली पण्डितों में प्राप्तमहिमा महिमा नाम (महिम भट्ट) कवि ने कविजन के नेत्र तुल्य व्यक्तिविवेक नामक स्वग्रन्थ में "अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम्" यह कह कर इस दोष का आदर किया है ॥८८॥

प्रश्न—अनौचित्य प्रामाणिकों का अव्यवहार्य कैसे है—ऐसा प्रश्न होने पर यदि मूकत्व का अवलम्बन कर वादी के प्रति अनौचित्य के प्रामाणिक व्यवहार्यत्व का प्रतिपादन नहीं किया जाय, तो अप्रतिभा नाम निग्रह होता है और यदि प्रश्नार्थ के प्रमाणाविषयत्व का प्रतिपादन कर अनौचित्य के प्रामाणिक व्यवहार्यत्व का प्रतिपादन किया जाय, तो अत्यन्त असत् में व्यवहार्यत्व के स्वीकार से अपसिद्धान्त हो जायगा।

उत्तर—अनौचित्य अव्यवहार्य कैसे है इस प्रश्न में मूकता ही विजय का हेतु है। और मूकत्व के अवलम्बन में भी अप्रतिभा नहीं होती है, कारण कि उत्तर के अर्ह प्रश्न की अप्रतिपत्ति अप्रतिभा है और अनौचित्य उत्तरार्ह नहीं है।

यदि वादी इस नियम को स्वीकार करता हो कि "अनुवाद से अन्यत्र में भ्रान्ति से व्यवहार नहीं करूँगा„ तो मध्यस्थ को अनौचित्य का प्रयोग करना चाहिये मध्यस्थ जैसे अपभ्रंश से वादी का प्रबोधन करता है वैसे ही अप्रमाण का अवलम्बन कर भी

त्रेति, तदा मध्यस्थोद्भाव्यत्वमस्य दोषस्योपन्यस्यतां, मध्यस्थेन ह्यपभ्रंशभाषयाऽपि यथा वादिप्रबोधनं क्रियते तथा यद्यप्रमाणमवलम्ब्यापि क्रियते तदा को दोषस्तस्य स्यात् तत्र विषये तथैव तेन वादिबोधनस्य शक्यत्वात् । तस्मात् मध्यस्थं प्रत्यनुत्तरदानं स्वदोषपरिहाराय प्रतिवादिनापि वैयात्यलक्षणदर्शनं कार्यं, मध्यस्थं प्रति तस्याऽप्रमाणेनापि प्रतिबोधने निर्दोषत्वात् ॥ ८६ ॥

ननु वादिभ्यामेव वा वादिनि मध्यस्थेन वा, तं प्रतिवादिना वाऽत्यन्तासद्विषये व्यवहारोपगमे कथं नासत्ख्यातिः स्वीकृता स्यात् । किं न स्यात् । विशिष्टरूपे सम्बन्धांशे चाऽसत्ख्यातेरन्यथाख्यातिवादिभिरप्यभ्युपगमात् । ननु वन्ध्यासुताच्छशविषाणं भिन्नमित्यादिषु व्यवहरतः कथं विशेष्ये विशेषणेऽपि नासत्ख्यातिरुपगन्तव्येति चेत्, न असत्ख्यात्यभ्युपगमस्य सत्ख्यातित्वात्यागनियमोपगमविश्रान्तत्वात् । असदपि सदुपश्लिष्टमेव प्रतिभासते न तु केवलमसत् कयाऽपि ख्यात्या समुल्लिख्यते इत्यन्यथाख्यातिवादिभिरिष्यमाणत्वात् । वन्ध्यासुताच्छशविषाणं भिन्नमिति प्रतिपत्त्याऽपि भिन्नमित्ययमंशः सामान्यतोऽन्यत्र दृष्ट एव प्रतीयते केवलं भेदस्य सदाश्रयः प्रतियोगि चेति यद्वस्तुतः तदसदाश्रयः प्रतियोगि च तस्येत्यन्यथा कृत्वा प्रतीयत इत्यन्यथाख्यातिरेवोपगता भवति । यथा तु विशिष्टमत्यन्ताऽसदेव तथाऽश्रयप्रतियोगिनी अत्यन्तासती एव किं न प्रतिभासेते तावताऽपि यथोक्ताऽन्यथाख्यात्यनुल्लङ्घनादेव । नचैवमसत्ख्यातिवादिनाऽपि शक्यं वक्तुं, केवलं सदेव प्रकाशत इत्यस्मात्पक्षाद्विपरीतं विशिष्टं सम्बन्धश्च क्वचिद्विशेषणाद्यप्यत्यन्तासद्भ्रान्त्योल्लिख्यत इत्येवंरूपा तावदसत्ख्यातिः परेणोपगतैव । यदि तु सदपि प्रकाशते किञ्चित्तत्किं नासत्प्रकाशत इति ।

वादी का प्रबोधन करे तो हानि क्या है, कारण कि अनौचित्य का प्रबोधन, भ्रान्ति से ही मध्यस्थ कर सकता है तस्मात् मध्यस्थ के प्रति प्रतिवादी भी उत्तर न देने में स्वदोष के परिहार के अर्थ अनौचित्य का बोध नहीं कर सकता है. कारण कि मध्यस्थ के प्रति अप्रमाण से बोधन में भी कोई दोष नहीं है ॥ ८६ ॥

प्रश्न—परस्पर के प्रति, वादी प्रतिवादी के अथवा वादी के प्रति मध्यस्थ के या मध्यस्थ के प्रति वादी के अत्यन्त असत् को व्यवहार का विषय मानने पर असत्ख्याति का स्वीकार हो जायगा ।

उत्तर—अन्यथाख्यातिवादी विशिष्ट अंश में वा सम्बन्ध अंश में जैसे असत्ख्याति को मानते हैं वैसे ही अनौचित्य विषय में असत्ख्याति को मानें, तो हानि क्या है ।

प्रश्न—वन्ध्या-सुत से शश-विषाण भिन्न है इस स्थल में विशेष्य-विशेषण अंश में भी असत्ख्याति क्यों न मानी जाय ।

उत्तर—असत्ख्याति के अस्वीकार का सत्ख्याति का अत्याग अर्थ है । सर्वथा असत्ख्याति को न मानना अर्थ नहीं है, कारण कि (असत भी सत् से उपश्लिष्ट ही भासता हैं केवल असत् किसी ख्याति से नहीं भासता है, यही अन्यथाख्यातिवादी भी मानते हैं । वन्ध्या-सुत से शशविषाण भिन्न है इस स्थल में भी सामान्य से अन्यत्र दृष्ट ही

यतः परेण विकल्पः सर्वथा वस्त्वनुल्लेखी केवलमलीकमुल्लिखन्नसत्ख्यात्यात्मा स्वीक्रियते। यदि तु यथोक्तमेव परोऽप्यभ्युपगच्छति तदानीमनुमानप्रमाणादिवदत्राप्यविप्रतिपत्तिरेवेति ॥ ९० ॥

ननु सर्वथैवासत्ख्यातिरपि भवतानुऽमन्तव्यैव, तथाहि—वन्ध्यासुतशशविषाणे कूर्मरोमैवेति वदतः शब्दादर्थं प्रतिपादयतां किं तदणुमात्रमपि समुल्लेख्यं तत्प्रतीतेः इति चेन्न, तत्रापि तादात्म्यस्य सामान्यतोऽन्न प्रतीतस्यैवाऽसदुपहितस्य स्फुरणोपगमात्, प्रकारभेदवैशिष्ट्येन भिन्नयोरेकत्वं हि तादात्म्यं तच्चाऽन्यत्रास्त्येव तर्कसंशयाभ्यामप्रमाभ्यां जननेऽपि तत्तत्प्रमावत् मध्यस्थाद्यप्रमया तथा प्रश्नानौचित्यादिप्रमोत्पादनाविरोधे बाधवत् भ्रमविषयाऽतथाभावेऽपि भ्रमस्याप्रमात्वपारमार्थिकतावत्प्रश्नविषयासत्यत्वेऽपि प्रश्नानौचित्यसत्यतोपपत्तिरेव ॥९१॥

भेदप्रतीति का विषय होता है। केवल भेद यह है कि अन्यत्र भेद का सत् आश्रय और प्रतियोगी भासता है और प्रकृत में अन्यथारूप से भेद का असत् प्रतियोगी और आश्रय भासता है फिर यह भी अन्यथाख्याति ही क्यों न मानी जायगी ॥९०॥

जैसे विशिष्ट अत्यन्त असत् ही भासता है, वैसे ही उक्त प्रतीति में आश्रय प्रतियोगी अत्यन्त असत् ही भासता है ऐसा मानने पर भी अन्यथाख्याति का उल्लंघन नहीं है।

प्रश्न—असत्ख्यातिवादी भी इसी प्रकार से कह सकता है कि जैसे केवल सत् ही भासता है इस पक्ष से विपरीत विशिष्ट सम्बन्ध कहीं २ विशेषण भी अत्यन्त असत् ही भासता है ऐसी असत्ख्याति को अन्यथाख्यातिवादी मानते हैं वैसे ही सत् भी असत् से उपश्लिष्ट ही भासता है केवल सत् नहीं भासता है, अतः सर्वज्ञान असत्ख्याति ही है।

उत्तर—बौद्ध सद्वस्तु के अनवगाही केवल असत् का उल्लेख करने वाली विकल्परूप असत्ख्याति को मानते हैं। और अन्यथाख्यातिवादी सत् उपश्लिष्ट ही असत् भासता है ऐसा मानते हैं। दोनों मत में यह महाभेद है। यदि बौद्ध भी सत् से उपश्लिष्ट ही असत् के भान को असत्ख्याति माने, तो अनुमान के प्रामाण्य के तुल्य उक्तरूप असत्ख्याति में मेरी कोई विप्रतिपत्ति नहीं होगी। किन्तु बौद्धों का अपसिद्धान्त होगा।

प्रश्न—आपको सर्वथा असत्ख्याति भी अवश्य माननी होगी। देखिये—वन्ध्या सुत, शशविषाण, कूर्मरोम ही हैं, इस शब्द का क्या अणु मात्र अर्थ है जो उक्त प्रतीति का विषय हो।

उत्तर—सामान्यरूप से अन्यत्र प्रतीत ही असत् से युक्त तादात्म्य इस प्रतीति का विषय होता है। कारण कि प्रकार-भेद से विशिष्ट भिन्न भिन्न अर्थों का ऐक्य, तादात्म्य है और यह तादात्म्य अन्यत्र सत् ही है। किंच तर्क तथा संशय स्वयं अप्रमाण भी हैं परन्तु उनसे जन्य अनुमिति जैसे प्रमाण है वैसे ही मध्यस्थ के अनौचित्य विषय को विषय करने वाली अप्रमा से प्रश्नानौचित्य विषयक प्रमा उत्पन्न हो सकती ही है। अथवा बाधित भ्रम का विषय असत् भी है। परन्तु भ्रम में अप्रमात्व के प्रभाव के तुल्य "शशशृंग मृदु वक्रं वा ?" इस प्रश्न के विषय के असत् होने पर भी प्रश्नानौचित्य में सत्यत्व का अवगाहन करने वाली प्रमा हो सकती है ॥९१॥

एतेन भ्रान्तिजाया धियः प्रमात्वं तथाऽप्यदृष्टचरमित्यपि परास्तप्रायमिति । एवमन्यत्राप्येवंविधोदाहरणे वाच्यम् । नच कश्चिदुक्तप्रकारमन्यथाख्यातिसमाधानं नानुमन्तुं शक्नोति अन्यथा कथमसत्ख्यातिवादिनोमतमपि जानीयादज्ञात्वा च स्वपरमतवैचित्र्यं कथं वादे प्रवर्तेत । एते सर्वेऽपि तर्काः प्रमाणविरोधे वा प्रमाणाभावे वा निष्पीडिताः प्रविशन्तो न बाधासिद्धिभ्यां भिद्यन्ते-पूर्वैरपि लोकसिद्धत्वाद्व्यवहृताः केवलमस्माभिरेव तर्कपदव्यामभिषिक्ताः ततो न प्रबन्धेन निरस्यन्ते । "विषवृक्षोऽपि संवर्द्ध्य स्वयं च्छेत्तुमसाम्प्रत"मिति ॥६२॥

ये च परैस्तर्कदोषाः षट् स्वीक्रियन्ते आश्रयासिद्धिरनुकूलत्वं मूलशैथिल्यमिष्टापादनं विपर्ययापर्यवसानं मिथोविरोधश्चेति, सोऽयं तर्कस्य दोषविभागो नोपपद्यते । व्याप्तिपक्षधर्मत्वयोः प्रतीतिमपेक्ष्य यथाऽनुमानं जायते तथैव तर्कोऽपि, इयान् परमनयोर्विशेषो यदनुमानं तयोः प्रमितया जायते तर्कस्त्ववास्तवाभ्यामपि ताभ्यां पराभ्यु-

---

इसीसे भ्रान्ति से जायमान बुद्धि में प्रमात्व कहीं देखा नहीं गया है, इस कथन को भी खण्डित जानना चाहिये इसी प्रकार से वन्ध्यासुत में गगनारविन्द उसमें कूर्मरोम, इत्यादि असत्ख्याति में सत् से उपश्लिष्ट ही असत् के भान को जानना चाहिये ।

असत भी सत् से उपश्लिष्ट ही भासता है केवल असत् नहीं भासता है—यही अन्यथाख्याति है कोई भी अन्यथाख्यातिवादी इस प्रकार से उक्त अन्यथाख्याति के निर्वाह का अस्वीकार नहीं कर सकता है। यदि अस्वीकार भी करे, तो असत्ख्यातिवादी के मत को कैसे जानेगा ।

कारण कि असत् के भान को वह मानता नहीं है। और मेरे कथन के अनुसार तो सत् जो ख्याति उससे पश्लिष्ट असत् का भान होता है अतः असत्ख्यातिवादी के मत के ज्ञान में कोई बाधक नहीं है। और स्व पर मत के वैलक्षण्य को न जान कर वाद में पुरुष कैसे प्रवृत्त हो सकेगा ।

विचार करने पर यदि अविनिगमआदि चार तर्क, प्रमाण के विरोधरूप हैं, तो बाध में, और यदि प्रमाण के अभावरूप हैं तो असिद्धि में, ये अन्तर्भूत हैं। इनसे पृथक् नहीं हैं। पूर्वाचार्यों ने भी इन तर्कों को लोकसिद्ध माना है। केवल मैंने ही इनको तर्क पदवी पर आरूढ़ किया है, इसी कारण से अतियत्न से इनका खण्डन नहीं करते हैं, कारण कि विषका वृक्ष भी स्वयं बढ़ा कर स्वयं छेदन के अयोग्य है ॥ ६२ ॥

आश्रयासिद्धि, अनुकूलत्व, मूलशैथिल्य, इष्टापादन, विपर्ययापर्यवसान और मिथोविरोध तर्कों के दोष आचार्यों ने माने हैं। वह दोष विभाग युक्त नहीं है, कारण कि व्याप्तिपक्षधर्मता की प्रतीति की अपेक्षा से जैसे अनुमिति होती है वैसे ही व्याप्तिपक्षता की प्रतीति की अपेक्षा से ही तर्क भी होता है। परन्तु इन दोनों में यह भेद है कि अनुमिति तो व्याप्ति पक्षता की प्रमिति की अपेक्षा से होती है और तर्क तो अवास्तव के बल पर के अभ्युपगममात्र से सिद्ध व्याप्ति पक्षता से होता है इससे विचार ने पर तर्क पर के अभ्युपगममात्र जो प्रसाद उससे सिद्ध सामग्री वाला है। अतः वास्तवी आश्रयासिद्धि का भी अनुरोध नहीं कर सकता है। तस्मात् प्रमितिअभ्युपगम की सिद्धि से कृत वैचित्र्य के

पगममात्रसिद्धाभ्यां, भवति तेन विमृष्यमाणः तर्कः पराभ्युपगममात्रप्रसादसिद्धपरिकरो नाश्रयासिद्धिमपितावद्वास्तवीमनुरोद्धुमधिकरोति ततः प्रमित्यभ्युपगमसिद्धिकृतवैचित्र्याश्रयाद्भेदादन्यो यावान् यथा च हेत्वाभासविभागः तद्वदेव च तर्काभासविभागोपि न्याय्यः तस्मादाश्रयासिद्धिमूलशैथिल्येष्टापादनान्यसिद्धिरेकैव दोषोऽनुमानवत्तत्राप्रमितत्वावलम्बिनीह त्वनभ्युपगमावलम्बिनीति विशेषः। मिथोविरोधश्च सत्प्रतिपक्षतैव। विपर्ययापर्यवसानं तु दोष एवापादनस्य न भवति यन्नाम:विपर्ययापर्यवसानादापादनमात्मसाधनानुकूलं न भवति तदन्यदेव किमपि। बाधविरुद्धत्वव्यभिचारास्त्वनुमानवत् तर्केपि दोषाः पृथग्वाच्याः।बाध उत्सर्गसम्भावनादेरन्यत्रानुकूलः। तर्कस्य सप्तममपि दोषं तर्कस्यापत्तिसाम्यं न नामोपगच्छामः स चोभाभ्यामभ्युपगतव्याप्येनानभ्युपगतव्यापकेन प्रागेव दर्शित इत्यास्तां विस्तर इति ॥६३॥

एवं प्रकाराणि तत्तल्लक्षणेषु खण्डनान्यूहनीयानि। तदेतासु खण्डनयुक्तिषु कामपि स्थानान्तरस्थां केनापि प्रकारान्तरेणानीय तत्सदृशीमन्यादृशीं वा स्वयमूहित्वा

आश्रय भेद से अन्य जितना जिस प्रकार हेत्वाभास का विभाग अनुमान में होता है तर्क में भी उतना ही उसी प्रकार तर्काभास के विभाग को भी जानना चाहिये। आश्रयासिद्धि मूलशैथिल्य इष्टापादन ये तीन दोष असिद्धिरूप एक ही दोष को अनुमान के तुल्य तर्क में भी जानना चाहिये। अनुमान में असिद्धि अप्रमितत्व का अवलम्बन करती है और तर्क में असिद्धि अनभ्युपगम का अवलम्बन करती है और मिथोविरोध सत्प्रतिपक्ष ही है और विपर्ययापर्यवसान तो तर्क का दोष ही नहीं है। जो आपादन विपर्यय में पर्यवसान न होने से आत्मसाधन के अनुकूल नहीं होते हैं; वे और ही कुछ दोष हैं। अर्थात् जहां पर-पक्ष में दोषमात्र देना है वहां पर विपर्ययापर्यवसित तर्क का भी उपयोग होने से विपर्ययापर्यवसान का तर्काभास तो मान नहीं सकते हैं। फिर स्वपक्ष साधन के अर्थ विपर्ययापर्यवसित तर्क का जो उपन्यास नहीं होता है इसका कारण कुछ और ही दोष हैं तर्काभासत्व नहीं है।

बाध, विरुद्ध और व्यभिचार, अनुमान के तुल्य तर्क में भी पृथक् ही दोष हैं। उत्सर्गरूप तथा सम्भावनारूप तर्क से अन्य तर्क में बाध अनुकूल है अर्थात् आभासत्व का प्रयोजक नहीं है। तर्क में आपत्तिसाम्यरूप सप्तमदोष को भी मानते हैं वह आपत्तिसाम्य उस स्थल में होता है जहां दोनों व्याप्य का स्वीकार किया हो और व्यापक का स्वीकार न किया हो उस दोष को यदि सत्ता सद्व्यवहारविषय हो, तो सत्तावती हो जायगी, इस स्थल में प्रथम ही हम दिखा चुके हैं, अतः विस्तार रहे ॥ ६३ ॥

हमने विस्तार भय से जिन लक्षणों का खण्डन नहीं किया है। इन लक्षणों में भी मदुक्त खण्डन के सदृश खण्डनों को स्वयं ऊहा कर अथवा इन खण्डन युक्तियों के मध्य में अन्य स्थान स्थित किसी खण्डनयुक्ति का किसी प्रकार से आनयन कर अथवा तत्सदृश युक्तियों की ऊहा कर वादी से बड़े विचार से कृत अन्य २ पदार्थों के लक्षण का भी खण्डन करना चाहिये। तथा इस ग्रंथ में हमने जिन लक्षणों का खण्डन किया है, यदि वादी उनके तुल्य अन्य लक्षणों की ऊहा करे, अथवा उक्त बाधकों के मध्य में प्रज्ञाबल से किसी का समा-

परैर्विविच्यमानानि पदार्थान्तराण्यपि बुद्धिमता बाधनीयानि। अत्र चाऽस्माभिर्दूषयितुं शङ्कितेभ्यः परपक्षप्रकारेभ्यो यदि प्रकारान्तरं कोऽपि स्वयमूहति उक्तानां बाधकानां मध्ये मध्ये क्वचित्प्रज्ञयाऽपि समाधानमभिदध्यात्तत्र खण्डनवादिनः प्रस्तुता प्रतिक्रिया न स्फुरेत्तदा परेण प्रयुज्यमाने वाक्ये बहुपदात्मके कस्यचित्पदस्यार्थे खण्डनान्तरमवतारणीयम्। एवं तत्रापि परेण प्रज्ञाशोषणे पुनस्तथैव शाखान्तरेषु सङ्क्रमणीयमिति प्रकारेण खण्डनमये चक्रे सम्यगवधेयम्। न च शाखान्तरसङ्क्रान्तावर्थान्तरं पतेत्, अप्रकृतत्वाभावात्। नचैकनिर्णयारम्भेऽन्यसङ्क्रान्तावनौचित्यं स्यात्। शब्दोऽनित्यः कृतकत्वादित्यादौ परेणोक्ते कृतकत्वादावविप्रतिपत्तव्यत्वापत्तेरन्यतरासिद्ध्युच्छेदापातात्। येन हि तन्निर्वाह्यते तदनिर्वचनीयतयाऽपि निर्वाह्यानिर्वचनीयतैवेति। तस्मात्—

तत्तुल्योहस्तदीयं च योजनं विषयान्तरे।
शृङ्खला तस्य शेषे च त्रिधा भ्रमति मत्क्रिया॥ ६४॥

ग्रन्थग्रन्थिरिह क्वचित्क्वचिदपि न्यासि प्रयत्नान्मया,
प्राज्ञम्मन्यमना हठेन पठिती माऽस्मिन् खलः खेलतु।
श्रद्धाऽऽराद्धगुरुः श्लथीकृतदृढग्रन्थिः समासादय-
त्वेतत्तर्करसोर्मिमज्जनसुखेष्वासञ्जनं सज्जनः॥

धान भी करे और खण्डनवादी को प्रस्तुत समाधान की स्फूर्ति न हो, तो वादी से प्रयुक्त बहुपदात्मक वाक्य के किसी पद के अर्थ के खण्डन के अर्थ खण्डनान्तर का अवतरण करना चाहिये। और इसी प्रकार से वहां भी यदि वादी प्रज्ञा का शोषण [निष्प्रतिभा] करे, तो पुनः उक्तप्रकार से अन्य शाखा का अवलम्बन करना चाहिये। अन्य शाखा के अवलम्बन से अर्थान्तर भी नहीं होगा, कारण कि अन्य शाखा भी प्रस्तुत ही है। और अप्रस्तुत अन्य अर्थ का अवलम्बन, अर्थान्तर है। तथा एक पदार्थ के निर्णय के आरम्भ में अन्यपदार्थ के संक्रमण में अनौचित्य भी नहीं है, कारण कि अनौचित्य भी अप्रस्तुत अन्य के अवलम्बन में ही होता है, अन्यथा यदि प्रस्तुत विषय में भी अर्थान्तर वा अनौचित्य हो, तो शब्द में कृतकत्व से अनित्यत्व के साधन के प्रस्ताव में कृतकत्व में भी विप्रतिपत्ति (जिज्ञासा) अर्थान्तर के भय से नहीं होगी। तथा अन्यतरासिद्धि स्थल का उच्छेद हो जायगा, कारण कि अन्यतर के प्रति, हेतु के असिद्धिस्थल में हेतु को यदि सिद्धि करें तो अर्थान्तर वा अनौचित्य हो जायगा अतः साध्य के साधन के प्रस्ताव में हेतु का साधन कोई नहीं करेगा और वस्तुतः हेतु का निरूपण प्रस्तुत ही है। कारण कि जिस हेतु से जो निरूपित होता है उस हेतु के अनिर्वचनीयत्व से साध्य का अनिर्वचनीयत्व सिद्ध होता है तस्मात् मदुक्तयुक्ति के तुल्य अन्ययुक्तियों की ऊहा तथा अन्यत्र उक्त मदुक्त युक्तियों के अन्यत्र योजन, तथा उन युक्तियों के खण्डन होने पर शृङ्खला शाखान्तरारोहण इस प्रकार से मेरी खण्डन प्रक्रिया वाद मे त्रिधा भ्रमण करती है॥ ६४॥

इस ग्रन्थ में कहीं कहीं प्रयत्न रचना का काठिन्य हमने इस प्रयोजन से किया है कि जो प्राज्ञम्मन्य है वस्तुतः प्राज्ञ नहीं है तथा हठ से पढ़ने वाले हैं, वे खल जन इस ग्रन्थ में

ताम्बूलद्वयमासनं च लभते यः कान्यकुब्जेश्वरात्
यः साक्षात्कुरुते समाधिषु परब्रह्मप्रमोदार्णवम् ॥
यत्काव्यं मधुवर्षि धर्षितपरास्तर्केषु यस्योक्तयः
श्रीश्रीहर्षकवेः कृतिः कृतिमुदे तस्याऽभ्युदीयादियम् ॥ ९५ ॥

इति श्रीकवितार्किकचक्रवर्ति-श्रीश्रीहर्षकृतानिर्वचनीयसर्वस्वे
खण्डनखण्डखाद्ये तुरीयः परिच्छेदः समाप्तः ॥

क्रीड़ा न करें। किन्तु श्रद्धा से आराधित गुरुओं से विघटित है ग्रन्थ काठिन्य जिनसे ऐसे सज्जन विद्वान् ही मदुक्त तर्क की रसरूपी उर्म्मी में मज्जन सुख में प्रेम का लाभ करें।

कान्यकुब्ज देश के महाराज से ताम्बूल की दो बीड़ी तथा आसन जो पाते हैं, तथा समाधि में आनन्दरूप ब्रह्म का साक्षात्कार जो करते हैं, तथा जिनके काव्य मधु के वर्षणकारी होते हैं तथा परपक्ष के खण्डन करने वाले तर्कों में जिसकी उक्तियां हैं, उस श्री श्रीहर्ष कवि का यह ग्रन्थ पण्डितों के आनन्द के अर्थ प्रकट हुआ है ॥ ९५ ॥

गौरीशंकरश्रेष्ठिनाश्रखुरजारत्नेन काश्यां मुदा
जोखीरामपितामहस्य मटरूमल्लस्य तातस्य च।
नामालङ्कृतनामसंस्कृतमहाविद्यालयः स्थापितः
तत्सेवाधिकृतः तदेककरणः चण्डीप्रसादो द्विजः ॥१॥

क्वाहं कुत्र च खण्डनस्य सुदृढग्रन्थिप्रमोकेच्छया,
प्रारम्भो विकटश्रमश्च जननीभाषानुवादस्य मे।
यद्यप्येवमथापि पूर्णकृपया श्रीशस्य संख्यावतां
कारुण्यैकधियां विधाय करयोरेषोऽर्प्यते सादरम् ॥२॥

काशीस्थ श्रीजोखीराममटरूमलगोयनका संस्कृत-महाविद्यालय-प्रधानाध्यापक श्रीचण्डीप्रसाद सुकुल रचित खण्डनखण्डखाद्य-भाषानुवाद समाप्त।